# ऋग्वेद-संहिता—मण्डल १०

## Ṛgveda-Saṁhitā—Maṇḍala 10

10.001.01a अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात्।

10.001.01c अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः॥

10.001.01a agre bṛhann uṣasām ūrdhvo asthān nirjaganvān tamaso jyotiṣāgāt |
10.001.01c agnir bhānunā ruśatā svaṅga ā jāto viśvā sadmāny aprāḥ ||

10.001.02a स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु।

10.001.02c चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः॥

10.001.02a sa jāto garbho asi rodasyor agne cārur vibhṛta oṣadhīṣu |
10.001.02c citraḥ śiśuḥ pari tamāṁsy aktūn pra mātṛbhyo adhi kanikradad gāḥ ||

10.001.03a विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभि पाति तृतीयम्।

10.001.03c आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चन्त्यत्र॥

10.001.03a viṣṇur itthā paramam asya vidvāñ jāto bṛhann abhi pāti tṛtīyam |
10.001.03c āsā yad asya payo akrata svaṁ sacetaso abhy arcanty atra ||

10.001.04a अत उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरन्त्यन्नैः।

10.001.04c ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता॥

10.001.04a ata u tvā pitubhṛto janitrīr annāvṛdham prati caranty annaiḥ |
10.001.04c tā īm praty eṣi punar anyarūpā asi tvaṁ vikṣu mānuṣīṣu hotā ||

10.001.05a होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशन्तम्।

10.001.05c प्रत्यर्धिं देवस्यदेवस्य मह्ना श्रिया त्वग्निमतिथिं जनानाम्॥

10.001.05a hotāraṁ citraratham adhvarasya yajñasya-yajñasya ketuṁ ruśantam |
10.001.05c pratyardhiṁ devasya-devasya mahnā śriyā tv a1gnim atithiṁ janānām ||

10.001.06a स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः।

10.001.06c अरुषो जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान्॥

10.001.06a sa tu vastrāṇy adha peśanāni vasāno agnir nābhā pṛthivyāḥ |
10.001.06c aruṣo jātaḥ pada iḷāyāḥ purohito rājan yakṣīha devān ||

10.001.07a आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ ।

10.001.07c प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥

10.001.07a ā hi dyāvāpṛthivī agna ubhe sadā putro na mātarā tatantha |
10.001.07c pra yāhy acchośato yaviṣṭhāthā vaha sahasyeha devān ||

10.002.01a पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँरृतुपते यजेह ।

10.002.01c ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥

10.002.01a piprīhi devām̐ uśato yaviṣṭha vidvām̐ ṛtūm̐r ṛtupate yajeha |
10.002.01c ye daivyā ṛtvijas tebhir agne tvaṁ hotṝṇām asy āyajiṣṭhaḥ ||

10.002.02a वेषि होत्रमुत पोत्रं जनानां मन्धातासि द्रविणोदा ऋतावा ।

10.002.02c स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥

10.002.02a veṣi hotram uta potraṁ janānām mandhātāsi draviṇodā ṛtāvā |
10.002.02c svāhā vayaṁ kṛṇavāmā havīṁṣi devo devān yajatv agnir arhan ||

10.002.03a आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोळ्हुम् ।

10.002.03c अग्निर्विद्वान्स यजात्सेदु होता सो अध्वरान्स ऋतून्कल्पयाति ॥

10.002.03a ā devānām api panthām aganma yac chaknavāma tad anu pravoḷhum |
10.002.03c agnir vidvān sa yajāt sed u hotā so adhvarān sa ṛtūn kalpayāti ||

10.002.04a यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।

10.002.04c अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति ॥

10.002.04a yad vo vayam pramināma vratāni viduṣāṁ devā aviduṣṭarāsaḥ |
10.002.04c agniṣ ṭad viśvam ā pṛṇāti vidvān yebhir devām̐ ṛtubhiḥ kalpayāti ||

10.002.05a यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः ।

10.002.05c अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति ॥

10.002.05a yat pākatrā manasā dīnadakṣā na yajñasya manvate martyāsaḥ |
10.002.05c agniṣ ṭad dhotā kratuvid vijānan yajiṣṭho devām̐ ṛtuśo yajāti ||

10.002.06a विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान ।

10.002.06c स आ यजस्व नृवतीरनु क्षा स्पार्हा इषः क्षुमतीर्विश्वजन्याः ॥

10.002.06a viśveṣāṁ hy adhvarāṇām anīkaṁ citraṁ ketuṁ janitā tvā jajāna |
10.002.06c sa ā yajasva nṛvatīr anu kṣā spārhā iṣaḥ kṣumatīr viśvajanyāḥ ||

10.002.07a यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान ।

10.002.07c पन्थामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥

10.002.07a yaṁ tvā dyāvāpṛthivī yaṁ tvāpas tvaṣṭā yaṁ tvā sujanimā jajāna |
10.002.07c panthām anu pravidvān pitṛyāṇaṁ dyumad agne samidhāno vi bhāhi ||

10.003.01a इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।

10.003.01c चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥

10.003.01a ino rājann aratiḥ samiddho raudro dakṣāya suṣumām̐ adarśi |
10.003.01c cikid vi bhāti bhāsā bṛhatāsiknīm eti ruśatīm apājan ||

10.003.02a कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् ।

10.003.02c ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥

10.003.02a kṛṣṇāṁ yad enīm abhi varpasā bhūj janayan yoṣāṁ bṛhataḥ pitur jām |
10.003.02c ūrdhvam bhānuṁ sūryasya stabhāyan divo vasubhir aratir vi bhāti ||

10.003.03a भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।

10.003.03c सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥

10.003.03a bhadro bhadrayā sacamāna āgāt svasāraṁ jāro abhy eti paścāt |
10.003.03c supraketair dyubhir agnir vitiṣṭhan ruśadbhir varṇair abhi rāmam asthāt ||

10.003.04a अस्य यामासो बृहतो न वग्नूनिन्धाना अग्नेः सख्युः शिवस्य ।

10.003.04c ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्तवश्चिकित्रे ॥

10.003.04a asya yāmāso bṛhato na vagnūn indhānā agneḥ sakhyuḥ śivasya |
10.003.04c īḍyasya vṛṣṇo bṛhataḥ svāso bhāmāso yāmann aktavaś cikitre ||

10.003.05a स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः ।

10.003.05c ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम् ॥

10.003.05a svanā na yasya bhāmāsaḥ pavante rocamānasya bṛhataḥ sudivaḥ |
10.003.05c jyeṣṭhebhir yas tejiṣṭhaiḥ krīḷumadbhir varṣiṣṭhebhir bhānubhir nakṣati dyām ||

10.003.06a अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः ।

10.003.06c प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा ॥

10.003.06a asya śuṣmāso dadṛśānapaver jehamānasya svanayan niyudbhiḥ |
10.003.06c pratnebhir yo ruśadbhir devatamo vi rebhadbhir aratir bhāti vibhvā ||

10.003.07a स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः ।

10.003.07c अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥

10.003.07a sa ā vakṣi mahi na ā ca satsi divaspṛthivyor aratir yuvatyoḥ |
10.003.07c agniḥ sutukaḥ sutukebhir aśvai rabhasvadbhī rabhasvām̐ eha gamyāḥ ||

10.004.01a प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।

10.004.01c धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥

10.004.01a pra te yakṣi pra ta iyarmi manma bhuvo yathā vandyo no haveṣu |
10.004.01c dhanvann iva prapā asi tvam agna iyakṣave pūrave pratna rājan ||

10.004.02a यं त्वा जनासो अभि संचरन्ति गाव उष्णमिव व्रजं यविष्ठ ।

10.004.02c दूतो देवानामसि मर्त्यानामन्तर्महाँश्चरसि रोचनेन ॥

10.004.02a yaṁ tvā janāso abhi sañcaranti gāva uṣṇam iva vrajaṁ yaviṣṭha |
10.004.02c dūto devānām asi martyānām antar mahām̐ś carasi rocanena ||

10.004.03a शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना ।

10.004.03c धनोरधि प्रवता यासि हर्यञ्जिगीषसे पशुरिवावसृष्टः ॥

10.004.03a śiśuṁ na tvā jenyaṁ vardhayantī mātā bibharti sacanasyamānā |
10.004.03c dhanor adhi pravatā yāsi haryañ jigīṣase paśur ivāvasṛṣṭaḥ ||

10.004.04a मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से ।

10.004.04c शये वव्रिश्चरति जिह्वयादन्रेरिह्यते युवतिं विश्पतिः सन् ॥

10.004.04a mūrā amūra na vayaṁ cikitvo mahitvam agne tvam aṅga vitse |
10.004.04c śaye vavriś carati jihvayādan rerihyate yuvatiṁ viśpatiḥ san ||

10.004.05a कूचिज्जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः ।

10.004.05c अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयन्त मर्ताः ॥

10.004.05a kūcij jāyate sanayāsu navyo vane tasthau palito dhūmaketuḥ |
10.004.05c asnātāpo vṛṣabho na pra veti sacetaso yam praṇayanta martāḥ ||

10.004.06a तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् ।

10.004.06c इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः ॥

10.004.06a tanūtyajeva taskarā vanargū raśanābhir daśabhir abhy adhītām |
10.004.06c iyaṁ te agne navyasī manīṣā yukṣvā rathaṁ na śucayadbhir aṅgaiḥ ||

10.004.07a ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत् ।

10.004.07c रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वो३ अप्रयुच्छन् ॥

10.004.07a brahma ca te jātavedo namaś ceyaṁ ca gīḥ sadam id vardhanī bhūt |
10.004.07c rakṣā ṇo agne tanayāni tokā rakṣota nas tanvo3 aprayucchan ||

10.005.01a एकः समुद्रो धरुणो रयीणामस्मद्धृदो भूरिजन्मा वि चष्टे ।

10.005.01c सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥

10.005.01a ekaḥ samudro dharuṇo rayīṇām asmad dhṛdo bhūrijanmā vi caṣṭe |
10.005.01c siṣakty ūdhar niṇyor upastha utsasya madhye nihitam padaṁ veḥ ||

10.005.02a समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः ।

10.005.02c ऋतस्य पदं कवयो नि पान्ति गुहा नामानि दधिरे पराणि ॥

10.005.02a samānaṁ nīḻaṁ vṛṣaṇo vasānāḥ saṁ jagmire mahiṣā arvatībhiḥ |
10.005.02c ṛtasya padaṁ kavayo ni pānti guhā nāmāni dadhire parāṇi ||

10.005.03a ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयन्ती ।

10.005.03c विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित्तन्तुं मनसा वियन्तः ॥

10.005.03a ṛtāyinī māyinī saṁ dadhāte mitvā śiśuṁ jajñatur vardhayantī |
10.005.03c viśvasya nābhiṁ carato dhruvasya kaveś cit tantuṁ manasā viyantaḥ ||

10.005.04a ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचन्ते ।

10.005.04c अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनाम् ॥

10.005.04a ṛtasya hi vartanayaḥ sujātam iṣo vājāya pradivaḥ sacante |
10.005.04c adhīvāsaṁ rodasī vāvasāne ghṛtair annair vāvṛdhāte madhūnām ||

10.005.05a सप्त स्वसॄररुषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कम् ।

10.005.05c अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य ॥

10.005.05a sapta svasṝr aruṣīr vāvaśāno vidvān madhva uj jabhārā dṛśe kam |
10.005.05c antar yeme antarikṣe purājā icchan vavrim avidat pūṣaṇasya ||

10.005.06a सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।

10.005.06c आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥

10.005.06a sapta maryādāḥ kavayas tatakṣus tāsām ekām id abhy aṁhuro gāt |
10.005.06c āyor ha skambha upamasya nīḻe pathāṁ visarge dharuṇeṣu tasthau ||

10.005.07a असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे ।

10.005.07c अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः ॥

10.005.07a asac ca sac ca parame vyoman dakṣasya janmann aditer upasthe |
10.005.07c agnir ha naḥ prathamajā ṛtasya pūrva āyuni vṛṣabhaś ca dhenuḥ ||

10.006.01a अयं स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ ।

10.006.01c ज्येष्ठेभिर्यो भानुभिरृषूणां पर्येति परिवीतो विभावा ॥

10.006.01a ayaṁ sa yasya śarmann avobhir agner edhate jaritābhiṣṭau |
10.006.01c jyeṣṭhebhir yo bhānubhir ṛṣūṇām paryeti parivīto vibhāvā ||

10.006.02a यो भानुभिर्विभावा विभात्यग्निर्देवेभिरृतावाजस्रः ।

10.006.02c आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥

10.006.02a yo bhānubhir vibhāvā vibhāty agnir devebhir ṛtāvājasraḥ |
10.006.02c ā yo vivāya sakhyā sakhibhyo 'parihvṛto atyo na saptiḥ ||

10.006.03a ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।

10.006.03c आ यस्मिन्मना हवींष्यग्नावरिष्टरथ स्कभ्नाति शूषैः ॥

10.006.03a īśe yo viśvasyā devavīter īśe viśvāyur uṣaso vyuṣṭau |
10.006.03c ā yasmin manā havīṁṣy agnāv ariṣṭaratha skabhnāti śūṣaiḥ ||

10.006.04a शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।

10.006.04c मन्द्रो होता स जुह्वा३ यजिष्ठः सम्मिश्लो अग्निरा जिघर्ति देवान् ॥

10.006.04a śūṣebhir vṛdho juṣāṇo arkair devām̐ acchā raghupatvā jigāti |
10.006.04c mandro hotā sa juhvā3 yajiṣṭhaḥ sammiślo agnir ā jigharti devān ||

10.006.05a तमुस्रामिन्द्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वम् ।

10.006.05c आ यं विप्रासो मतिभिर्गृणन्ति जातवेदसं जुह्वं सहानाम् ॥

10.006.05a tam usrām indraṁ na rejamānam agniṁ gīrbhir namobhir ā kṛṇudhvam |
10.006.05c ā yaṁ viprāso matibhir gṛṇanti jātavedasaṁ juhvaṁ sahānām ||

10.006.06a सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवन्त एवैः ।

10.006.06c अस्मे ऊतीरिन्द्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥

10.006.06a saṁ yasmin viśvā vasūni jagmur vāje nāśvāḥ saptīvanta evaiḥ |
10.006.06c asme ūtīr indravātatamā arvācīnā agna ā kṛṇuṣva ||

10.006.07a अधा ह्यग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ ।

10.006.07c तं ते देवासो अनु केतमायन्नधावर्धन्त प्रथमास ऊमाः ॥

10.006.07a adhā hy agne mahnā niṣadyā sadyo jajñāno havyo babhūtha |
10.006.07c taṁ te devāso anu ketam āyann adhāvardhanta prathamāsa ūmāḥ ||

10.007.01a स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव ।

10.007.01c सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः ॥

10.007.01a svasti no divo agne pṛthivyā viśvāyur dhehi yajathāya deva |
10.007.01c sacemahi tava dasma praketair uruṣyā ṇa urubhir deva śaṁsaiḥ ||

10.007.02a इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणन्ति राधः ।

10.007.02c यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात ॥

10.007.02a imā agne matayas tubhyaṁ jātā gobhir aśvair abhi gṛṇanti rādhaḥ |
10.007.02c yadā te marto anu bhogam ānaḍ vaso dadhāno matibhiḥ sujāta ||

10.007.03a अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायम् ।

10.007.03c अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥

10.007.03a agnim manye pitaram agnim āpim agnim bhrātaraṁ sadam it sakhāyam |
10.007.03c agner anīkam bṛhataḥ saparyaṁ divi śukraṁ yajataṁ sūryasya ||

10.007.04a सिध्रा अग्ने धियो अस्मे सनुत्रीर्यं त्रायसे दम आ नित्यहोता ।

10.007.04c ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥

10.007.04a sidhrā agne dhiyo asme sanutrīr yaṁ trāyase dama ā nityahotā |
10.007.04c ṛtāvā sa rohidaśvaḥ purukṣur dyubhir asmā ahabhir vāmam astu ||

10.007.05a द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारम् ।

10.007.05c बाहुभ्यामग्निमायवोऽजनन्त विक्षु होतारं न्यसादयन्त ॥

10.007.05a dyubhir hitam mitram iva prayogam pratnam ṛtvijam adhvarasya jāram |
10.007.05c bāhubhyām agnim āyavo 'jananta vikṣu hotāraṁ ny asādayanta ||

10.007.06a स्वयं यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः ।

10.007.06c यथायज ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥

10.007.06a svayaṁ yajasva divi deva devān kiṁ te pākaḥ kṛṇavad apracetāḥ |
10.007.06c yathāyaja ṛtubhir deva devān evā yajasva tanvaṁ sujāta ||

10.007.07a भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः ।

10.007.07c रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो३ अप्रयुच्छन् ॥

10.007.07a bhavā no agne 'vitota gopā bhavā vayaskṛd uta no vayodhāḥ |
10.007.07c rāsvā ca naḥ sumaho havyadātiṁ trāsvota nas tanvo3 aprayucchan ||

10.008.01a प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।

10.008.01c दिवश्चिदन्ताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥

10.008.01a pra ketunā bṛhatā yāty agnir ā rodasī vṛṣabho roravīti |
10.008.01c divaś cid antām̐ upamām̐ ud ānaḷ apām upasthe mahiṣo vavardha ||

10.008.02a मुमोद् गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत् ।

10.008.02c स देवतात्युद्यतानि कृण्वन्स्वेषु क्षयेषु प्रथमो जिगाति ॥

10.008.02a mumoda garbho vṛṣabhaḥ kakudmān asremā vatsaḥ śimīvāṁ̐ arāvīt |
10.008.02c sa devatāty udyatāni kṛṇvan sveṣu kṣayeṣu prathamo jigāti ||

10.008.03a आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे सूरो अर्णः ।

10.008.03c अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषन्त ॥

10.008.03a ā yo mūrdhānam pitror arabdha ny adhvare dadhire sūro arṇaḥ |
10.008.03c asya patmann aruṣīr aśvabudhnā ṛtasya yonau tanvo juṣanta ||

10.008.04a उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा ।

10.008.04c ऋताय सप्त दधिषे पदानि जनयन्मित्रं तन्वे३ स्वायै ॥

10.008.04a uṣa-uṣo hi vaso agram eṣi tvaṁ yamayor abhavo vibhāvā |
10.008.04c ṛtāya sapta dadhiṣe padāni janayan mitraṁ tanve3 svāyai ||

10.008.05a भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि ।

10.008.05c भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥

10.008.05a bhuvaś cakṣur maha ṛtasya gopā bhuvo varuṇo yad ṛtāya veṣi |
10.008.05c bhuvo apāṁ napāj jātavedo bhuvo dūto yasya havyaṁ jujoṣaḥ ||

10.008.06a भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।

10.008.06c दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥

10.008.06a bhuvo yajñasya rajasaś ca netā yatrā niyudbhiḥ sacase śivābhiḥ |
10.008.06c divi mūrdhānaṁ dadhiṣe svarṣām jihvām agne cakṛṣe havyavāham ||

10.008.07a अस्य त्रितः क्रतुना वव्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य ।

10.008.07c सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥

10.008.07a asya tritaḥ kratunā vavre antar icchan dhītim pitur evaiḥ parasya |
10.008.07c sacasyamānaḥ pitror upasthe jāmi bruvāṇa āyudhāni veti ||

10.008.08a स पित्र्याण्यायुधानि विद्वानिन्द्रेषित आप्त्यो अभ्ययुध्यत् ।

10.008.08c त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥

10.008.08a sa pitryāṇy āyudhāni vidvān indreṣita āptyo abhy ayudhyat |
10.008.08c triśīrṣāṇaṁ saptaraśmiṁ jaghanvān tvāṣṭrasya cin niḥ sasṛje trito gāḥ ||

10.008.09a भूरीदिन्द्र उदिनक्षन्तमोजोऽवाभिनत्सत्पतिर्मन्यमानम् ।

10.008.09c त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥

10.008.09a bhūrīd indra udinakṣantam ojo 'vābhinat satpatir manyamānam |
10.008.09c tvāṣṭrasya cid viśvarūpasya gonām ācakrāṇas trīṇi śīrṣā parā vark ||

10.009.01a आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

10.009.01c महे रणाय चक्षसे ॥

10.009.01a āpo hi ṣṭhā mayobhuvas tā na ūrje dadhātana |
10.009.01c mahe raṇāya cakṣase ||

10.009.02a यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

10.009.02c उशतीरिव मातरः ॥

10.009.02a yo vaḥ śivatamo rasas tasya bhājayateha naḥ |
10.009.02c uśatīr iva mātaraḥ ||

10.009.03a तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।

10.009.03c आपो जनयथा च नः ॥

10.009.03a tasmā araṁ gamāma vo yasya kṣayāya jinvatha |
10.009.03c āpo janayathā ca naḥ ||

10.009.04a शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

10.009.04c शं योरभि स्रवन्तु नः ॥

10.009.04a śaṁ no devīr abhiṣṭaya āpo bhavantu pītaye |
10.009.04c śaṁ yor abhi sravantu naḥ ||

10.009.05a ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् ।

10.009.05c अपो याचामि भेषजम् ॥

10.009.05a īśānā vāryāṇāṁ kṣayantīś carṣaṇīnām |

10.009.05c apo yācāmi bheṣajam ||

10.009.06a अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।

10.009.06c अग्निं च विश्वशम्भुवम् ॥

10.009.06a apsu me somo abravīd antar viśvāni bheṣajā |

10.009.06c agniṁ ca viśvaśambhuvam ||

10.009.07a आपः पृणीत भेषजं वरूथं तन्वे३ मम ।

10.009.07c ज्योक्च सूर्यं दृशे ॥

10.009.07a āpaḥ pṛṇīta bheṣajaṁ varūthaṁ tanve3 mama |

10.009.07c jyok ca sūryaṁ dṛśe ||

10.009.08a इदमापः प्र वहत यत्किं च दुरितं मयि ।

10.009.08c यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥

10.009.08a idam āpaḥ pra vahata yat kiṁ ca duritam mayi |

10.009.08c yad vāham abhidudroha yad vā śepa utānṛtam ||

10.009.09a आपो अद्यान्वचारिषं रसेन समगस्महि ।

10.009.09c पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥

10.009.09a āpo adyānv acāriṣaṁ rasena sam agasmahi |

10.009.09c payasvān agna ā gahi tam mā saṁ sṛja varcasā ||

10.010.01a ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।

10.010.01c पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥

10.010.01a o cit sakhāyaṁ sakhyā vavṛtyāṁ tiraḥ purū cid arṇavaṁ jaganvān |

10.010.01c pitur napātam ā dadhīta vedhā adhi kṣami prataraṁ dīdhyānaḥ ||

10.010.02a न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति ।

10.010.02c महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥

10.010.02a na te sakhā sakhyaṁ vaṣṭy etat salakṣmā yad viṣurūpā bhavāti |

10.010.02c mahas putrāso asurasya vīrā divo dhartāra urviyā pari khyan ||

10.010.03a उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।

10.010.03c नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ॥

10.010.03a uśanti ghā te amṛtāsa etad ekasya cit tyajasam martyasya |
10.010.03c ni te mano manasi dhāyy asme janyuḥ patis tanva1m ā viviśyāḥ ||

10.010.04a न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।

10.010.04c गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥

10.010.04a na yat purā cakṛmā kad dha nūnam ṛtā vadanto anṛtaṁ rapema |
10.010.04c gandharvo apsv apyā ca yoṣā sā no nābhiḥ paramaṁ jāmi tan nau ||

10.010.05a गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ।

10.010.05c नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥

10.010.05a garbhe nu nau janitā dampatī kar devas tvaṣṭā savitā viśvarūpaḥ |
10.010.05c nakir asya pra minanti vratāni veda nāv asya pṛthivī uta dyauḥ ||

10.010.06a को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।

10.010.06c बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥

10.010.06a ko asya veda prathamasyāhnaḥ ka īṁ dadarśa ka iha pra vocat |
10.010.06c bṛhan mitrasya varuṇasya dhāma kad u brava āhano vīcyā nṝn ||

10.010.07a यमस्य मा यम्यं१ काम आगन्समाने योनौ सहशेय्याय ।

10.010.07c जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥

10.010.07a yamasya mā yamyaṁ1 kāma āgan samāne yonau sahaśeyyāya |
10.010.07c jāyeva patye tanvaṁ riricyāṁ vi cid vṛheva rathyeva cakrā ||

10.010.08a न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।

10.010.08c अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥

10.010.08a na tiṣṭhanti na ni miṣanty ete devānāṁ spaśa iha ye caranti |
10.010.08c anyena mad āhano yāhi tūyaṁ tena vi vṛha rathyeva cakrā ||

10.010.09a रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।

10.010.09c दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य बिभृयादजामि ॥

10.010.09a rātrībhir asmā ahabhir daśasyet sūryasya cakṣur muhur un mimīyāt |
10.010.09c divā pṛthivyā mithunā sabandhū yamīr yamasya bibhṛyād ajāmi ||

10.010.10a आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।

10.010.10c उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥

10.010.10a ā ghā tā gacchān uttarā yugāni yatra jāmayaḥ kṛṇavann ajāmi |
10.010.10c upa barbṛhi vṛṣabhāya bāhum anyam icchasva subhage patim mat ||

10.010.11a किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निरृतिर्निगच्छात् ।

10.010.11c काममूता बह्वे३तद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥

10.010.11a kim bhrātāsad yad anātham bhavāti kim u svasā yan nirṛtir nigacchāt |
10.010.11c kāmamūtā bahv e3tad rapāmi tanvā me tanvaṁ1 sam pipṛgdhi ||

10.010.12a न वा उ ते तन्वा तन्वं१ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।

10.010.12c अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥

10.010.12a na vā u te tanvā tanvaṁ1 sam papṛcyām pāpam āhur yaḥ svasāraṁ nigacchāt |
10.010.12c anyena mat pramudaḥ kalpayasva na te bhrātā subhage vaṣṭy etat ||

10.010.13a बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।

10.010.13c अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥

10.010.13a bato batāsi yama naiva te mano hṛdayaṁ cāvidāma |
10.010.13c anyā kila tvāṁ kakṣyeva yuktam pari ṣvajāte libujeva vṛkṣam ||

10.010.14a अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ।

10.010.14c तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥

10.010.14a anyam ū ṣu tvaṁ yamy anya u tvām pari ṣvajāte libujeva vṛkṣam |
10.010.14c tasya vā tvam mana icchā sa vā tavādhā kṛṇuṣva saṁvidaṁ subhadrām ||

10.011.01a वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।

10.011.01c विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून् ॥

10.011.01a vṛṣā vṛṣṇe duduhe dohasā divaḥ payāṁsi yahvo aditer adābhyaḥ |
10.011.01c viśvaṁ sa veda varuṇo yathā dhiyā sa yajñiyo yajatu yajñiyām̐ ṛtūn ||

10.011.02a रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः ।

10.011.02c इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥

10.011.02a rapad gandharvīr apyā ca yoṣaṇā nadasya nāde pari pātu me manaḥ |
10.011.02c iṣṭasya madhye aditir ni dhātu no bhrātā no jyeṣṭhaḥ prathamo vi vocati ||

10.011.03a सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती ।

10.011.03c यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥

10.011.03a so cin nu bhadrā kṣumatī yaśasvaty uṣā uvāsa manave svarvatī |
10.011.03c yad īm uśantam uśatām anu kratum agniṁ hotāraṁ vidathāya jījanan ||

10.011.04a अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे ।

10.011.04c यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥

10.011.04a adha tyaṁ drapsaṁ vibhvaṁ vicakṣaṇaṁ vir ābharad iṣitaḥ śyeno adhvare |
10.011.04c yadī viśo vṛṇate dasmam āryā agniṁ hotāram adha dhīr ajāyata ||

10.011.05a सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।

10.011.05c विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं ससवाँ उपयासि भूरिभिः ॥

10.011.05a sadāsi raṇvo yavaseva puṣyate hotrābhir agne manuṣaḥ svadhvaraḥ |
10.011.05c viprasya vā yac chaśamāna ukthyaṁ1 vājaṁ sasavām̐ upayāsi bhūribhiḥ ||

10.011.06a उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।

10.011.06c विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥

10.011.06a ud īraya pitarā jāra ā bhagam iyakṣati haryato hṛtta iṣyati |
10.011.06c vivakti vahniḥ svapasyate makhas taviṣyate asuro vepate matī ||

10.011.07a यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे ।

10.011.07c इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥

10.011.07a yas te agne sumatim marto akṣat sahasaḥ sūno ati sa pra śṛṇve |
10.011.07c iṣaṁ dadhāno vahamāno aśvair ā sa dyumām̐ amavān bhūṣati dyūn ||

10.011.08a यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।

10.011.08c रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥

10.011.08a yad agna eṣā samitir bhavāti devī deveṣu yajatā yajatra |
10.011.08c ratnā ca yad vibhajāsi svadhāvo bhāgaṁ no atra vasumantaṁ vītāt ||

10.011.09a श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।

10.011.09c आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥

10.011.09a śrudhī no agne sadane sadhasthe yukṣvā ratham amṛtasya dravitnum |
10.011.09c ā no vaha rodasī devaputre mākir devānām apa bhūr iha syāḥ ||

10.012.01a द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।

10.012.01c देवो यन्मर्तान्यजथाय कृण्वन्सीदद्धोता प्रत्यङ्स्वमसुं यन् ॥

10.012.01a dyāvā ha kṣāmā prathame ṛtenābhiśrāve bhavataḥ satyavācā |
10.012.01c devo yan martān yajathāya kṛṇvan sīdad dhotā pratyaṅ svam asuṁ yan ||

10.012.02a देवो देवान्परिभूरृतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।

10.012.02c धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ॥

10.012.02a devo devān paribhūr ṛtena vahā no havyam prathamaś cikitvān |
10.012.02c dhūmaketuḥ samidhā bhāṛjīko mandro hotā nityo vācā yajīyān ||

10.012.03a स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।

10.012.03c विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥

10.012.03a svāvṛg devasyāmṛtaṁ yadī gor ato jātāso dhārayanta urvī |
10.012.03c viśve devā anu tat te yajur gur duhe yad enī divyaṁ ghṛtaṁ vāḥ ||

10.012.04a अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।

10.012.04c अहा यद्द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीताम् ॥

10.012.04a arcāmi vāṁ vardhāyāpo ghṛtasnū dyāvābhūmī śṛṇutaṁ rodasī me |
10.012.04c ahā yad dyāvo 'sunītim ayan madhvā no atra pitarā śiśītām ||

10.012.05a किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।

10.012.05c मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥

10.012.05a kiṁ svin no rājā jagṛhe kad asyāti vratam cakṛmā ko vi veda |
10.012.05c mitraś cid dhi ṣmā juhurāṇo devāñ chloko na yātām api vājo asti ||

10.012.06a दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।

10.012.06c यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥

10.012.06a durmantv atrāmṛtasya nāma salakṣmā yad viṣurūpā bhavāti |
10.012.06c yamasya yo manavate sumantv agne tam ṛṣva pāhy aprayucchan ||

10.012.07a यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।

10.012.07c सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥

10.012.07a yasmin devā vidathe mādayante vivasvataḥ sadane dhārayante |
10.012.07c sūrye jyotir adadhur māsy a1ktūn pari dyotaniṁ carato ajasrā ||

10.012.08a यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।

10.012.08c मित्रो नो अत्रादितिरनागान्सविता देवो वरुणाय वोचत् ॥

10.012.08a yasmin devā manmani sañcaranty apīcye3 na vayam asya vidma |
10.012.08c mitro no atrāditir anāgān savitā devo varuṇāya vocat ||

10.012.09a श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।

10.012.09c आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥

10.012.09a śrudhī no agne sadane sadhasthe yukṣvā ratham amṛtasya dravitnum |
10.012.09c ā no vaha rodasī devaputre mākir devānām apa bhūr iha syāḥ ||

10.013.01a युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।

10.013.01c शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥

10.013.01a yuje vām brahma pūrvyaṁ namobhir vi śloka etu pathyeva sūreḥ |
10.013.01c śṛṇvantu viśve amṛtasya putrā ā ye dhāmāni divyāni tasthuḥ ||

10.013.02a यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः ।

10.013.02c आ सीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः ॥

10.013.02a yame iva yatamāne yad aitam pra vām bharan mānuṣā devayantaḥ |
10.013.02c ā sīdatam svam u lokam vidāne svāsasthe bhavatam indave naḥ ||

10.013.03a पञ्च पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन ।

10.013.03c अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ॥

10.013.03a pañca padāni rupo anv aroham catuṣpadīm anv emi vratena |
10.013.03c akṣareṇa prati mima etām ṛtasya nābhāv adhi sam punāmi ||

10.013.04a देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत ।

10.013.04c बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत् ॥

10.013.04a devebhyaḥ kam avṛṇīta mṛtyum prajāyai kam amṛtam nāvṛṇīta |
10.013.04c bṛhaspatim yajñam akṛṇvata ṛṣim priyām yamas tanva1m prārirecīt ||

10.013.05a सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम् ।

10.013.05c उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥

10.013.05a sapta kṣaranti śiśave marutvate pitre putrāso apy avīvatann ṛtam |
10.013.05c ubhe id asyobhayasya rājata ubhe yatete ubhayasya puṣyataḥ ||

10.014.01a परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।

10.014.01c वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥

10.014.01a pareyivāṁsam pravato mahīr anu bahubhyaḥ panthām anupaspaśānam |
10.014.01c vaivasvatam saṅgamanam janānām yamam rājānam haviṣā duvasya ||

10.014.02a यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।

10.014.02c यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः ॥

10.014.02a yamo no gātum prathamo viveda naiṣā gavyūtir apabhartavā u |
10.014.02c yatrā naḥ pūrve pitaraḥ pareyur enā jajñānāḥ pathyā3 anu svāḥ ||

10.014.03a मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।

10.014.03c याँश्च देवा वावृधुर्ये च देवान्स्वाहान्ये स्वधयान्ये मदन्ति ॥

10.014.03a mātalī kavyair yamo aṅgirobhir bṛhaspatir ṛkvabhir vāvṛdhānaḥ |
10.014.03c yāṁś ca devā vāvṛdhur ye ca devān svāhānye svadhayānye madanti ||

10.014.04a इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः ।

10.014.04c आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषा मादयस्व ॥

10.014.04a imaṁ yama prastaram ā hi sīdāṅgirobhiḥ pitṛbhiḥ saṁvidānaḥ |
10.014.04c ā tvā mantrāḥ kaviśastā vahantv enā rājan haviṣā mādayasva ||

10.014.05a अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।

10.014.05c विवस्वन्तं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥

10.014.05a aṅgirobhir ā gahi yajñiyebhir yama vairūpair iha mādayasva |
10.014.05c vivasvantaṁ huve yaḥ pitā te 'smin yajñe barhiṣy ā niṣadya ||

10.014.06a अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।

10.014.06c तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥

10.014.06a aṅgiraso naḥ pitaro navagvā atharvāṇo bhṛgavaḥ somyāsaḥ |
10.014.06c teṣāṁ vayaṁ sumatau yajñiyānām api bhadre saumanase syāma ||

10.014.07a प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।

10.014.07c उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम् ॥

10.014.07a prehi prehi pathibhiḥ pūrvyebhir yatrā naḥ pūrve pitaraḥ pareyuḥ |
10.014.07c ubhā rājānā svadhayā madantā yamam paśyāsi varuṇaṁ ca devam ||

10.014.08a सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।

10.014.08c हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥

10.014.08a saṁ gacchasva pitṛbhiḥ saṁ yameneṣṭāpūrtena parame vyoman |
10.014.08c hitvāyāvadyam punar astam ehi saṁ gacchasva tanvā suvarcāḥ ||

10.014.09a अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।

10.014.09c अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥

10.014.09a apeta vīta vi ca sarpatāto 'smā etam pitaro lokam akran |
10.014.09c ahobhir adbhir aktubhir vyaktaṁ yamo dadāty avasānam asmai ||

10.014.10a अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।

10.014.10c अथा पितॄन्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥

10.014.10a ati drava sārameyau śvānau caturakṣau śabalau sādhunā pathā |
10.014.10c athā pitṝn suvidatrām̐ upehi yamena ye sadhamādam madanti ||

10.014.11a यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।

10.014.11c ताभ्यामेनं परि देहि राजन्स्वस्ति चास्मा अनमीवं च धेहि ॥

10.014.11a yau te śvānau yama rakṣitārau caturakṣau pathirakṣī nṛcakṣasau |
10.014.11c tābhyām enam pari dehi rājan svasti cāsmā anamīvaṁ ca dhehi ||

10.014.12a उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।

10.014.12c तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥

10.014.12a urūṇasāv asutṛpā udumbalau yamasya dūtau carato janām̐ anu |
10.014.12c tāv asmabhyaṁ dṛśaye sūryāya punar dātām asum adyeha bhadram ||

10.014.13a यमाय सोमं सुनुत यमाय जुहुता हविः ।

10.014.13c यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥

10.014.13a yamāya somaṁ sunuta yamāya juhutā haviḥ |
10.014.13c yamaṁ ha yajño gacchaty agnidūto araṅkṛtaḥ ||

10.014.14a यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।

10.014.14c स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥

10.014.14a yamāya ghṛtavad dhavir juhota pra ca tiṣṭhata |
10.014.14c sa no deveṣv ā yamad dīrgham āyuḥ pra jīvase ||

10.014.15a यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।

10.014.15c इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥

10.014.15a yamāya madhumattamaṁ rājñe havyaṁ juhotana |
10.014.15c idaṁ nama ṛṣibhyaḥ pūrvajebhyaḥ pūrvebhyaḥ pathikṛdbhyaḥ ||

10.014.16a त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत् ।

10.014.16c त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता ॥

10.014.16a trikadrukebhiḥ patati ṣal urvīr ekam id bṛhat |

10.014.16c triṣṭub gāyatrī chandāṁsi sarvā tā yama āhitā ||

10.015.01a उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।

10.015.01c असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

10.015.01a ud īratām avara ut parāsa un madhyamāḥ pitaraḥ somyāsaḥ |
10.015.01c asuṁ ya īyur avṛkā ṛtajñās te no 'vantu pitaro haveṣu ||

10.015.02a इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।

10.015.02c ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥

10.015.02a idam pitṛbhyo namo astv adya ye pūrvāso ya uparāsa īyuḥ |
10.015.02c ye pārthive rajasy ā niṣattā ye vā nūnaṁ suvṛjanāsu vikṣu ||

10.015.03a आहं पितॄन्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।

10.015.03c बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥

10.015.03a āham pitṝn suvidatrām̐ avitsi napātaṁ ca vikramaṇaṁ ca viṣṇoḥ |
10.015.03c barhiṣado ye svadhayā sutasya bhajanta pitvas ta ihāgamiṣṭhāḥ ||

10.015.04a बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।

10.015.04c त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥

10.015.04a barhiṣadaḥ pitara ūty a1rvāg imā vo havyā cakṛmā juṣadhvam |
10.015.04c ta ā gatāvasā śantamenāthā naḥ śaṁ yor arapo dadhāta ||

10.015.05a उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।

10.015.05c त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥

10.015.05a upahūtāḥ pitaraḥ somyāso barhiṣyeṣu nidhiṣu priyeṣu |
10.015.05c ta ā gamantu ta iha śruvantv adhi bruvantu te 'vantv asmān ||

10.015.06a आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।

10.015.06c मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥

10.015.06a ācyā jānu dakṣiṇato niṣadyemaṁ yajñam abhi gṛṇīta viśve |
10.015.06c mā hiṁsiṣṭa pitaraḥ kena cin no yad va āgaḥ puruṣatā karāma ||

10.015.07a आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
10.015.07c पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥

10.015.07a āsīnāso aruṇīnām upasthe rayiṁ dhatta dāśuṣe martyāya |
10.015.07c putrebhyaḥ pitaras tasya vasvaḥ pra yacchata ta ihorjaṁ dadhāta ||

10.015.08a ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
10.015.08c तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥

10.015.08a ye naḥ pūrve pitaraḥ somyāso 'nūhire somapīthaṁ vasiṣṭhāḥ |
10.015.08c tebhir yamaḥ saṁrarāṇo havīṁṣy uśann uśadbhiḥ pratikāmam attu ||

10.015.09a ये तातृषुर्देवत्रा जेहमाना होत्राविद स्तोमतष्टासो अर्कैः ।
10.015.09c आग्ने याहि सुविदत्रेभिरर्वाङ्सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥

10.015.09a ye tātṛṣur devatrā jehamānā hotrāvida stomataṣṭāso arkaiḥ |
10.015.09c āgne yāhi suvidatrebhir arvāṅ satyaiḥ kavyaiḥ pitṛbhir gharmasadbhiḥ ||

10.015.10a ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
10.015.10c आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥

10.015.10a ye satyāso havirado haviṣpā indreṇa devaiḥ sarathaṁ dadhānāḥ |
10.015.10c āgne yāhi sahasraṁ devavandaiḥ paraiḥ pūrvaiḥ pitṛbhir gharmasadbhiḥ ||

10.015.11a अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
10.015.11c अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥

10.015.11a agniṣvāttāḥ pitara eha gacchata sadaḥ-sadaḥ sadata supraṇītayaḥ |
10.015.11c attā havīṁṣi prayatāni barhiṣy athā rayiṁ sarvavīraṁ dadhātana ||

10.015.12a त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
10.015.12c प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥

10.015.12a tvam agna īḻito jātavedo 'vāḍ ḍhavyāni surabhīṇi kṛtvī |
10.015.12c prādāḥ pitṛbhyaḥ svadhayā te akṣann addhi tvaṁ deva prayatā havīṁṣi ||

10.015.13a ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म ।

10.015.13c त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥

10.015.13a ye ceha pitaro ye ca neha yāṁś ca vidma yāṁ u ca na pravidma |
10.015.13c tvaṁ vettha yati te jātavedaḥ svadhābhir yajñaṁ sukṛtaṁ juṣasva ||

10.015.14a ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।

10.015.14c तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥

10.015.14a ye agnidagdhā ye anagnidagdhā madhye divaḥ svadhayā mādayante |
10.015.14c tebhiḥ svarāḷ asunītim etāṁ yathāvaśaṁ tanvaṁ kalpayasva ||

10.016.01a मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम् ।

10.016.01c यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः ॥

10.016.01a mainam agne vi daho mābhi śoco māsya tvacaṁ cikṣipo mā śarīram |
10.016.01c yadā śṛtaṁ kṛṇavo jātavedo 'them enam pra hiṇutāt pitṛbhyaḥ ||

10.016.02a शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः ।

10.016.02c यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥

10.016.02a śṛtaṁ yadā karasi jātavedo 'them enam pari dattāt pitṛbhyaḥ |
10.016.02c yadā gacchāty asunītim etām athā devānāṁ vaśanīr bhavāti ||

10.016.03a सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।

10.016.03c अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥

10.016.03a sūryaṁ cakṣur gacchatu vātam ātmā dyāṁ ca gaccha pṛthivīṁ ca dharmaṇā |
10.016.03c apo vā gaccha yadi tatra te hitam oṣadhīṣu prati tiṣṭhā śarīraiḥ ||

10.016.04a अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।

10.016.04c यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥

10.016.04a ajo bhāgas tapasā taṁ tapasva taṁ te śocis tapatu taṁ te arciḥ |
10.016.04c yās te śivās tanvo jātavedas tābhir vahainaṁ sukṛtām u lokam ||

10.016.05a अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ।

10.016.05c आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ॥

10.016.05a ava sṛja punar agne pitṛbhyo yas ta āhutaś carati svadhābhiḥ |
10.016.05c āyur vasāna upa vetu śeṣaḥ saṁ gacchatāṁ tanvā jātavedaḥ ||

10.016.06a यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।

10.016.06c अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥

10.016.06a yat te kṛsṇaḥ śakuna ātutoda pipīlaḥ sarpa uta vā śvāpadaḥ |
10.016.06c agniṣ ṭad viśvād agadaṁ kṛṇotu somaś ca yo brāhmaṇāṁ̐ āviveśa ||

10.016.07a अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च ।

10.016.07c नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यङ्खयाते ॥

10.016.07a agner varma pari gobhir vyayasva sam prorṇuṣva pīvasā medasā ca |
10.016.07c net tvā dhṛṣṇur harasā jarhṛṣāṇo dadhṛg vidhakṣyan paryaṅkhayāte ||

10.016.08a इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।

10.016.08c एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते ॥

10.016.08a imam agne camasam mā vi jihvaraḥ priyo devānām uta somyānām |
10.016.08c eṣa yaś camaso devapānas tasmin devā amṛtā mādayante ||

10.016.09a क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।

10.016.09c इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥

10.016.09a kravyādam agnim pra hiṇomi dūraṁ yamarājño gacchatu ripravāhaḥ |
10.016.09c ihaivāyam itaro jātavedā devebhyo havyaṁ vahatu prajānan ||

10.016.10a यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम् ।

10.016.10c तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे ॥

10.016.10a yo agniḥ kravyāt praviveśa vo gṛham imam paśyann itaraṁ jātavedasam |
10.016.10c taṁ harāmi pitṛyajñāya devaṁ sa gharmam invāt parame sadhasthe ||

10.016.11a यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः ।

10.016.11c प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥

10.016.11a yo agniḥ kravyavāhanaḥ pitṝn yakṣad ṛtāvṛdhaḥ |
10.016.11c pred u havyāni vocati devebhyaś ca pitṛbhya ā ||

10.016.12a उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।

10.016.12c उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥

10.016.12a uśantas tvā ni dhīmahy uśantaḥ sam idhīmahi |
10.016.12c uśann uśata ā vaha pitṝn haviṣe attave ||

10.016.13a यं त्वमग्ने समदहस्तमु निर्वापया पुनः ।

10.016.13c कियाम्ब्वत्र रोहतु पाकदूर्वा व्यल्कशा ॥

10.016.13a yaṁ tvam agne samadahas tam u nir vāpayā punaḥ |
10.016.13c kiyāmbv atra rohatu pākadūrvā vyalkaśā ||

10.016.14a शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।

10.016.14c मण्डूक्या३ सु सं गम इमं स्वग्निं हर्षय ॥

10.016.14a śītike śītikāvati hlādike hlādikāvati |
10.016.14c maṇḍūkyā3 su saṁ gama imaṁ sv a1gniṁ harṣaya ||

10.017.01a त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।

10.017.01c यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥

10.017.01a tvaṣṭā duhitre vahatuṁ kṛṇotītīdaṁ viśvam bhuvanaṁ sam eti |
10.017.01c yamasya mātā paryuhyamānā maho jāyā vivasvato nanāśa ||

10.017.02a अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते ।

10.017.02c उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥

10.017.02a apāgūhann amṛtām martyebhyaḥ kṛtvī savarṇām adadur vivasvate |
10.017.02c utāśvināv abharad yat tad āsīd ajahād u dvā mithunā saraṇyūḥ ||

10.017.03a पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।

10.017.03c स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥

10.017.03a pūṣā tvetaś cyāvayatu pra vidvān anaṣṭapaśur bhuvanasya gopāḥ |
10.017.03c sa tvaitebhyaḥ pari dadat pitṛbhyo 'gnir devebhyaḥ suvidatriyebhyaḥ ||

10.017.04a आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।

10.017.04c यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥

10.017.04a āyur viśvāyuḥ pari pāsati tvā pūṣā tvā pātu prapathe purastāt |
10.017.04c yatrāsate sukṛto yatra te yayus tatra tvā devaḥ savitā dadhātu ||

10.017.05a पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।

10.017.05c स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥

10.017.05a pūṣemā āśā anu veda sarvāḥ so asmām̐ abhayatamena neṣat |
10.017.05c svastidā āghṛṇiḥ sarvavīro 'prayucchan pura etu prajānan ||

10.017.06a प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।

10.017.06c उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥

10.017.06a prapathe pathām ajaniṣṭa pūṣā prapathe divaḥ prapathe pṛthivyāḥ |
10.017.06c ubhe abhi priyatame sadhasthe ā ca parā ca carati prajānan ||

10.017.07a सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।

10.017.07c सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥

10.017.07a sarasvatīṁ devayanto havante sarasvatīm adhvare tāyamāne |
10.017.07c sarasvatīṁ sukṛto ahvayanta sarasvatī dāśuṣe vāryaṁ dāt ||

10.017.08a सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदन्ती ।

10.017.08c आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥

10.017.08a sarasvati yā sarathaṁ yayātha svadhābhir devi pitṛbhir madantī |
10.017.08c āsadyāsmin barhiṣi mādayasvānamīvā iṣa ā dhehy asme ||

10.017.09a सरस्वतीं यां पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।

10.017.09c सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ॥

10.017.09a sarasvatīṁ yām pitaro havante dakṣiṇā yajñam abhinakṣamāṇāḥ |
10.017.09c sahasrārgham iḷo atra bhāgaṁ rāyas poṣaṁ yajamāneṣu dhehi ||

10.017.10a आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।

10.017.10c विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥

10.017.10a āpo asmān mātaraḥ śundhayantu ghṛtena no ghṛtapvaḥ punantu |

10.017.10c viśvaṁ hi ripram pravahanti devīr ud id ābhyaḥ śucir ā pūta emi ||

10.017.11a द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः ।

10.017.11c समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥

10.017.11a drapsaś caskanda prathamām̐ anu dyūn imaṁ ca yonim anu yaś ca pūrvaḥ |
10.017.11c samānaṁ yonim anu sañcarantaṁ drapsaṁ juhomy anu sapta hotrāḥ ||

10.017.12a यस्ते द्रप्स स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।

10.017.12c अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतम् ॥

10.017.12a yas te drapsa skandati yas te aṁśur bāhucyuto dhiṣaṇāyā upasthāt |
10.017.12c adhvaryor vā pari vā yaḥ pavitrāt taṁ te juhomi manasā vaṣaṭkṛtam ||

10.017.13a यस्ते द्रप्स स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा ।

10.017.13c अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे ॥

10.017.13a yas te drapsa skanno yas te aṁśur avaś ca yaḥ paraḥ srucā |
10.017.13c ayaṁ devo bṛhaspatiḥ saṁ taṁ siñcatu rādhase ||

10.017.14a पयस्वतीरोषधयः पयस्वन्मामकं वचः ।

10.017.14c अपां पयस्वदित्पयस्तेन मा सह शुन्धत ॥

10.017.14a payasvatīr oṣadhayaḥ payasvan māmakaṁ vacaḥ |
10.017.14c apām payasvad it payas tena mā saha śundhata ||

10.018.01a परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् ।

10.018.01c चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥

10.018.01a param mṛtyo anu parehi panthāṁ yas te sva itaro devayānāt |
10.018.01c cakṣuṣmate śṛṇvate te bravīmi mā naḥ prajāṁ rīriṣo mota vīrān ||

10.018.02a मृत्योः पदं योपयन्तो यदैत द्राघीय आयुः प्रतरं दधानाः ।

10.018.02c आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥

10.018.02a mṛtyoḥ padaṁ yopayanto yad aita drāghīya āyuḥ prataraṁ dadhānāḥ |
10.018.02c āpyāyamānāḥ prajayā dhanena śuddhāḥ pūtā bhavata yajñiyāsaḥ ||

10.018.03a इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य ।

10.018.03c प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥

10.018.03a ime jīvā vi mṛtair āvavṛtrann abhūd bhadrā devahūtir no adya |
10.018.03c prāñco agāma nṛtaye hasāya drāghīya āyuḥ prataraṁ dadhānāḥ ||

10.018.04a इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।

10.018.04c शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥

10.018.04a imaṁ jīvebhyaḥ paridhiṁ dadhāmi maiṣāṁ nu gād aparo artham etam |
10.018.04c śataṁ jīvantu śaradaḥ purūcīr antar mṛtyuṁ dadhatām parvatena ||

10.018.05a यथाहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु ।

10.018.05c यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम् ॥

10.018.05a yathāhāny anupūrvam bhavanti yatha ṛtava ṛtubhir yanti sādhu |
10.018.05c yathā na pūrvam aparo jahāty evā dhātar āyūṁṣi kalpayaiṣām ||

10.018.06a आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।

10.018.06c इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥

10.018.06a ā rohatāyur jarasaṁ vṛṇānā anupūrvaṁ yatamānā yati ṣṭha |
10.018.06c iha tvaṣṭā sujanimā sajoṣā dīrgham āyuḥ karati jīvase vaḥ ||

10.018.07a इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु ।

10.018.07c अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥

10.018.07a imā nārīr avidhavāḥ supatnīr āñjanena sarpiṣā saṁ viśantu |
10.018.07c anaśravo 'namīvāḥ suratnā ā rohantu janayo yonim agre ||

10.018.08a उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।

10.018.08c हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥

10.018.08a ud īrṣva nāry abhi jīvalokaṁ gatāsum etam upa śeṣa ehi |
10.018.08c hastagrābhasya didhiṣos tavedam patyur janitvam abhi sam babhūtha ||

10.018.09a धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।

10.018.09c अत्रैव त्वमिह वयं सुवीरा विश्वा स्पृधो अभिमातीर्जयेम ॥

10.018.09a dhanur hastād ādadāno mṛtasyāsme kṣatrāya varcase balāya |
10.018.09c atraiva tvam iha vayaṁ suvīrā viśvā spṛdho abhimātīr jayema ||

10.018.10a उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।

10.018.10c ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निरृतेरुपस्थात् ॥

10.018.10a upa sarpa mātaram bhūmim etām uruvyacasam pṛthivīṁ suśevām |
10.018.10c ūrṇamradā yuvatir dakṣiṇāvata eṣā tvā pātu nirṛter upasthāt ||

10.018.11a उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।

10.018.11c माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥

10.018.11a uc chvañcasva pṛthivi mā ni bādhathāḥ sūpāyanāsmai bhava sūpavañcanā |
10.018.11c mātā putraṁ yathā sicābhy enam bhūma ūrṇuhi ||

10.018.12a उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।

10.018.12c ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र ॥

10.018.12a ucchvañcamānā pṛthivī su tiṣṭhatu sahasram mita upa hi śrayantām |
10.018.12c te gṛhāso ghṛtaścuto bhavantu viśvāhāsmai śaraṇāḥ santv atra ||

10.018.13a उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।

10.018.13c एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु ॥

10.018.13a ut te stabhnāmi pṛthivīṁ tvat parīmaṁ logaṁ nidadhan mo ahaṁ riṣam |
10.018.13c etāṁ sthūṇām pitaro dhārayantu te 'trā yamaḥ sādanā te minotu ||

10.018.14a प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः ।

10.018.14c प्रतीचीं जग्रभा वाचमश्वं रशनया यथा ॥

10.018.14a pratīcīne mām ahanīṣvāḥ parṇam ivā dadhuḥ |
10.018.14c pratīcīm jagrabhā vācam aśvaṁ raśanayā yathā ||

10.019.01a नि वर्तध्वं मानु गातास्मान्सिषक्त रेवतीः ।

10.019.01c अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् ॥

10.019.01a ni vartadhvam mānu gātāsmān siṣakta revatīḥ |
10.019.01c agnīṣomā punarvasū asme dhārayataṁ rayim ||

10.019.02a पुनरेना नि वर्तय पुनरेना न्या कुरु ।

10.019.02c इन्द्र एणा नि यच्छत्वग्निरेना उपाजतु ॥

10.019.02a punar enā ni vartaya punar enā ny ā kuru |
10.019.02c indra eṇā ni yacchatv agnir enā upājatu ||

10.019.03a पुनरेता नि वर्तन्तामस्मिन्पुष्यन्तु गोपतौ ।

10.019.03c इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥

10.019.03a punar etā ni vartantām asmin puṣyantu gopatau |
10.019.03c ihaivāgne ni dhārayeha tiṣṭhatu yā rayiḥ ||

10.019.04a यन्नियानं न्ययनं संज्ञानं यत्परायणम् ।

10.019.04c आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥

10.019.04a yan niyānaṁ nyayanaṁ sañjñānaṁ yat parāyaṇam |
10.019.04c āvartanaṁ nivartanaṁ yo gopā api taṁ huve ||

10.019.05a य उदानड्व्ययनं य उदानट् परायणम् ।

10.019.05c आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ॥

10.019.05a ya udānaḍ vyayanaṁ ya udānaṭ parāyaṇam |
10.019.05c āvartanaṁ nivartanam api gopā ni vartatām ||

10.019.06a आ निवर्त नि वर्तय पुनर्न इन्द्र गा देहि ।

10.019.06c जीवाभिर्भुनजामहै ॥

10.019.06a ā nivarta ni vartaya punar na indra gā dehi |
10.019.06c jīvābhir bhunajāmahai ||

10.019.07a परि वो विश्वतो दध ऊर्जा घृतेन पयसा ।

10.019.07c ये देवाः के च यज्ञियास्ते रय्या सं सृजन्तु नः ॥

10.019.07a pari vo viśvato dadha ūrjā ghṛtena payasā |
10.019.07c ye devāḥ ke ca yajñiyās te rayyā saṁ sṛjantu naḥ ||

10.019.08a आ निवर्तन वर्तय नि निवर्तन वर्तय ।

10.019.08c भूम्याश्चतस्रः प्रदिशस्ताभ्य एना नि वर्तय ॥

10.019.08a ā nivartana vartaya ni nivartana vartaya |
10.019.08c bhūmyāś catasraḥ pradiśas tābhya enā ni vartaya ||

10.020.01a भद्रं नो अपि वातय मनः ॥

10.020.01a bhadraṁ no api vātaya manaḥ ||

10.020.02a अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम् ।

10.020.02c यस्य धर्मन्स्व१रेनीः सपर्यन्ति मातुरूधः ॥

10.020.02a agnim īḻe bhujām yaviṣṭhaṁ śāsā mitraṁ durdharītum |
10.020.02c yasya dharman sva1r enīḥ saparyanti mātur ūdhaḥ ||

10.020.03a यमासा कृपनीळं भासाकेतुं वर्धयन्ति ।

10.020.03c भ्राजते श्रेणिदन् ॥

10.020.03a yam āsā kṛpanīḻam bhāsāketuṁ vardhayanti |
10.020.03c bhrājate śreṇidan ||

10.020.04a अर्यो विशां गातुरेति प्र यदानड्दिवो अन्तान् ।

10.020.04c कविरभ्रं दीद्यानः ॥

10.020.04a aryo viśāṁ gātur eti pra yad ānaḍ divo antān |
10.020.04c kavir abhraṁ dīdyānaḥ ||

10.020.05a जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे ।

10.020.05c मिन्वन्सद्म पुर एति ॥

10.020.05a juṣad dhavyā mānuṣasyordhvas tasthāv ṛbhvā yajñe |
10.020.05c minvan sadma pura eti ||

10.020.06a स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति ।

10.020.06c अग्निं देवा वाशीमन्तम् ॥

10.020.06a sa hi kṣemo havir yajñaḥ śruṣṭīd asya gātur eti |

10.020.06c agniṁ devā vāśīmantam ||

10.020.07a यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य ।

10.020.07c अद्रेः सूनुमायुमाहुः ॥

10.020.07a yajñāsāhaṁ duva iṣe 'gnim pūrvasya śevasya |
10.020.07c adreḥ sūnum āyum āhuḥ ||

10.020.08a नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः ।

10.020.08c अग्निं हविषा वर्धन्तः ॥

10.020.08a naro ye ke cāsmad ā viśvet te vāma ā syuḥ |
10.020.08c agniṁ haviṣā vardhantaḥ ||

10.020.09a कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।

10.020.09c हिरण्यरूपं जनिता जजान ॥

10.020.09a kṛṣṇaḥ śveto 'ruṣo yāmo asya bradhna ṛjra uta śoṇo yaśasvān |
10.020.09c hiraṇyarūpaṁ janitā jajāna ||

10.020.10a एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः ।

10.020.10c गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः ॥

10.020.10a evā te agne vimado manīṣām ūrjo napād amṛtebhiḥ sajoṣāḥ |
10.020.10c gira ā vakṣat sumatīr iyāna iṣam ūrjaṁ sukṣitiṁ viśvam ābhāḥ ||

10.021.01a आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।

10.021.01c यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥

10.021.01a āgniṁ na svavṛktibhir hotāraṁ tvā vṛṇīmahe |
10.021.01c yajñāya stīrṇabarhiṣe vi vo made śīram pāvakaśociṣaṁ vivakṣase ||

10.021.02a त्वामु ते स्वाभुवः शुम्भन्त्यश्वराधसः ।

10.021.02c वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥

10.021.02a tvām u te svābhuvaḥ śumbhanty aśvarādhasaḥ |
10.021.02c veti tvām upasecanī vi vo mada ṛjītir agna āhutir vivakṣase ||

10.021.03a त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव ।

10.021.03c कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥

10.021.03a tve dharmāṇa āsate juhūbhiḥ siñcatīr iva |
10.021.03c kṛṣṇā rūpāṇy arjunā vi vo made viśvā adhi śriyo dhiṣe vivakṣase ||

10.021.04a यमग्ने मन्यसे रयिं सहसावन्नमर्त्य ।

10.021.04c तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे ॥

10.021.04a yam agne manyase rayiṁ sahasāvann amartya |
10.021.04c tam ā no vājasātaye vi vo made yajñeṣu citram ā bharā vivakṣase ||

10.021.05a अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या ।

10.021.05c भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥

10.021.05a agnir jāto atharvaṇā vidad viśvāni kāvyā |
10.021.05c bhuvad dūto vivasvato vi vo made priyo yamasya kāmyo vivakṣase ||

10.021.06a त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे ।

10.021.06c त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे ॥

10.021.06a tvāṁ yajñeṣv īḷate 'gne prayaty adhvare |
10.021.06c tvaṁ vasūni kāmyā vi vo made viśvā dadhāsi dāśuṣe vivakṣase ||

10.021.07a त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे ।

10.021.07c घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्षभिर्विवक्षसे ॥

10.021.07a tvāṁ yajñeṣv ṛtvijaṁ cārum agne ni ṣedire |
10.021.07c ghṛtapratīkam manuṣo vi vo made śukraṁ cetiṣṭham akṣabhir vivakṣase ||

10.021.08a अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत् ।

10.021.08c अभिक्रन्दन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे ॥

10.021.08a agne śukreṇa śociṣoru prathayase bṛhat |
10.021.08c abhikrandan vṛṣāyase vi vo made garbhaṁ dadhāsi jāmiṣu vivakṣase ||

10.022.01a कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते ।

10.022.01c ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा ॥

10.022.01a kuha śruta indraḥ kasminn adya jane mitro na śrūyate |
10.022.01c ṛṣīṇāṁ vā yaḥ kṣaye guhā vā carkṛṣe girā ||

10.022.02a इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः ।

10.022.02c मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥

10.022.02a iha śruta indro asme adya stave vajry ṛcīṣamaḥ |
10.022.02c mitro na yo janeṣv ā yaśaś cakre asāmy ā ||

10.022.03a महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।

10.022.03c भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियम् ॥

10.022.03a maho yas patiḥ śavaso asāmy ā maho nṛmṇasya tūtujiḥ |
10.022.03c bhartā vajrasya dhṛṣṇoḥ pitā putram iva priyam ||

10.022.04a युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः ।

10.022.04c स्यन्ता पथा विरुक्मता सृजान स्तोष्यध्वनः ॥

10.022.04a yujāno aśvā vātasya dhunī devo devasya vajrivaḥ |
10.022.04c syantā pathā virukmatā sṛjāna stoṣy adhvanaḥ ||

10.022.05a त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै ।

10.022.05c ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः ॥

10.022.05a tvaṁ tyā cid vātasyāśvāgā ṛjrā tmanā vahadhyai |
10.022.05c yayor devo na martyo yantā nakir vidāyyaḥ ||

10.022.06a अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम् ।

10.022.06c आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्यम् ॥

10.022.06a adha gmantośanā pṛcchate vāṁ kadarthā na ā gṛham |
10.022.06c ā jagmathuḥ parākād divaś ca gmaś ca martyam ||

10.022.07a आ न इन्द्र पृक्षसेऽस्माकं ब्रह्मोद्यतम् ।

10.022.07c तत्त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषम् ॥

10.022.07a ā na indra pṛkṣase 'smākam brahmodyatam |

10.022.07c tat tvā yācāmahe 'vaḥ śuṣṇaṁ yad dhann amānuṣam ||

10.022.08a अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः ।

10.022.08c त्वं तस्यामित्रहन्वधर्दासस्य दम्भय ॥

10.022.08a akarmā dasyur abhi no amantur anyavrato amānuṣaḥ |
10.022.08c tvaṁ tasyāmitrahan vadhar dāsasya dambhaya ||

10.022.09a त्वं न इन्द्र शूर शूरैरुत त्वोतासो बर्हणा ।

10.022.09c पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयो यथा ॥

10.022.09a tvaṁ na indra śūra śūrair uta tvotāso barhaṇā |
10.022.09c purutrā te vi pūrtayo navanta kṣoṇayo yathā ||

10.022.10a त्वं तान्वृत्रहत्ये चोदयो नॄन्कार्पाणे शूर वज्रिवः ।

10.022.10c गुहा यदी कवीनां विशां नक्षत्रशवसाम् ॥

10.022.10a tvaṁ tān vṛtrahatye codayo nṝn kārpāṇe śūra vajrivaḥ |
10.022.10c guhā yadī kavīnāṁ viśāṁ nakṣatraśavasām ||

10.022.11a मक्षू ता त इन्द्र दानाप्नस आक्षाणे शूर वज्रिवः ।

10.022.11c यद्ध शुष्णस्य दम्भयो जातं विश्वं सयावभिः ॥

10.022.11a makṣū tā ta indra dānāpnasa ākṣāṇe śūra vajrivaḥ |
10.022.11c yad dha śuṣṇasya dambhayo jātaṁ viśvaṁ sayāvabhiḥ ||

10.022.12a माकुध्र्यगिन्द्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।

10.022.12c वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥

10.022.12a mākudhryag indra śūra vasvīr asme bhūvann abhiṣṭayaḥ |
10.022.12c vayaṁ-vayaṁ ta āsāṁ sumne syāma vajrivaḥ ||

10.022.13a अस्मे ता त इन्द्र सन्तु सत्याहिंसन्तीरुपस्पृशः ।

10.022.13c विद्याम यासां भुजो धेनूनां न वज्रिवः ॥

10.022.13a asme tā ta indra santu satyāhiṁsantīr upaspṛśaḥ |
10.022.13c vidyāma yāsām bhujo dhenūnāṁ na vajrivaḥ ||

10.022.14a अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानाम् ।

10.022.14c शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥

10.022.14a ahastā yad apadī vardhata kṣāḥ śacībhir vedyānām |
10.022.14c śuṣṇam pari pradakṣiṇid viśvāyave ni śiśnathaḥ ||

10.022.15a पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन् ।

10.022.15c उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥

10.022.15a pibā-pibed indra śūra somam mā riṣaṇyo vasavāna vasuḥ san |
10.022.15c uta trāyasva gṛṇato maghono mahaś ca rāyo revatas kṛdhī naḥ ||

10.023.01a यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं१ विव्रतानाम् ।

10.023.01c प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥

10.023.01a yajāmaha indraṁ vajradakṣiṇaṁ harīṇāṁ rathyaṁ1 vivratānām |
10.023.01c pra śmaśru dodhuvad ūrdhvathā bhūd vi senābhir dayamāno vi rādhasā ||

10.023.02a हरी न्वस्य या वने विदे वस्विन्द्रो मघैर्मघवा वृत्रहा भुवत् ।

10.023.02c ऋभुर्वाज ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम चित् ॥

10.023.02a harī nv asya yā vane vide vasv indro maghair maghavā vṛtrahā bhuvat |
10.023.02c ṛbhur vāja ṛbhukṣāḥ patyate śavo 'va kṣṇaumi dāsasya nāma cit ||

10.023.03a यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः ।

10.023.03c आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः ॥

10.023.03a yadā vajraṁ hiraṇyam id athā rathaṁ harī yam asya vahato vi sūribhiḥ |
10.023.03c ā tiṣṭhati maghavā sanaśruta indro vājasya dīrghaśravasas patiḥ ||

10.023.04a सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते ।

10.023.04c अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनम् ॥

10.023.04a so cin nu vṛṣṭir yūthyā3 svā sacām̐ indraḥ śmaśrūṇi haritābhi pruṣṇute |
10.023.04c ava veti sukṣayaṁ sute madhūd id dhūnoti vāto yathā vanam ||

10.023.05a यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।

10.023.05c तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः ॥

10.023.05a yo vācā vivāco mṛdhravācaḥ purū sahasrāśivā jaghāna |
10.023.05c tat-tad id asya pauṁsyaṁ gṛṇīmasi piteva yas taviṣīṁ vāvṛdhe śavaḥ ||

10.023.06a स्तोमं त इन्द्र विमदा अजीजनन्नपूर्व्यं पुरुतमं सुदानवे ।

10.023.06c विद्मा ह्यस्य भोजनमिनस्य यदा पशुं न गोपाः करामहे ॥

10.023.06a stomaṁ ta indra vimadā ajījanann apūrvyam purutamaṁ sudānave |
10.023.06c vidmā hy asya bhojanam inasya yad ā paśuṁ na gopāḥ karāmahe ||

10.023.07a माकिर्न एना सख्या वि यौषुस्तव चेन्द्र विमदस्य च ऋषेः ।

10.023.07c विद्मा हि ते प्रमतिं देव जामिवदस्मे ते सन्तु सख्या शिवानि ॥

10.023.07a mākir na enā sakhyā vi yauṣus tava cendra vimadasya ca ṛṣeḥ |
10.023.07c vidmā hi te pramatiṁ deva jāmivad asme te santu sakhyā śivāni ||

10.024.01a इन्द्र सोममिमं पिब मधुमन्तं चमू सुतम् ।

10.024.01c अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे ॥

10.024.01a indra somam imam piba madhumantaṁ camū sutam |
10.024.01c asme rayiṁ ni dhāraya vi vo made sahasriṇam purūvaso vivakṣase ||

10.024.02a त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे ।

10.024.02c शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥

10.024.02a tvāṁ yajñebhir ukthair upa havyebhir īmahe |
10.024.02c śacīpate śacīnāṁ vi vo made śreṣṭhaṁ no dhehi vāryaṁ vivakṣase ||

10.024.03a यस्पतिर्वार्याणामसि रध्रस्य चोदिता ।

10.024.03c इन्द्र स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥

10.024.03a yas patir vāryāṇām asi radhrasya coditā |
10.024.03c indra stotṝṇām avitā vi vo made dviṣo naḥ pāhy aṁhaso vivakṣase ||

10.024.04a युवं शक्रा मायाविना समीची निरमन्थतम् ।

10.024.04c विमदेन यदीळिता नासत्या निरमन्थतम् ॥

10.024.04a yuvaṁ śakrā māyāvinā samīcī nir amanthatam |
10.024.04c vimadena yad īḷitā nāsatyā niramanthatam ||

10.024.05a विश्वे देवा अकृपन्त समीच्योर्निष्पतन्त्योः ।

10.024.05c नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥

10.024.05a viśve̍ de̱vā a̍kṛpanta samī̱cyor ni̱ṣpata̍ntyoḥ |
10.024.05c nāsa̍tyāv abruvan de̱vāḥ puna̱r ā va̍hatā̱d iti̍ ||

10.024.06a मधुमन्मे परायणं मधुमत्पुनरायनम् ।

10.024.06c ता नो देवा देवतया युवं मधुमतस्कृतम् ॥

10.024.06a madhu̍man me pa̱rāya̍ṇa̱m madhu̍ma̱t puna̱r āya̍nam |
10.024.06c tā no̍ devā de̱vata̍yā yu̱vam madhu̍matas kṛtam ||

10.025.01a भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।

10.025.01c अधा ते सख्ये अन्धसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥

10.025.01a bha̱draṁ no̱ api̍ vātaya̱ mano̱ dakṣa̍m u̱ta kratu̍m |
10.025.01c adhā̍ te sa̱khye andha̍so̱ vi vo̱ made̱ raṇa̱n gāvo̱ na yava̍se̱ viva̍kṣase ||

10.025.02a हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।

10.025.02c अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे ॥

10.025.02a hṛ̱di̱spṛśa̍s ta āsate̱ viśve̍ṣu soma̱ dhāma̍su |
10.025.02c adhā̱ kāmā̍ i̱me mama̱ vi vo̱ made̱ vi ti̍ṣṭhante vasū̱yavo̱ viva̍kṣase ||

10.025.03a उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।

10.025.03c अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥

10.025.03a u̱ta vra̱tāni̍ soma te̱ prāham mi̍nāmi pā̱kyā̍ |
10.025.03c adhā̍ pi̱teva̍ sū̱nave̱ vi vo̱ made̍ mṛ̱ḷā no̍ a̱bhi ci̍d va̱dhād viva̍kṣase ||

10.025.04a समु प्र यन्ति धीतयः सर्गासोऽवताँ इव ।

10.025.04c क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ॥

10.025.04a sam u̱ pra ya̍nti dhī̱taya̱ḥ sargā̍so 'va̱tām̐ iva |
10.025.04c kratu̍ṁ naḥ soma jī̱vase̱ vi vo̱ made̍ dhā̱rayā̍ cama̱sām̐ iva̱ viva̍kṣase ||

10.025.05a तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे ।

10.025.05c गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे ॥

10.025.05a tava tye soma śaktibhir nikāmāso vy ṛṇvire |
10.025.05c gṛtsasya dhīrās tavaso vi vo made vrajaṁ gomantam aśvinaṁ vivakṣase ||

10.025.06a पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।

10.025.06c समाकृणोषि जीवसे वि वो मदे विश्वा सम्पश्यन्भुवना विवक्षसे ॥

10.025.06a paśuṁ naḥ soma rakṣasi purutrā viṣṭhitaṁ jagat |
10.025.06c samākṛṇoṣi jīvase vi vo made viśvā sampaśyan bhuvanā vivakṣase ||

10.025.07a त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।

10.025.07c सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥

10.025.07a tvaṁ naḥ soma viśvato gopā adābhyo bhava |
10.025.07c sedha rājann apa sridho vi vo made mā no duḥśaṁsa īśatā vivakṣase ||

10.025.08a त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।

10.025.08c क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ॥

10.025.08a tvaṁ naḥ soma sukratur vayodheyāya jāgṛhi |
10.025.08c kṣetravittaro manuṣo vi vo made druho naḥ pāhy aṁhaso vivakṣase ||

10.025.09a त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा ।

10.025.09c यत्सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ॥

10.025.09a tvaṁ no vṛtrahantamendrasyendo śivaḥ sakhā |
10.025.09c yat sīṁ havante samithe vi vo made yudhyamānās tokasātau vivakṣase ||

10.025.10a अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।

10.025.10c अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे ॥

10.025.10a ayaṁ gha sa turo mada indrasya vardhata priyaḥ |
10.025.10c ayaṁ kakṣīvato maho vi vo made matiṁ viprasya vardhayad vivakṣase ||

10.025.11a अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।

10.025.11c अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे ॥

10.025.11a ayaṁ viprāya dāśuṣe vājām̐ iyarti gomataḥ |

10.025.11c ayaṁ saptabhya ā varaṁ vi vo made prāndhaṁ śroṇaṁ ca tāriṣad vivakṣase ||

10.026.01a प्र ह्यच्छा मनीषा स्पार्हा यन्ति नियुतः ।

10.026.01c प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः ॥

10.026.01a pra hy acchā manīṣā spārhā yanti niyutaḥ |
10.026.01c pra dasrā niyudrathaḥ pūṣā aviṣṭu māhinaḥ ||

10.026.02a यस्य त्यन्महित्वं वाताप्यमयं जनः ।

10.026.02c विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् ॥

10.026.02a yasya tyan mahitvaṁ vātāpyam ayaṁ janaḥ |
10.026.02c vipra ā vaṁsad dhītibhiś ciketa suṣṭutīnām ||

10.026.03a स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा ।

10.026.03c अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ॥

10.026.03a sa veda suṣṭutīnām indur na pūṣā vṛṣā |
10.026.03c abhi psuraḥ pruṣāyati vrajaṁ na ā pruṣāyati ||

10.026.04a मंसीमहि त्वा वयमस्माकं देव पूषन् ।

10.026.04c मतीनां च साधनं विप्राणां चाधवम् ॥

10.026.04a maṁsīmahi tvā vayam asmākaṁ deva pūṣan |
10.026.04c matīnāṁ ca sādhanaṁ viprāṇāṁ cādhavam ||

10.026.05a प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम् ।

10.026.05c ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥

10.026.05a pratyardhir yajñānām aśvahayo rathānām |
10.026.05c ṛṣiḥ sa yo manurhito viprasya yāvayatsakhaḥ ||

10.026.06a आधीषमाणायाः पतिः शुचायाश्च शुचस्य च ।

10.026.06c वासोवायोऽवीनामा वासांसि मर्मृजत् ॥

10.026.06a ādhīṣamāṇāyāḥ patiḥ śucāyāś ca śucasya ca |
10.026.06c vāsovāyo 'vīnām ā vāsāṁsi marmṛjat ||

10.026.07a इनो वाजानां पतिरिनः पुष्टीनां सखा ।

10.026.07c प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः ॥

10.026.07a ino vājānām patir inaḥ puṣṭīnāṁ sakhā |
10.026.07c pra śmaśru haryato dūdhod vi vṛthā yo adābhyaḥ ||

10.026.08a आ ते रथस्य पूषन्नजा धुरं ववृत्युः ।

10.026.08c विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥

10.026.08a ā te rathasya pūṣann ajā dhuraṁ vavṛtyuḥ |
10.026.08c viśvasyārthinaḥ sakhā sanojā anapacyutaḥ ||

10.026.09a अस्माकमूर्जा रथं पूषा अविष्टु माहिनः ।

10.026.09c भुवद्वाजानां वृध इमं नः शृणवद्धवम् ॥

10.026.09a asmākam ūrjā ratham pūṣā aviṣṭu māhinaḥ |
10.026.09c bhuvad vājānāṁ vṛdha imaṁ naḥ śṛṇavad dhavam ||

10.027.01a असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षम् ।

10.027.01c अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् ॥

10.027.01a asat su me jaritaḥ sābhivego yat sunvate yajamānāya śikṣam |
10.027.01c anāśīrdām aham asmi prahantā satyadhvṛtaṁ vṛjināyantam ābhum ||

10.027.02a यदीदहं युधये संनयान्यदेवयून्तन्वा३ शूशुजानान् ।

10.027.02c अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् ॥

10.027.02a yadīd ahaṁ yudhaye sannayāny adevayūn tanvā3 śūśujānān |
10.027.02c amā te tumraṁ vṛṣabham pacāni tīvraṁ sutam pañcadaśaṁ ni ṣiñcam ||

10.027.03a नाहं तं वेद य इति ब्रवीत्यदेवयून्समरणे जघन्वान् ।

10.027.03c यदावाख्यत्समरणमृघावदादिद्ध मे वृषभा प्र ब्रुवन्ति ॥

10.027.03a nāhaṁ taṁ veda ya iti bravīty adevayūn samaraṇe jaghanvān |
10.027.03c yadāvākhyat samaraṇam ṛghāvad ād id dha me vṛṣabhā pra bruvanti ||

10.027.04a यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।

10.027.04c जिनामि वेत्क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥

10.027.04a yad ajñāteṣu vṛjaneṣv āsaṁ viśve sato maghavāno ma āsan |
10.027.04c jināmi vet kṣema ā santam ābhum pra taṁ kṣiṇām parvate pādagṛhya ||

10.027.05a न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।

10.027.05c मम स्वनात्कृधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥

10.027.05a na vā u māṁ vṛjane vārayante na parvatāso yad aham manasye |
10.027.05c mama svanāt kṛdhukarṇo bhayāta eved anu dyūn kiraṇaḥ sam ejāt ||

10.027.06a दर्शन्न्वत्र शृतपाँ अनिन्द्रान्बाहुक्षदः शरवे पत्यमानान् ।

10.027.06c घृषुं वा ये निनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥

10.027.06a darśan nv atra śṛtapām̐ anindrān bāhukṣadaḥ śarave patyamānān |
10.027.06c ghṛṣuṁ vā ye niniduḥ sakhāyam adhy ū nv eṣu pavayo vavṛtyuḥ ||

10.027.07a अभूर्वौक्षीर्व्यु१ आयुरानड्दर्षन्नु पूर्वो अपरो नु दर्षत् ।

10.027.07c द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ॥

10.027.07a abhūr v aukṣīr vy u1 āyur ānaḍ darṣan nu pūrvo aparo nu darṣat |
10.027.07c dve pavaste pari taṁ na bhūto yo asya pāre rajaso viveṣa ||

10.027.08a गावो यवं प्रयुता अर्यो अक्षन्ता अपश्यं सहगोपाश्चरन्तीः ।

10.027.08c हवा इदर्यो अभितः समायन्कियदासु स्वपतिश्छन्दयाते ॥

10.027.08a gāvo yavam prayutā aryo akṣan tā apaśyaṁ sahagopāś carantīḥ |
10.027.08c havā id aryo abhitaḥ sam āyan kiyad āsu svapatiś chandayāte ||

10.027.09a सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अन्तः ।

10.027.09c अत्रा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान् ॥

10.027.09a saṁ yad vayaṁ yavasādo janānām ahaṁ yavāda urvajre antaḥ |
10.027.09c atrā yukto 'vasātāram icchād atho ayuktaṁ yunajad vavanvān ||

10.027.10a अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि ।

10.027.10c स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥

10.027.10a atred u me maṁsase satyam uktaṁ dvipāc ca yac catuṣpāt saṁsṛjāni |

10.027.10c strībhir yo atra vṛṣaṇam pṛtanyād ayuddho asya vi bhajāni vedaḥ ||

10.027.11a यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अन्धाम् ।

10.027.11c कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥

10.027.11a yasyānakṣā duhitā jātv āsa kas tāṁ vidvāṁ̐ abhi manyāte andhām |
10.027.11c kataro menim prati tam mucāte ya īṁ vahāte ya īṁ vā vareyāt ||

10.027.12a कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।

10.027.12c भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥

10.027.12a kiyatī yoṣā maryato vadhūyoḥ pariprītā panyasā vāryeṇa |
10.027.12c bhadrā vadhūr bhavati yat supeśāḥ svayaṁ sā mitraṁ vanute jane cit ||

10.027.13a पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।

10.027.13c आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम् ॥

10.027.13a patto jagāra pratyañcam atti śīrṣṇā śiraḥ prati dadhau varūtham |
10.027.13c āsīna ūrdhvām upasi kṣiṇāti nyaṅṅ uttānām anv eti bhūmim ||

10.027.14a बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।

10.027.14c अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ॥

10.027.14a bṛhann acchāyo apalāśo arvā tasthau mātā viṣito atti garbhaḥ |
10.027.14c anyasyā vatsaṁ rihatī mimāya kayā bhuvā ni dadhe dhenur ūdhaḥ ||

10.027.15a सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते ।

10.027.15c नव पश्चातात्स्थिविमन्त आयन्दश प्राक्सानु वि तिरन्त्यश्नः ॥

10.027.15a sapta vīrāso adharād ud āyann aṣṭottarāttāt sam ajagmiran te |
10.027.15c nava paścātāt sthivimanta āyan daśa prāk sānu vi tiranty aśnaḥ ||

10.027.16a दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।

10.027.16c गर्भं माता सुधितं वक्षणास्ववेनन्तं तुषयन्ती बिभर्ति ॥

10.027.16a daśānām ekaṁ kapilaṁ samānaṁ taṁ hinvanti kratave pāryāya |
10.027.16c garbham mātā sudhitaṁ vakṣaṇāsv avenantaṁ tuṣayantī bibharti ||

10.027.17a पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।

10.027.17c द्वा धनुं बृहतीमप्स्व१न्तः पवित्रवन्ता चरतः पुनन्ता ॥

10.027.17a pīvānam meṣam apacanta vīrā nyuptā akṣā anu dīva āsan |
10.027.17c dvā dhanum bṛhatīm apsv a1ntaḥ pavitravantā carataḥ punantā ||

10.027.18a वि क्रोशनासो विष्वञ्च आयन्पचाति नेमो नहि पक्षदर्धः ।

10.027.18c अयं मे देवः सविता तदाह द्र्वन्न इद्वनवत्सर्पिरन्नः ॥

10.027.18a vi krośanāso viṣvañca āyan pacāti nemo nahi pakṣad ardhaḥ |
10.027.18c ayam me devaḥ savitā tad āha drvanna id vanavat sarpirannaḥ ||

10.027.19a अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्तमानम् ।

10.027.19c सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥

10.027.19a apaśyaṁ grāmaṁ vahamānam ārād acakrayā svadhayā vartamānam |
10.027.19c siṣakty aryaḥ pra yugā janānāṁ sadyaḥ śiśnā pramināno navīyān ||

10.027.20a एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममन्धि ।

10.027.20c आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान् ॥

10.027.20a etau me gāvau pramarasya yuktau mo ṣu pra sedhīr muhur in mamandhi |
10.027.20c āpaś cid asya vi naśanty arthaṁ sūraś ca marka uparo babhūvān ||

10.027.21a अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात् ।

10.027.21c श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति ॥

10.027.21a ayaṁ yo vajraḥ purudhā vivṛtto 'vaḥ sūryasya bṛhataḥ purīṣāt |
10.027.21c śrava id enā paro anyad asti tad avyathī jarimāṇas taranti ||

10.027.22a वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः ।

10.027.22c अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् ॥

10.027.22a vṛkṣe-vṛkṣe niyatā mīmayad gaus tato vayaḥ pra patān pūruṣādaḥ |
10.027.22c athedaṁ viśvam bhuvanam bhayāta indrāya sunvad ṛṣaye ca śikṣat ||

10.027.23a देवानां माने प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन् ।

10.027.23c त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् ॥

10.027.23a devānām māne prathamā atiṣṭhan kṛntatrād eṣām uparā ud āyan |

10.027.23c trayas tapanti pṛthivīm anūpā dvā bṛbūkaṁ vahataḥ purīṣam ||

10.027.24a सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।

10.027.24c आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते ॥

10.027.24a sā te jīvātur uta tasya viddhi mā smaitādṛg apa gūhaḥ samarye |
10.027.24c āviḥ svaḥ kṛṇute gūhate busaṁ sa pādur asya nirṇijo na mucyate ||

10.028.01a विश्वो ह्यन्यो अरिराजगाम ममेदह श्वशुरो ना जगाम ।

10.028.01c जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥

10.028.01a viśvo hy a1nyo arir ājagāma mamed aha śvaśuro nā jagāma |
10.028.01c jakṣīyād dhānā uta somaṁ papīyāt svāśitaḥ punar astaṁ jagāyāt ||

10.028.02a स रोरुवद्वृषभस्तिग्मशृङ्गो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः ।

10.028.02c विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥

10.028.02a sa roruvad vṛṣabhas tigmaśṛṅgo varṣman tasthau varimann ā pṛthivyāḥ |
10.028.02c viśveṣv enaṁ vṛjaneṣu pāmi yo me kukṣī sutasomaḥ pṛṇāti ||

10.028.03a अद्रिणा ते मन्दिन इन्द्र तूयान्सुन्वन्ति सोमान्पिबसि त्वमेषाम् ।

10.028.03c पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः ॥

10.028.03a adriṇā te mandina indra tūyān sunvanti somān pibasi tvam eṣām |
10.028.03c pacanti te vṛṣabhāṁ̐ atsi teṣāṁ pṛkṣeṇa yan maghavan hūyamānaḥ ||

10.028.04a इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति ।

10.028.04c लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥

10.028.04a idaṁ su me jaritar ā cikiddhi pratīpaṁ śāpaṁ nadyo vahanti |
10.028.04c lopāśaḥ siṁham pratyañcam atsāḥ kroṣṭā varāhaṁ nir atakta kakṣāt ||

10.028.05a कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषाम् ।

10.028.05c त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन्क्षेम्या धूः ॥

10.028.05a kathā ta etad aham ā ciketaṁ gṛtsasya pākas tavaso manīṣām |
10.028.05c tvaṁ no vidvāṁ̐ ṛtuthā vi voco yam ardhaṁ te maghavan kṣemyā dhūḥ ||

10.028.06a एवा हि मां तवसं वर्धयन्ति दिवश्चिन्मे बृहत उत्तरा धूः ।

10.028.06c पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान ॥

10.028.06a evā hi māṁ tavasaṁ vardhayanti divaś cin me bṛhata uttarā dhūḥ |
10.028.06c purū sahasrā ni śiśāmi sākam aśatruṁ hi mā janitā jajāna ||

10.028.07a एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिन्द्र देवाः ।

10.028.07c वधीं वृत्रं वज्रेण मन्दसानोऽप व्रजं महिना दाशुषे वम् ॥

10.028.07a evā hi māṁ tavasaṁ jajñur ugraṁ karman-karman vṛṣaṇam indra devāḥ |
10.028.07c vadhīṁ vṛtraṁ vajreṇa mandasāno 'pa vrajam mahinā dāśuṣe vam ||

10.028.08a देवास आयन्परशूँरबिभ्रन्वना वृश्चन्तो अभि विड्भिरायन् ।

10.028.08c नि सुद्र्वं१ दधतो वक्षणासु यत्रा कृपीटमनु तद्दहन्ति ॥

10.028.08a devāsa āyan paraśūm̐r abibhran vanā vṛścanto abhi viḍbhir āyan |
10.028.08c ni sudrvaṁ1 dadhato vakṣaṇāsu yatrā kṛpīṭam anu tad dahanti ||

10.028.09a शशः क्षुरं प्रत्यञ्चं जगाराद्रिं लोगेन व्यभेदमारात् ।

10.028.09c बृहन्तं चिदृहते रन्धयानि वयद्वत्सो वृषभं शूशुवानः ॥

10.028.09a śaśaḥ kṣuram pratyañcaṁ jagārādriṁ logena vy abhedam ārāt |
10.028.09c bṛhantaṁ cid ṛhate randhayāni vayad vatso vṛṣabhaṁ śūśuvānaḥ ||

10.028.10a सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः ।

10.028.10c निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं कर्षदेतत् ॥

10.028.10a suparṇa itthā nakham ā siṣāyāvaruddhaḥ paripadaṁ na siṁhaḥ |
10.028.10c niruddhaś cin mahiṣas tarṣyāvān godhā tasmā ayathaṁ karṣad etat ||

10.028.11a तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयन्त्यन्नैः ।

10.028.11c सिम उक्ष्णोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः ॥

10.028.11a tebhyo godhā ayathaṁ karṣad etad ye brahmaṇaḥ pratipīyanty annaiḥ |
10.028.11c sima ukṣṇo 'vasṛṣṭām̐ adanti svayam balāni tanvaḥ śṛṇānāḥ ||

10.028.12a एते शमीभिः सुशमी अभूवन्ये हिन्विरे तन्व१ः सोम उक्थैः ।

10.028.12c नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो दधिषे नाम वीरः ॥

10.028.12a ete śamībhiḥ suśamī abhūvan ye hinvire tanva1ḥ soma ukthaiḥ |

10.028.12c nṛvad vadann upa no māhi vājān divi śravo dadhiṣe nāma vīraḥ ||

10.029.01a वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।

10.029.01c यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥

10.029.01a vane na vā yo ny adhāyi cākañ chucir vāṁ stomo bhuraṇāv ajīgaḥ |

10.029.01c yasyed indraḥ purudineṣu hotā nṛṇāṁ naryo nṛtamaḥ kṣapāvān ||

10.029.02a प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।

10.029.02c अनु त्रिशोकः शतमावहन्नॄन्कुत्सेन रथो यो असत्ससवान् ॥

10.029.02a pra te asyā uṣasaḥ prāparasyā nṛtau syāma nṛtamasya nṛṇām |

10.029.02c anu triśokaḥ śatam āvahan nṝn kutsena ratho yo asat sasavān ||

10.029.03a कस्ते मद इन्द्र रन्त्यो भूद्दुरो गिरो अभ्यु१ग्रो वि धाव ।

10.029.03c कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ॥

10.029.03a kas te mada indra rantyo bhūd duro giro abhy u1gro vi dhāva |

10.029.03c kad vāho arvāg upa mā manīṣā ā tvā śakyām upamaṁ rādho annaiḥ ||

10.029.04a कदु द्युम्नमिन्द्र त्वावतो नॄन्कया धिया करसे कन्न आगन् ।

10.029.04c मित्रो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन्मनीषाः ॥

10.029.04a kad u dyumnam indra tvāvato nṝn kayā dhiyā karase kan na āgan |

10.029.04c mitro na satya urugāya bhṛtyā anne samasya yad asan manīṣāḥ ||

10.029.05a प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन् ।

10.029.05c गिरश्च ये ते तुविजात पूर्वीर्नर इन्द्र प्रतिशिक्षन्त्यन्नैः ॥

10.029.05a preraya sūro arthaṁ na pāraṁ ye asya kāmaṁ janidhā iva gman |

10.029.05c giraś ca ye te tuvijāta pūrvīr nara indra pratiśikṣanty annaiḥ ||

10.029.06a मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन ।

10.029.06c वराय ते घृतवन्तः सुतासः स्वाद्मन्भवन्तु पीतये मधूनि ॥

10.029.06a mātre nu te sumite indra pūrvī dyaur majmanā pṛthivī kāvyena |
10.029.06c varāya te ghṛtavantaḥ sutāsaḥ svādman bhavantu pītaye madhūni ||

10.029.07a आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः ।

10.029.07c स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥

10.029.07a ā madhvo asmā asicann amatram indrāya pūrṇaṁ sa hi satyarādhāḥ |
10.029.07c sa vāvṛdhe varimann ā pṛthivyā abhi kratvā naryaḥ pauṁsyaiś ca ||

10.029.08a व्यानळिन्द्रः पृतनाः स्वोजा आस्मै यतन्ते सख्याय पूर्वीः ।

10.029.08c आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥

10.029.08a vy ānaḷ indraḥ pṛtanāḥ svojā āsmai yatante sakhyāya pūrvīḥ |
10.029.08c ā smā rathaṁ na pṛtanāsu tiṣṭha yam bhadrayā sumatyā codayāse ||

10.030.01a प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति ।

10.030.01c महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिम् ॥

10.030.01a pra devatrā brahmaṇe gātur etv apo acchā manaso na prayukti |
10.030.01c mahīm mitrasya varuṇasya dhāsim pṛthujrayase rīradhā suvṛktim ||

10.030.02a अध्वर्यवो हविष्मन्तो हि भूताच्छाप इतोशतीरुशन्तः ।

10.030.02c अव याश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥

10.030.02a adhvaryavo haviṣmanto hi bhūtācchāpa itośatīr uśantaḥ |
10.030.02c ava yāś caṣṭe aruṇaḥ suparṇas tam āsyadhvam ūrmim adyā suhastāḥ ||

10.030.03a अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वम् ।

10.030.03c स वो दददूर्मिमद्या सुपूतं तस्मै सोमं मधुमन्तं सुनोत ॥

10.030.03a adhvaryavo 'pa itā samudram apāṁ napātaṁ haviṣā yajadhvam |
10.030.03c sa vo dadad ūrmim adyā supūtaṁ tasmai somam madhumantaṁ sunota ||

10.030.04a यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईळते अध्वरेषु ।

10.030.04c अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय ॥

10.030.04a yo anidhmo dīdayad apsv a1ntar yaṁ viprāsa īḷate adhvareṣu |
10.030.04c apāṁ napān madhumatīr apo dā yābhir indro vāvṛdhe vīryāya ||

10.030.05a याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः ।

10.030.05c ता अध्वर्यो अपो अच्छा परेहि यदासिञ्चा ओषधीभिः पुनीतात् ॥

10.030.05a yābhiḥ somo modate harṣate ca kalyāṇībhir yuvatibhir na maryaḥ |
10.030.05c tā adhvaryo apo acchā parehi yad āsiñcā oṣadhībhiḥ punītāt ||

10.030.06a एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।

10.030.06c सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥

10.030.06a eved yūne yuvatayo namanta yad īm uśann uśatīr ety accha |
10.030.06c saṁ jānate manasā saṁ cikitre 'dhvaryavo dhiṣaṇāpaś ca devīḥ ||

10.030.07a यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुञ्चत् ।

10.030.07c तस्मा इन्द्राय मधुमन्तमूर्मिं देवमादनं प्र हिणोतनापः ॥

10.030.07a yo vo vṛtābhyo akṛṇod u lokaṁ yo vo mahyā abhiśaster amuñcat |
10.030.07c tasmā indrāya madhumantam ūrmiṁ devamādanam pra hiṇotanāpaḥ ||

10.030.08a प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः ।

10.030.08c घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥

10.030.08a prāsmai hinota madhumantam ūrmiṁ garbho yo vaḥ sindhavo madhva utsaḥ |
10.030.08c ghṛtapṛṣṭham īḍyam adhvareṣv āpo revatīḥ śṛṇutā havam me ||

10.030.09a तं सिन्धवो मत्सरमिन्द्रपानमूर्मिं प्र हेत य उभे इयर्ति ।

10.030.09c मदच्युतमौशानं नभोजां परि त्रितन्तुं विचरन्तमुत्सम् ॥

10.030.09a taṁ sindhavo matsaram indrapānam ūrmim pra heta ya ubhe iyarti |
10.030.09c madacyutam auśānaṁ nabhojām pari tritantuṁ vicarantam utsam ||

10.030.10a आववृततीरध नु द्विधारा गोषुयुधो न नियवं चरन्तीः ।

10.030.10c ऋषे जनित्रीर्भुवनस्य पत्नीरपो वन्दस्व सवृधः सयोनीः ॥

10.030.10a āvarvṛtatīr adha nu dvidhārā goṣuyudho na niyavaṁ carantīḥ |
10.030.10c ṛṣe janitrīr bhuvanasya patnīr apo vandasva savṛdhaḥ sayonīḥ ||

10.030.11a हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।

10.030.11c ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥

10.030.11a hinotā no adhvaraṁ devayajyā hinota brahma sanaye dhanānām |
10.030.11c ṛtasya yoge vi ṣyadhvam ūdhaḥ śruṣṭīvarīr bhūtanāsmabhyam āpaḥ ||

10.030.12a आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ।

10.030.12c रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥

10.030.12a āpo revatīḥ kṣayathā hi vasvaḥ kratuṁ ca bhadram bibhṛthāmṛtaṁ ca |
10.030.12c rāyaś ca stha svapatyasya patnīḥ sarasvatī tad gṛṇate vayo dhāt ||

10.030.13a प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि ।

10.030.13c अध्वर्युभिर्मनसा संविदाना इन्द्राय सोमं सुषुतं भरन्तीः ॥

10.030.13a prati yad āpo adṛśram āyatīr ghṛtam payāṁsi bibhratīr madhūni |
10.030.13c adhvaryubhir manasā saṁvidānā indrāya somaṁ suṣutam bharantīḥ ||

10.030.14a एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः ।

10.030.14c नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः ॥

10.030.14a emā agman revatīr jīvadhanyā adhvaryavaḥ sādayatā sakhāyaḥ |
10.030.14c ni barhiṣi dhattana somyāso 'pāṁ naptrā saṁvidānāsa enāḥ ||

10.030.15a आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयन्तीः ।

10.030.15c अध्वर्यवः सुनुतेन्द्राय सोममभूदु वः सुशका देवयज्या ॥

10.030.15a āgmann āpa uśatīr barhir edaṁ ny adhvare asadan devayantīḥ |
10.030.15c adhvaryavaḥ sunutendrāya somam abhūd u vaḥ suśakā devayajyā ||

10.031.01a आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः ।

10.031.01c तेभिर्वयं सुषखायो भवेम तरन्तो विश्वा दुरिता स्याम ॥

10.031.01a ā no devānām upa vetu śaṁso viśvebhis turair avase yajatraḥ |
10.031.01c tebhir vayaṁ suṣakhāyo bhavema taranto viśvā duritā syāma ||

10.031.02a परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत् ।

10.031.02c उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥

10.031.02a pari cin marto draviṇam mamanyād ṛtasya pathā namasā vivāset |
10.031.02c uta svena kratunā saṁ vadeta śreyāṁsaṁ dakṣam manasā jagṛbhyāt ||

10.031.03a अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यन्त्यूमाः ।

10.031.03c अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ॥

10.031.03a adhāyi dhītir asasṛgram aṁśās tīrthe na dasmam upa yanty ūmāḥ |
10.031.03c abhy ānaśma suvitasya śūṣaṁ navedaso amṛtānām abhūma ||

10.031.04a नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान ।

10.031.04c भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ॥

10.031.04a nityaś cākanyāt svapatir damūnā yasmā u devaḥ savitā jajāna |
10.031.04c bhago vā gobhir aryamem anajyāt so asmai cāruś chadayad uta syāt ||

10.031.05a इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन् ।

10.031.05c अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ॥

10.031.05a iyaṁ sā bhūyā uṣasām iva kṣā yad dha kṣumantaḥ śavasā samāyan |
10.031.05c asya stutiṁ jaritur bhikṣamāṇā ā naḥ śagmāsa upa yantu vājāḥ ||

10.031.06a अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः ।

10.031.06c अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ॥

10.031.06a asyed eṣā sumatiḥ paprathānābhavat pūrvyā bhūmanā gauḥ |
10.031.06c asya sanīḷā asurasya yonau samāna ā bharaṇe bibhramāṇāḥ ||

10.031.07a किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।

10.031.07c संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ॥

10.031.07a kiṁ svid vanaṁ ka u sa vṛkṣa āsa yato dyāvāpṛthivī niṣṭatakṣuḥ |
10.031.07c santasthāne ajare itaūtī ahāni pūrvīr uṣaso jaranta ||

10.031.08a नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।

10.031.08c त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति ॥

10.031.08a naitāvad enā paro anyad asty ukṣā sa dyāvāpṛthivī bibharti |
10.031.08c tvacam pavitraṁ kṛṇuta svadhāvān yad īṁ sūryaṁ na harito vahanti ||

10.031.09a स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।

10.031.09c मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम् ॥

10.031.09a stego na kṣām aty eti pṛthvīm miham na vāto vi ha vāti bhūma ।
10.031.09c mitro yatra varuṇo ajyamāno 'gnir vane na vy asṛṣṭa śokam ॥

10.031.10a स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।

10.031.10c पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान् ॥

10.031.10a starīr yat sūta sadyo ajyamānā vyathir avyathīḥ kṛṇuta svagopā ।
10.031.10c putro yat pūrvaḥ pitror janiṣṭa śamyām gaur jagāra yad dha pṛcchān ॥

10.031.11a उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।

10.031.11c प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ॥

10.031.11a uta kaṇvam nṛṣadaḥ putram āhur uta śyāvo dhanam ādatta vājī ।
10.031.11c pra kṛṣṇāya ruśad apinvatodhar ṛtam atra nakir asmā apīpet ॥

10.032.01a प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः ।

10.032.01c अस्माकमिन्द्र उभयं जुजोषति यत्सोम्यस्यान्धसो बुबोधति ॥

10.032.01a pra su gmantā dhiyasānasya sakṣaṇi varebhir varām̐ abhi ṣu prasīdataḥ ।
10.032.01c asmākam indra ubhayam jujoṣati yat somyasyāndhaso bubodhati ॥

10.032.02a वीन्द्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत ।

10.032.02c ये त्वा वहन्ति मुहुरध्वराँ उप ते सु वन्वन्तु वग्वनाँ अराधसः ॥

10.032.02a vīndra yāsi divyāni rocanā vi pārthivāni rajasā puruṣṭuta ।
10.032.02c ye tvā vahanti muhur adhvarām̐ upa te su vanvantu vagvanām̐ arādhasaḥ ॥

10.032.03a तदिन्मे छन्त्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति ।

10.032.03c जाया पतिं वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः ॥

10.032.03a tad in me chantsad vapuṣo vapuṣṭaram putro yaj jānam pitror adhīyati ।
10.032.03c jāyā patim vahati vagnunā sumat puṁsa id bhadro vahatuḥ pariṣkṛtaḥ ॥

10.032.04a तदित्सधस्थमभि चारु दीधय गावो यच्छासन्वहतुं न धेनवः ।

10.032.04c माता यन्मन्तुर्यूथस्य पूर्व्याभि वाणस्य सप्तधातुरिज्जनः ॥

10.032.04a tad it sadhastham abhi cāru dīdhaya gāvo yac chāsan vahatuṁ na dhenavaḥ |
10.032.04c mātā yan mantur yūthasya pūrvyābhi vāṇasya saptadhātur ij janaḥ ||

10.032.05a प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः ।

10.032.05c जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ॥

10.032.05a pra vo 'cchā ririce devayuṣ padam eko rudrebhir yāti turvaṇiḥ |
10.032.05c jarā vā yeṣv amṛteṣu dāvane pari va ūmebhyaḥ siñcatā madhu ||

10.032.06a निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच ।

10.032.06c इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥

10.032.06a nidhīyamānam apagūḻham apsu pra me devānāṁ vratapā uvāca |
10.032.06c indro vidvām̐ anu hi tvā cacakṣa tenāham agne anuśiṣṭa āgām ||

10.032.07a अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः ।

10.032.07c एतद्वै भद्रमनुशासनस्योत स्रुतिं विन्दत्यञ्जसीनाम् ॥

10.032.07a akṣetravit kṣetravidaṁ hy aprāṭ sa praiti kṣetravidānuśiṣṭaḥ |
10.032.07c etad vai bhadram anuśāsanasyota srutiṁ vindaty añjasīnām ||

10.032.08a अद्येदु प्राणीदममन्निमाहापीवृतो अधयन्मातुरूधः ।

10.032.08c एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥

10.032.08a adyed u prāṇīd amamann imāhāpīvṛto adhayan mātur ūdhaḥ |
10.032.08c em enam āpa jarimā yuvānam aheḻan vasuḥ sumanā babhūva ||

10.032.09a एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि ।

10.032.09c दान इद्वो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥

10.032.09a etāni bhadrā kalaśa kriyāma kuruśravaṇa dadato maghāni |
10.032.09c dāna id vo maghavānaḥ so astv ayaṁ ca somo hṛdi yaṁ bibharmi ||

10.033.01a प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण ।

10.033.01c विश्वे देवासो अध मामरक्षन्दुःशासुरागादिति घोष आसीत् ॥

10.033.01a  pra mā yuyujre prayujo janānāṁ vahāmi sma pūṣaṇam antareṇa |
10.033.01c  viśve devāso adha mām arakṣan duḥśāsur āgād iti ghoṣa āsīt ||

10.033.02a सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।

10.033.02c नि बाधते अमतिर्नग्नता जसुर्वेर्न वेवीयते मतिः ॥

10.033.02a  sam mā tapanty abhitaḥ sapatnīr iva parśavaḥ |
10.033.02c  ni bādhate amatir nagnatā jasur ver na vevīyate matiḥ ||

10.033.03a मूषो न शिश्ना व्यदन्ति माध्य स्तोतारं ते शतक्रतो ।

10.033.03c सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव ॥

10.033.03a  mūṣo na śiśnā vy adanti mādhya stotāraṁ te śatakrato |
10.033.03c  sakṛt su no maghavann indra mṛḷayādhā piteva no bhava ||

10.033.04a कुरुश्रवणमावृणि राजानं त्रासदस्यवम् ।

10.033.04c मंहिष्ठं वाघतामृषिः ॥

10.033.04a  kuruśravaṇam āvṛṇi rājānaṁ trāsadasyavam |
10.033.04c  maṁhiṣṭhaṁ vāghatām ṛṣiḥ ||

10.033.05a यस्य मा हरितो रथे तिस्रो वहन्ति साधुया ।

10.033.05c स्तवै सहस्रदक्षिणे ॥

10.033.05a  yasya mā harito rathe tisro vahanti sādhuyā |
10.033.05c  stavai sahasradakṣiṇe ||

10.033.06a यस्य प्रस्वादसो गिर उपमश्रवसः पितुः ।

10.033.06c क्षेत्रं न रण्वमूचुषे ॥

10.033.06a  yasya prasvādaso gira upamaśravasaḥ pituḥ |
10.033.06c  kṣetraṁ na raṇvam ūcuṣe ||

10.033.07a अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि ।

10.033.07c पितुष्टे अस्मि वन्दिता ॥

10.033.07a  adhi putropamaśravo napān mitrātither ihi |
10.033.07c  pituṣ ṭe asmi vanditā ||

10.033.08a यदीशीयामृतानामुत वा मर्त्यानाम् ।

10.033.08c जीवेदिन्मघवा मम ॥

10.033.08a yad īśīyāmṛtānām uta vā martyānām |
10.033.08c jīved in maghavā mama ||

10.033.09a न देवानामति व्रतं शतात्मा चन जीवति ।

10.033.09c तथा युजा वि वावृते ॥

10.033.09a na devānām ati vrataṁ śatātmā cana jīvati |
10.033.09c tathā yujā vi vāvṛte ||

10.034.01a प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः ।

10.034.01c सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥

10.034.01a prāvepā mā bṛhato mādayanti pravātejā iriṇe varvṛtānāḥ |
10.034.01c somasyeva maujavatasya bhakṣo vibhīdako jāgṛvir mahyam acchān ||

10.034.02a न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत् ।

10.034.02c अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥

10.034.02a na mā mimetha na jihīḷa eṣā śivā sakhibhya uta mahyam āsīt |
10.034.02c akṣasyāham ekaparasya hetor anuvratām apa jāyām arodham ||

10.034.03a द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम् ।

10.034.03c अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥

10.034.03a dveṣṭi śvaśrūr apa jāyā ruṇaddhi na nāthito vindate marḍitāram |
10.034.03c aśvasyeva jarato vasnyasya nāhaṁ vindāmi kitavasya bhogam ||

10.034.04a अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्य१क्षः ।

10.034.04c पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम् ॥

10.034.04a anye jāyām pari mṛśanty asya yasyāgṛdhad vedane vājy a1kṣaḥ |
10.034.04c pitā mātā bhrātara enam āhur na jānīmo nayatā baddham etam ||

10.034.05a यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः ।

10.034.05c न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥

10.034.05a yad ādīdhye na daviṣāṇy ebhiḥ parāyadbhyo 'va hīye sakhibhyaḥ |
10.034.05c nyuptāś ca babhravo vācam akratam̐ emīd eṣāṁ niṣkṛtaṁ jāriṇīva ||

10.034.06a सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः ।

10.034.06c अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि ॥

10.034.06a sabhām eti kitavaḥ pṛcchamāno jeṣyāmīti tanvā3 śūśujānaḥ |
10.034.06c akṣāso asya vi tiranti kāmam pratidīvne dadhata ā kṛtāni ||

10.034.07a अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः ।

10.034.07c कुमारदेष्णा जयतः पुनर्हणो मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥

10.034.07a akṣāsa id aṅkuśino nitodino nikṛtvānas tapanās tāpayiṣṇavaḥ |
10.034.07c kumāradeṣṇā jayataḥ punarhaṇo madhvā sampṛktāḥ kitavasya barhaṇā ||

10.034.08a त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।

10.034.08c उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत्कृणोति ॥

10.034.08a tripañcāśaḥ krīḷati vrāta eṣāṁ deva iva savitā satyadharmā |
10.034.08c ugrasya cin manyave nā namante rājā cid ebhyo nama it kṛṇoti ||

10.034.09a नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते ।

10.034.09c दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ॥

10.034.09a nīcā vartanta upari sphuranty ahastāso hastavantaṁ sahante |
10.034.09c divyā aṅgārā iriṇe nyuptāḥ śītāḥ santo hṛdayaṁ nir dahanti ||

10.034.10a जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।

10.034.10c ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥

10.034.10a jāyā tapyate kitavasya hīnā mātā putrasya carataḥ kva svit |
10.034.10c ṛṇāvā bibhyad dhanam icchamāno 'nyeṣām astam upa naktam eti ||

10.034.11a स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् ।

10.034.11c पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्सो अग्नेरन्ते वृषलः पपाद ॥

10.034.11a striyaṁ dṛṣṭvāya kitavaṁ tatāpānyeṣāṁ jāyāṁ sukṛtaṁ ca yonim |

10.034.11c pūrvāhṇe aśvān yuyuje hi babhrūn so agner ante vṛṣalaḥ papāda ||

10.034.12a यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव ।

10.034.12c तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥

10.034.12a yo vaḥ senānīr mahato gaṇasya rājā vrātasya prathamo babhūva |
10.034.12c tasmai kṛṇomi na dhanā ruṇadhmi daśāham prācīs tad ṛtaṁ vadāmi ||

10.034.13a अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।

10.034.13c तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥

10.034.13a akṣair mā dīvyaḥ kṛṣim it kṛṣasva vitte ramasva bahu manyamānaḥ |
10.034.13c tatra gāvaḥ kitava tatra jāyā tan me vi caṣṭe savitāyam aryaḥ ||

10.034.14a मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।

10.034.14c नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥

10.034.14a mitraṁ kṛṇudhvaṁ khalu mṛḷatā no mā no ghoreṇa caratābhi dhṛṣṇu |
10.034.14c ni vo nu manyur viśatām arātir anyo babhrūṇām prasitau nv astu ||

10.035.01a अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु ।

10.035.01c मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥

10.035.01a abudhram u tya indravanto agnayo jyotir bharanta uṣaso vyuṣṭiṣu |
10.035.01c mahī dyāvāpṛthivī cetatām apo 'dyā devānām ava ā vṛṇīmahe ||

10.035.02a दिवस्पृथिव्योरव आ वृणीमहे मातॄन्सिन्धून्पर्वताञ्छर्यणावतः ।

10.035.02c अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥

10.035.02a divaspṛthivyor ava ā vṛṇīmahe mātṝn sindhūn parvatāñ charyaṇāvataḥ |
10.035.02c anāgāstvaṁ sūryam uṣāsam īmahe bhadraṁ somaḥ suvāno adyā kṛṇotu naḥ ||

10.035.03a द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा ।

10.035.03c उषा उच्छन्त्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे ॥

10.035.03a dyāvā no adya pṛthivī anāgaso mahī trāyetāṁ suvitāya mātarā |
10.035.03c uṣā ucchanty apa bādhatām aghaṁ svasty a1gniṁ samidhānam īmahe ||

10.035.04a इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।

10.035.04c आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे ॥

10.035.04a iyaṁ na usrā prathamā sudevyaṁ revat sanibhyo revatī vy ucchatu |
10.035.04c āre manyuṁ durvidatrasya dhīmahi svasty a1gniṁ samidhānam īmahe ||

10.035.05a प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु ।

10.035.05c भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे ॥

10.035.05a pra yāḥ sisrate sūryasya raśmibhir jyotir bharantīr uṣaso vyuṣṭiṣu |
10.035.05c bhadrā no adya śravase vy ucchata svasty a1gniṁ samidhānam īmahe ||

10.035.06a अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् ।

10.035.06c आयुक्षातामश्विना तूतुजिं रथं स्वस्त्यग्निं समिधानमीमहे ॥

10.035.06a anamīvā uṣasa ā carantu na ud agnayo jihatāṁ jyotiṣā bṛhat |
10.035.06c āyukṣātām aśvinā tūtujiṁ rathaṁ svasty a1gniṁ samidhānam īmahe ||

10.035.07a श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।

10.035.07c रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्यग्निं समिधानमीमहे ॥

10.035.07a śreṣṭhaṁ no adya savitar vareṇyam bhāgam ā suva sa hi ratnadhā asi |
10.035.07c rāyo janitrīṁ dhiṣaṇām upa bruve svasty a1gniṁ samidhānam īmahe ||

10.035.08a पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि ।

10.035.08c विश्वा इदुस्रा स्पळुदेति सूर्यः स्वस्त्यग्निं समिधानमीमहे ॥

10.035.08a pipartu mā tad ṛtasya pravācanaṁ devānāṁ yan manuṣyā3 amanmahi |
10.035.08c viśvā id usrā spaḷ ud eti sūryaḥ svasty a1gniṁ samidhānam īmahe ||

10.035.09a अद्वेषो अद्य बर्हिष स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ।

10.035.09c आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्यग्निं समिधानमीमहे ॥

10.035.09a adveṣo adya barhiṣa starīmaṇi grāvṇāṁ yoge manmanaḥ sādha īmahe |
10.035.09c ādityānāṁ śarmaṇi sthā bhuraṇyasi svasty a1gniṁ samidhānam īmahe ||

10.035.10a आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन् ।

10.035.10c इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्यग्निं समिधानमीमहे ॥

10.035.10a ā no barhiḥ sadhamāde bṛhad divi devāṁ īḻe sādayā sapta hotṝn |
10.035.10c indram mitraṁ varuṇaṁ sātaye bhagaṁ svasty a1gniṁ samidhānam īmahe ||

10.035.11a त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।

10.035.11c बृहस्पतिं पूषणमश्विना भगं स्वस्त्यग्निं समिधानमीमहे ॥

10.035.11a ta ādityā ā gatā sarvatātaye vṛdhe no yajñam avatā sajoṣasaḥ |
10.035.11c bṛhaspatim pūṣaṇam aśvinā bhagaṁ svasty a1gniṁ samidhānam īmahe ||

10.035.12a तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम् ।

10.035.12c पश्वे तोकाय तनयाय जीवसे स्वस्त्यग्निं समिधानमीमहे ॥

10.035.12a tan no devā yacchata supravācanaṁ chardir ādityāḥ subharaṁ nṛpāyyam |
10.035.12c paśve tokāya tanayāya jīvase svasty a1gniṁ samidhānam īmahe ||

10.035.13a विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।

10.035.13c विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥

10.035.13a viśve adya maruto viśva ūtī viśve bhavantv agnayaḥ samiddhāḥ |
10.035.13c viśve no devā avasā gamantu viśvam astu draviṇaṁ vājo asme ||

10.035.14a यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।

10.035.14c यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥

10.035.14a yaṁ devāso 'vatha vājasātau yaṁ trāyadhve yam pipṛthāty aṁhaḥ |
10.035.14c yo vo gopīthe na bhayasya veda te syāma devavītaye turāsaḥ ||

10.036.01a उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।

10.036.01c इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥

10.036.01a uṣāsānaktā bṛhatī supeśasā dyāvākṣāmā varuṇo mitro aryamā |
10.036.01c indraṁ huve marutaḥ parvatāṁ apa ādityān dyāvāpṛthivī apaḥ svaḥ ||

10.036.02a द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।

10.036.02c मा दुर्विदत्रा निरृतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥

10.036.02a dyauś ca naḥ pṛthivī ca pracetasa ṛtāvarī rakṣatām aṁhaso riṣaḥ |
10.036.02c mā durvidatrā nirṛtir na īśata tad devānām avo adyā vṛṇīmahe ||

10.036.03a विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।

10.036.03c स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥

10.036.03a viśvasmān no aditiḥ pātv aṁhaso mātā mitrasya varuṇasya revataḥ |
10.036.03c svarvaj jyotir avṛkaṁ naśīmahi tad devānām avo adyā vṛṇīmahe ||

10.036.04a ग्रावा वदन्नप रक्षांसि सेधतु दुष्ष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् ।

10.036.04c आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥

10.036.04a grāvā vadann apa rakṣāṁsi sedhatu duṣṣvapnyaṁ nirṛtiṁ viśvam atriṇam |
10.036.04c ādityaṁ śarma marutām aśīmahi tad devānām avo adyā vṛṇīmahe ||

10.036.05a एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।

10.036.05c सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥

10.036.05a endro barhiḥ sīdatu pinvatām iḷā bṛhaspatiḥ sāmabhir ṛkvo arcatu |
10.036.05c supraketaṁ jīvase manma dhīmahi tad devānām avo adyā vṛṇīmahe ||

10.036.06a दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।

10.036.06c प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥

10.036.06a divispṛśaṁ yajñam asmākam aśvinā jīrādhvaraṁ kṛṇutaṁ sumnam iṣṭaye |
10.036.06c prācīnaraśmim āhutaṁ ghṛtena tad devānām avo adyā vṛṇīmahe ||

10.036.07a उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शम्भुवम् ।

10.036.07c रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥

10.036.07a upa hvaye suhavam mārutaṁ gaṇam pāvakam ṛṣvaṁ sakhyāya śambhuvam |
10.036.07c rāyas poṣaṁ sauśravasāya dhīmahi tad devānām avo adyā vṛṇīmahe ||

10.036.08a अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् ।

10.036.08c सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥

10.036.08a apām peruṁ jīvadhanyam bharāmahe devāvyaṁ suhavam adhvaraśriyam |
10.036.08c suraśmiṁ somam indriyaṁ yamīmahi tad devānām avo adyā vṛṇīmahe ||

10.036.09a सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः ।

10.036.09c ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥

10.036.09a sanema tat susanitā sanitvabhir vayaṁ jīvā jīvaputrā anāgasaḥ |
10.036.09c brahmadviṣo viṣvag eno bharerata tad devānām avo adyā vṛṇīmahe ||

10.036.10a ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन ।

10.036.10c जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥

10.036.10a ye sthā manor yajñiyās te śṛṇotana yad vo devā īmahe tad dadātana |
10.036.10c jaitraṁ kratuṁ rayimad vīravad yaśas tad devānām avo adyā vṛṇīmahe ||

10.036.11a महदद्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम् ।

10.036.11c यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥

10.036.11a mahad adya mahatām ā vṛṇīmahe 'vo devānām bṛhatām anarvaṇām |
10.036.11c yathā vasu vīrajātaṁ naśāmahai tad devānām avo adyā vṛṇīmahe ||

10.036.12a महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।

10.036.12c श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥

10.036.12a maho agneḥ samidhānasya śarmaṇy anāgā mitre varuṇe svastaye |
10.036.12c śreṣṭhe syāma savituḥ savīmani tad devānām avo adyā vṛṇīmahe ||

10.036.13a ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।

10.036.13c ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥

10.036.13a ye savituḥ satyasavasya viśve mitrasya vrate varuṇasya devāḥ |
10.036.13c te saubhagaṁ vīravad gomad apno dadhātana draviṇaṁ citram asme ||

10.036.14a सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।

10.036.14c सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

10.036.14a savitā paścātāt savitā purastāt savitottarāttāt savitādharāttāt |
10.036.14c savitā naḥ suvatu sarvatātiṁ savitā no rāsatāṁ dīrgham āyuḥ ||

10.037.01a नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।

10.037.01c दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥

10.037.01a namo mitrasya varuṇasya cakṣase maho devāya tad ṛtaṁ saparyata |
10.037.01c dūredṛśe devajātāya ketave divas putrāya sūryāya śaṁsata ||

10.037.02a सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च ।

10.037.02c विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥

10.037.02a sā mā satyoktiḥ pari pātu viśvato dyāvā ca yatra tatanann ahāni ca |
10.037.02c viśvam anyan ni viśate yad ejati viśvāhāpo viśvāhod eti sūryaḥ ||

10.037.03a न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि ।

10.037.03c प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥

10.037.03a na te adevaḥ pradivo ni vāsate yad etaśebhiḥ patarai ratharyasi |
10.037.03c prācīnam anyad anu vartate raja ud anyena jyotiṣā yāsi sūrya ||

10.037.04a येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना ।

10.037.04c तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव ॥

10.037.04a yena sūrya jyotiṣā bādhase tamo jagac ca viśvam udiyarṣi bhānunā |
10.037.04c tenāsmad viśvām anirām anāhutim apāmīvām apa duṣṣvapnyaṁ suva ||

10.037.05a विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु ।

10.037.05c यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥

10.037.05a viśvasya hi preṣito rakṣasi vratam aheḷayann uccarasi svadhā anu |
10.037.05c yad adya tvā sūryopabravāmahai taṁ no devā anu maṁsīrata kratum ||

10.037.06a तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः ।

10.037.06c मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ॥

10.037.06a taṁ no dyāvāpṛthivī tan na āpa indraḥ śṛṇvantu maruto havaṁ vacaḥ |
10.037.06c mā śūne bhūma sūryasya sandṛśi bhadraṁ jīvanto jaraṇām aśīmahi ||

10.037.07a विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।

10.037.07c उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥

10.037.07a viśvāhā tvā sumanasaḥ sucakṣasaḥ prajāvanto anamīvā anāgasaḥ |

10.037.07c udyantaṁ tvā mitramaho dive-dive jyog jīvāḥ prati paśyema sūrya ||

10.037.08a महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषेचक्षुषे मयः ।

10.037.08c आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥

10.037.08a mahi jyotir bibhrataṁ tvā vicakṣaṇa bhāsvantaṁ cakṣuṣe-cakṣuṣe mayaḥ |
10.037.08c ārohantam bṛhataḥ pājasas pari vayaṁ jīvāḥ prati paśyema sūrya ||

10.037.09a यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः ।

10.037.09c अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ॥

10.037.09a yasya te viśvā bhuvanāni ketunā pra cerate ni ca viśante aktubhiḥ |
10.037.09c anāgāstvena harikeśa sūryāhnāhnā no vasyasā-vasyasod ihi ||

10.037.10a शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन ।

10.037.10c यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ॥

10.037.10a śaṁ no bhava cakṣasā śaṁ no ahnā śam bhānunā śaṁ himā śaṁ ghṛṇena |
10.037.10c yathā śam adhvañ cham asad duroṇe tat sūrya draviṇaṁ dhehi citram ||

10.037.11a अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।

10.037.11c अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन ॥

10.037.11a asmākaṁ devā ubhayāya janmane śarma yacchata dvipade catuṣpade |
10.037.11c adat pibad ūrjayamānam āśitaṁ tad asme śaṁ yor arapo dadhātana ||

10.037.12a यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् ।

10.037.12c अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥

10.037.12a yad vo devāś cakṛma jihvayā guru manaso vā prayutī devahelanam |
10.037.12c arāvā yo no abhi ducchunāyate tasmin tad eno vasavo ni dhetana ||

10.038.01a अस्मिन्न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये ।

10.038.01c यत्र गोषाता धृषितेषु खादिषु विष्वक्पतन्ति दिद्यवो नृषाह्ये ॥

10.038.01a asmin na indra pṛtsutau yaśasvati śimīvati krandasi prāva sātaye |
10.038.01c yatra goṣātā dhṛṣiteṣu khādiṣu viṣvak patanti didyavo nṛṣāhye ||

10.038.02a स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् ।

10.038.02c स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥

10.038.02a sa naḥ kṣumantaṁ sadane vy ūrṇuhi goarṇasaṁ rayim indra śravāyyam |
10.038.02c syāma te jayataḥ śakra medino yathā vayam uśmasi tad vaso kṛdhi ||

10.038.03a यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति ।

10.038.03c अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥

10.038.03a yo no dāsa āryo vā puruṣṭutādeva indra yudhaye ciketati |
10.038.03c asmābhiṣ ṭe suṣahāḥ santu śatravas tvayā vayaṁ tān vanuyāma saṅgame ||

10.038.04a यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये ।

10.038.04c तं विखादे सस्निमद्य श्रुतं नरमर्वाञ्चमिन्द्रमवसे करामहे ॥

10.038.04a yo dabhrebhir havyo yaś ca bhūribhir yo abhīke varivovin nṛṣāhye |
10.038.04c taṁ vikhāde sasnim adya śrutaṁ naram arvāñcam indram avase karāmahe ||

10.038.05a स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम् ।

10.038.05c प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥

10.038.05a svavṛjaṁ hi tvām aham indra śuśravānānudaṁ vṛṣabha radhracodanam |
10.038.05c pra muñcasva pari kutsād ihā gahi kim u tvāvān muṣkayor baddha āsate ||

10.039.01a यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता ।

10.039.01c शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥

10.039.01a yo vām parijmā suvṛd aśvinā ratho doṣām uṣāso havyo haviṣmatā |
10.039.01c śaśvattamāsas tam u vām idaṁ vayam pitur na nāma suhavaṁ havāmahe ||

10.039.02a चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं तदुश्मसि ।

10.039.02c यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥

10.039.02a codayataṁ sūnṛtāḥ pinvataṁ dhiya ut purandhīr īrayataṁ tad uśmasi |
10.039.02c yaśasam bhāgaṁ kṛṇutaṁ no aśvinā somaṁ na cārum maghavatsu nas kṛtam ||

10.039.03a अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् ।

10.039.03c अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥

10.039.03a amājuraś cid bhavatho yuvam bhago 'nāśoś cid avitārāpamasya cit |
10.039.03c andhasya cin nāsatyā kṛśasya cid yuvām id āhur bhiṣajā rutasya cit ||

10.039.04a युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः ।

10.039.04c निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥

10.039.04a yuvaṁ cyavānaṁ sanayaṁ yathā ratham punar yuvānaṁ carathāya takṣathuḥ |
10.039.04c niṣ ṭaugryam ūhathur adbhyas pari viśvet tā vāṁ savaneṣu pravācyā ||

10.039.05a पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा ।

10.039.05c ता वां नु नव्याववसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥

10.039.05a purāṇā vāṁ vīryā3 pra bravā jane 'tho hāsathur bhiṣajā mayobhuvā |
10.039.05c tā vāṁ nu navyāv avase karāmahe 'yaṁ nāsatyā śrad arir yathā dadhat ||

10.039.06a इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् ।

10.039.06c अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतम् ॥

10.039.06a iyaṁ vām ahve śṛṇutam me aśvinā putrāyeva pitarā mahyaṁ śikṣatam |
10.039.06c anāpir ajñā asajātyāmatiḥ purā tasyā abhiśaster ava spṛtam ||

10.039.07a युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम् ।

10.039.07c युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये ॥

10.039.07a yuvaṁ rathena vimadāya śundhyuvaṁ ny ūhathuḥ purumitrasya yoṣaṇām |
10.039.07c yuvaṁ havaṁ vadhrimatyā agacchataṁ yuvaṁ suṣutiṁ cakrathuḥ purandhaye ||

10.039.08a युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः ।

10.039.08c युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥

10.039.08a yuvaṁ viprasya jaraṇām upeyuṣaḥ punaḥ kaler akṛṇutaṁ yuvad vayaḥ |
10.039.08c yuvaṁ vandanam ṛśyadād ud ūpathur yuvaṁ sadyo viśpalām etave kṛthaḥ ||

10.039.09a युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना ।

10.039.09c युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥

10.039.09a yuvaṁ ha rebhaṁ vṛṣaṇā guhā hitam ud airayatam mamṛvāṁsam aśvinā |

10.039.09c yuvam ṛbīsam uta taptam atraya omanvantaṁ cakrathuḥ saptavadhraye ||

10.039.10a युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजैर्नवती च वाजिनम् ।

10.039.10c चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवम् ॥

10.039.10a yuvaṁ śvetam pedave 'śvināśvaṁ navabhir vājair navatī ca vājinam |
10.039.10c carkṛtyaṁ dadathur drāvayatsakham bhagaṁ na nṛbhyo havyam mayobhuvam ||

10.039.11a न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयम् ।

10.039.11c यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥

10.039.11a na taṁ rājānāv adite kutaś cana nāṁho aśnoti duritaṁ nakir bhayam |
10.039.11c yam aśvinā suhavā rudravartanī puorathaṁ kṛṇuthaḥ patnyā saha ||

10.039.12a आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ।

10.039.12c यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥

10.039.12a ā tena yātam manaso javīyasā rathaṁ yaṁ vām ṛbhavaś cakrur aśvinā |
10.039.12c yasya yoge duhitā jāyate diva ubhe ahanī sudine vivasvataḥ ||

10.039.13a ता वर्तिर्यातं जयुषा वि पर्वतमपिन्वतं शयवे धेनुमश्विना ।

10.039.13c वृकस्य चिद्वर्तिकामन्तरास्याद्युवं शचीभिर्ग्रसिताममुञ्चतम् ॥

10.039.13a tā vartir yātaṁ jayuṣā vi parvatam apinvataṁ śayave dhenum aśvinā |
10.039.13c vṛkasya cid vartikām antar āsyād yuvaṁ śacībhir grasitām amuñcatam ||

10.039.14a एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथम् ।

10.039.14c न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥

10.039.14a etaṁ vāṁ stomam aśvināv akarmātakṣāma bhṛgavo na ratham |
10.039.14c ny amṛkṣāma yoṣaṇāṁ na marye nityaṁ na sūnuṁ tanayaṁ dadhānāḥ ||

10.040.01a रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुविताय भूषति ।

10.040.01c प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥

10.040.01a rathaṁ yāntaṁ kuha ko ha vāṁ narā prati dyumantaṁ suvitāya bhūṣati |
10.040.01c prātaryāvāṇaṁ vibhvaṁ viśe-viśe vastor-vastor vahamānaṁ dhiyā śami ||

10.040.02a कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।

10.040.02c को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥

10.040.02a kuha svid doṣā kuha vastor aśvinā kuhābhipitvaṁ karataḥ kuhoṣatuḥ |
10.040.02c ko vāṁ śayutrā vidhaveva devaram maryaṁ na yoṣā kṛṇute sadhastha ā ||

10.040.03a प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गच्छथो गृहम् ।

10.040.03c कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥

10.040.03a prātar jarethe jaraṇeva kāpayā vastor-vastor yajatā gacchatho gṛham |
10.040.03c kasya dhvasrā bhavathaḥ kasya vā narā rājaputreva savanāva gacchathaḥ ||

10.040.04a युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।

10.040.04c युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥

10.040.04a yuvām mṛgeva vāraṇā mṛgaṇyavo doṣā vastor haviṣā ni hvayāmahe |
10.040.04c yuvaṁ hotrām ṛtuthā juhvate nareṣaṁ janāya vahathaḥ śubhas patī ||

10.040.05a युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा ।

10.040.05c भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥

10.040.05a yuvāṁ ha ghoṣā pary aśvinā yatī rājña ūce duhitā pṛcche vāṁ narā |
10.040.05c bhūtam me ahna uta bhūtam aktave 'śvāvate rathine śaktam arvate ||

10.040.06a युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।

10.040.06c युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥

10.040.06a yuvaṁ kavī ṣṭhaḥ pary aśvinā rathaṁ viśo na kutso jaritur naśāyathaḥ |
10.040.06c yuvor ha makṣā pary aśvinā madhv āsā bharata niṣkṛtaṁ na yoṣaṇā ||

10.040.07a युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः ।

10.040.07c युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥

10.040.07a yuvaṁ ha bhujyuṁ yuvam aśvinā vaśaṁ yuvaṁ śiñjāram uśanām upārathuḥ |
10.040.07c yuvo rarāvā pari sakhyam āsate yuvor aham avasā sumnam ā cake ||

10.040.08a युवं ह कृशं युवमश्विना शयुं युवं विधन्तं विधवामुरुष्यथः ।

10.040.08c युवं सनिभ्य स्तनयन्तमश्विनाप व्रजमूर्णुथः सप्तास्यम् ॥

10.040.08a yuvaṁ ha kṛśaṁ yuvam aśvinā śayuṁ yuvaṁ vidhantaṁ vidhavām uruṣyathaḥ |
10.040.08c yuvaṁ sanibhya stanayantam aśvināpa vrajam ūrṇuthaḥ saptāsyam ||

10.040.09a जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु ।

10.040.09c आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्ने भवति तत्पतित्वनम् ॥

10.040.09a janiṣṭa yoṣā patayat kanīnako vi cāruhan vīrudho daṁsanā anu |
10.040.09c āsmai rīyante nivaneva sindhavo 'smā ahne bhavati tat patitvanam ||

10.040.10a जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।

10.040.10c वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥

10.040.10a jīvaṁ rudanti vi mayante adhvare dīrghām anu prasitiṁ dīdhiyur naraḥ |
10.040.10c vāmam pitṛbhyo ya idaṁ samerire mayaḥ patibhyo janayaḥ pariṣvaje ||

10.040.11a न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।

10.040.11c प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥

10.040.11a na tasya vidma tad u ṣu pra vocata yuvā ha yad yuvatyāḥ kṣeti yoniṣu |
10.040.11c priyosriyasya vṛṣabhasya retino gṛhaṁ gamemāśvinā tad uśmasi ||

10.040.12a आ वामगन्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।

10.040.12c अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥

10.040.12a ā vām agan sumatir vājinīvasū ny aśvinā hṛtsu kāmā ayaṁsata |
10.040.12c abhūtaṁ gopā mithunā śubhas patī priyā aryamṇo duryām̐ aśīmahi ||

10.040.13a ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे ।

10.040.13c कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम् ॥

10.040.13a tā mandasānā manuṣo duroṇa ā dhattaṁ rayiṁ sahavīraṁ vacasyave |
10.040.13c kṛtaṁ tīrthaṁ suprapāṇaṁ śubhas patī sthāṇum patheṣṭhām apa durmatiṁ hatam ||

10.040.14a क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती ।

10.040.14c क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहम् ॥

10.040.14a kva svid adya katamāsv aśvinā vikṣu dasrā mādayete śubhas patī |

10.040.14c ka īm ni yeme katamasya jagmatur viprasya vā yajamānasya vā gṛham ||

10.041.01a समानमु त्यं पुरुहूतमुक्थ्यं१ रथं त्रिचक्रं सवना गनिग्मतम् ।
10.041.01c परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे ॥

10.041.01a samānam u tyam puruhūtam ukthyam1 ratham tricakram savanā ganigmatam |
10.041.01c parijmānam vidathyam suvṛktibhir vayam vyuṣṭā uṣaso havāmahe ||

10.041.02a प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथम् ।
10.041.02c विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमन्तमश्विना ॥

10.041.02a prātaryujam nāsatyādhi tiṣṭhathaḥ prātaryāvāṇam madhuvāhanam ratham |
10.041.02c viśo yena gacchatho yajvarīr narā kīreś cid yajñam hotṛmantam aśvinā ||

10.041.03a अध्वर्युं वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसम् ।
10.041.03c विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना ॥

10.041.03a adhvaryum vā madhupāṇim suhastyam agnidham vā dhṛtadakṣam damūnasam |
10.041.03c viprasya vā yat savanāni gacchatho 'ta ā yātam madhupeyam aśvinā ||

10.042.01a अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।
10.042.01c वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम् ॥

10.042.01a asteva su prataram lāyam asyan bhūṣann iva pra bharā stomam asmai |
10.042.01c vācā viprās tarata vācam aryo ni rāmaya jaritaḥ soma indram ||

10.042.02a दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम् ।
10.042.02c कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरम् ॥

10.042.02a dohena gām upa śikṣā sakhāyam pra bodhaya jaritar jāram indram |
10.042.02c kośam na pūrṇam vasunā nyṛṣṭam ā cyāvaya maghadeyāya śūram ||

10.042.03a किमङ्ग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि ।
10.042.03c अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ॥

10.042.03a kim aṅga tvā maghavan bhojam āhuḥ śiśīhi mā śiśayam tvā śṛṇomi |
10.042.03c apnasvatī mama dhīr astu śakra vasuvidam bhagam indrā bharā naḥ ||

10.042.04a त्वां जना ममसत्येष्विन्द्र संतस्थाना वि ह्वयन्ते समीके ।

10.042.04c अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥

10.042.04a tvāṁ janā mamasatyeṣv indra santasthānā vi hvayante samīke |
10.042.04c atrā yujaṁ kṛṇute yo haviṣmān nāsunvatā sakhyaṁ vaṣṭi śūraḥ ||

10.042.05a धनं न स्यन्द्रं बहुलं यो अस्मै तीव्रान्सोमाँ आसुनोति प्रयस्वान् ।

10.042.05c तस्मै शत्रून्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हन्ति वृत्रम् ॥

10.042.05a dhanaṁ na syandram bahulaṁ yo asmai tīvrān somām̐ āsunoti prayasvān |
10.042.05c tasmai śatrūn sutukān prātar ahno ni svaṣṭrān yuvati hanti vṛtram ||

10.042.06a यस्मिन्वयं दधिमा शंसमिन्द्रे यः शिश्राय मघवा काममस्मे ।

10.042.06c आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम् ॥

10.042.06a yasmin vayaṁ dadhimā śaṁsam indre yaḥ śiśrāya maghavā kāmam asme |
10.042.06c ārāc cit san bhayatām asya śatrur ny asmai dyumnā janyā namantām ||

10.042.07a आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन ।

10.042.07c अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥

10.042.07a ārāc chatrum apa bādhasva dūram ugro yaḥ śambaḥ puruhūta tena |
10.042.07c asme dhehi yavamad gomad indra kṛdhī dhiyaṁ jaritre vājaratnām ||

10.042.08a प्र यमन्तर्वृषसवासो अग्मन्तीव्राः सोमा बहुलान्तास इन्द्रम् ।

10.042.08c नाह दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम् ॥

10.042.08a pra yam antar vṛṣasavāso agman tīvrāḥ somā bahulāntāsa indram |
10.042.08c nāha dāmānam maghavā ni yaṁsan ni sunvate vahati bhūri vāmam ||

10.042.09a उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।

10.042.09c यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् ॥

10.042.09a uta prahām atidīvyā jayāti kṛtaṁ yac chvaghnī vicinoti kāle |
10.042.09c yo devakāmo na dhanā ruṇaddhi sam it taṁ rāyā sṛjati svadhāvān ||

10.042.10a गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।

10.042.10c वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥

10.042.10a gobhiṣ ṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām |
10.042.10c vayaṁ rājabhiḥ prathamā dhanāny asmākena vṛjanenā jayema ||

10.042.11a बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।

10.042.11c इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥

10.042.11a bṛhaspatir naḥ pari pātu paścād utottarasmād adharād aghāyoḥ |
10.042.11c indraḥ purastād uta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu ||

10.043.01a अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत ।

10.043.01c परि ष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥

10.043.01a acchā ma indram matayaḥ svarvidaḥ sadhrīcīr viśvā uśatīr anūṣata |
10.043.01c pari ṣvajante janayo yathā patim maryaṁ na śundhyum maghavānam ūtaye ||

10.043.02a न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय ।

10.043.02c राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्सु सोमेऽवपानमस्तु ते ॥

10.043.02a na ghā tvadrig apa veti me manas tve it kāmam puruhūta śiśraya |
10.043.02c rājeva dasma ni ṣado 'dhi barhiṣy asmin su some 'vapānam astu te ||

10.043.03a विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।

10.043.03c तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥

10.043.03a viṣūvṛd indro amater uta kṣudhaḥ sa id rāyo maghavā vasva īśate |
10.043.03c tasyed ime pravaṇe sapta sindhavo vayo vardhanti vṛṣabhasya śuṣmiṇaḥ ||

10.043.04a वयो न वृक्षं सुपलाशमासदन्सोमास इन्द्रं मन्दिनश्चमूषदः ।

10.043.04c प्रैषामनीकं शवसा दविद्युतद्विदत्स्व१र्मनवे ज्योतिरार्यम् ॥

10.043.04a vayo na vṛkṣaṁ supalāśam āsadan somāsa indram mandinaś camūṣadaḥ |
10.043.04c praiṣām anīkaṁ śavasā davidyutad vidat sva1r manave jyotir āryam ||

10.043.05a कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् ।

10.043.05c न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः ॥

10.043.05a kṛtaṁ na śvaghnī vi cinoti devane saṁvargaṁ yan maghavā sūryaṁ jayat |
10.043.05c na tat te anyo anu vīryaṁ śakan na purāṇo maghavan nota nūtanaḥ ||

10.043.06a विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा ।
10.043.06c यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥

10.043.06a viśaṁ-viśam maghavā pary aśāyata janānāṁ dhenā avacākaśad vṛṣā |
10.043.06c yasyāha śakraḥ savaneṣu raṇyati sa tīvraiḥ somaiḥ sahate pṛtanyataḥ ||

10.043.07a आपो न सिन्धुमभि यत्समक्षरन्सोमास इन्द्रं कुल्या इव ह्रदम् ।
10.043.07c वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥

10.043.07a āpo na sindhum abhi yat samakṣaran somāsa indraṁ kulyā iva hradam |
10.043.07c vardhanti viprā maho asya sādane yavaṁ na vṛṣṭir divyena dānunā ||

10.043.08a वृषा न क्रुद्धः पतयद्रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः ।
10.043.08c स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते ॥

10.043.08a vṛṣā na kruddhaḥ patayad rajaḥsv ā yo aryapatnīr akṛṇod imā apaḥ |
10.043.08c sa sunvate maghavā jīradānave 'vindaj jyotir manave haviṣmate ||

10.043.09a उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
10.043.09c वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशुचीत सत्पतिः ॥

10.043.09a uj jāyatām paraśur jyotiṣā saha bhūyā ṛtasya sudughā purāṇavat |
10.043.09c vi rocatām aruṣo bhānunā śuciḥ sva1r ṇa śukraṁ śuśucīta satpatiḥ ||

10.043.10a गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
10.043.10c वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥

10.043.10a gobhiṣ ṭaremāmatiṁ durevāṁ yavena kṣudham puruhūta viśvām |
10.043.10c vayaṁ rājabhiḥ prathamā dhanāny asmākena vṛjanenā jayema ||

10.043.11a बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
10.043.11c इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥

10.043.11a bṛhaspatir naḥ pari pātu paścād utottarasmād adharād aghāyoḥ |
10.043.11c indraḥ purastād uta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu ||

10.044.01a आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।

10.044.01c प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥

10.044.01a ā yātv indraḥ svapatir madāya yo dharmaṇā tūtujānas tuviṣmān |
10.044.01c pratvakṣāṇo ati viśvā sahāṁsy apāreṇa mahatā vṛṣṇyena ||

10.044.02a सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।

10.044.02c शीभं राजन्सुपथा याह्यर्वाङ्वर्धाम ते पपुषो वृष्ण्यानि ॥

10.044.02a suṣṭhāmā rathaḥ suyamā harī te mimyakṣa vajro nṛpate gabhastau |
10.044.02c śībhaṁ rājan supathā yāhy arvāṅ vardhāma te papuṣo vṛṣṇyāni ||

10.044.03a एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम् ।

10.044.03c प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु ॥

10.044.03a endravāho nṛpatiṁ vajrabāhum ugram ugrāsas taviṣāsa enam |
10.044.03c pratvakṣasaṁ vṛṣabhaṁ satyaśuṣmam em asmatrā sadhamādo vahantu ||

10.044.04a एवा पतिं द्रोणसाचं सचेतसमूर्ज स्कम्भं धरुण आ वृषायसे ।

10.044.04c ओजः कृष्व सं गृभाय त्वे अप्यसो यथा केनिपानामिनो वृधे ॥

10.044.04a evā patiṁ droṇasācaṁ sacetasam ūrja skambhaṁ dharuṇa ā vṛṣāyase |
10.044.04c ojaḥ kṛṣva saṁ gṛbhāya tve apy aso yathā kenipānām ino vṛdhe ||

10.044.05a गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।

10.044.05c त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥

10.044.05a gamann asme vasūny ā hi śaṁsiṣaṁ svāśiṣam bharam ā yāhi sominaḥ |
10.044.05c tvam īśiṣe sāsminn ā satsi barhiṣy anādhṛṣyā tava pātrāṇi dharmaṇā ||

10.044.06a पृथक्प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।

10.044.06c न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः ॥

10.044.06a pṛthak prāyan prathamā devahūtayo 'kṛṇvata śravasyāni duṣṭarā |
10.044.06c na ye śekur yajñiyāṁ nāvam āruham īrmaiva te ny aviśanta kepayaḥ ||

10.044.07a एवैवापागपरे सन्तु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे ।

10.044.07c इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ॥

10.044.07a evaivāpāg apare santu dūḍhyo 'śvā yeṣām duryuja āyuyujre |
10.044.07c itthā ye prāg upare santi dāvane purūṇi yatra vayunāni bhojanā ||

10.044.08a गिरीँरज्रान्रेजमानाँ अधारयद्द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।

10.044.08c समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ॥

10.044.08a girīm̐r ajrān rejamānām̐ adhārayad dyauḥ krandad antarikṣāṇi kopayat |
10.044.08c samīcīne dhiṣaṇe vi ṣkabhāyati vṛṣṇaḥ pītvā mada ukthāni śaṁsati ||

10.044.09a इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवञ्छफारुजः ।

10.044.09c अस्मिन्सु ते सवने अस्त्वोक्यं सुत इष्टौ मघवन्बोध्याभगः ॥

10.044.09a imam bibharmi sukṛtaṁ te aṅkuśaṁ yenārujāsi maghavañ chaphārujaḥ |
10.044.09c asmin su te savane astv okyaṁ suta iṣṭau maghavan bodhy ābhagaḥ ||

10.044.10a गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।

10.044.10c वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥

10.044.10a gobhiṣ taremāmatiṁ durevāṁ yavena kṣudham puruhūta viśvām |
10.044.10c vayaṁ rājabhiḥ prathamā dhanāny asmākena vṛjanenā jayema ||

10.044.11a बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।

10.044.11c इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥

10.044.11a bṛhaspatir naḥ pari pātu paścād utottarasmād adharād aghāyoḥ |
10.044.11c indraḥ purastād uta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu ||

10.045.01a दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।

10.045.01c तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥

10.045.01a divas pari prathamaṁ jajñe agnir asmad dvitīyam pari jātavedāḥ |
10.045.01c tṛtīyam apsu nṛmaṇā ajasram indhāna enaṁ jarate svādhīḥ ||

10.045.02a विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।

10.045.02c विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥

10.045.02a  vidmā te agne tredhā trayāṇi vidmā te dhāma vibhṛtā purutrā |
10.045.02c  vidmā te nāma paramaṁ guhā yad vidmā tam utsaṁ yata ājagantha ||

10.045.03a समुद्रे त्वा नृमणा अप्स्व१न्तर्नृचक्षा ईधे दिवो अग्न ऊधन्।

10.045.03c तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन्॥

10.045.03a  samudre tvā nṛmaṇā apsv a1ntar nṛcakṣā īdhe divo agna ūdhan |
10.045.03c  tṛtīye tvā rajasi tasthivāṁsam apām upasthe mahiṣā avardhan ||

10.045.04a अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्।

10.045.04c सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥

10.045.04a  akrandad agni stanayann iva dyauḥ kṣāmā rerihad vīrudhaḥ samañjan |
10.045.04c  sadyo jajñāno vi hīm iddho akhyad ā rodasī bhānunā bhāty antaḥ ||

10.045.05a श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः।

10.045.05c वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः॥

10.045.05a  śrīṇām udāro dharuṇo rayīṇām manīṣāṇām prārpaṇaḥ somagopāḥ |
10.045.05c  vasuḥ sūnuḥ sahaso apsu rājā vi bhāty agra uṣasām idhānaḥ ||

10.045.06a विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः।

10.045.06c वीळुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च॥

10.045.06a  viśvasya ketur bhuvanasya garbha ā rodasī apṛṇāj jāyamānaḥ |
10.045.06c  vīḻuṁ cid adrim abhinat parāyañ janā yad agnim ayajanta pañca ||

10.045.07a उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि।

10.045.07c इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्॥

10.045.07a  uśik pāvako aratiḥ sumedhā marteṣv agnir amṛto ni dhāyi |
10.045.07c  iyarti dhūmam aruṣam bharibhrad uc chukreṇa śociṣā dyām inakṣan ||

10.045.08a दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः।

10.045.08c अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः॥

10.045.08a  dṛśāno rukma urviyā vy adyaud durmarṣam āyuḥ śriye rucānaḥ |
10.045.08c  agnir amṛto abhavad vayobhir yad enaṁ dyaur janayat suretāḥ ||

10.045.09a यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।

10.045.09c प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥

10.045.09a yas te adya kṛṇavad bhadraśoce 'pūpaṁ deva ghṛtavantam agne |
10.045.09c pra taṁ naya prataraṁ vasyo acchābhi sumnaṁ devabhaktaṁ yaviṣṭha ||

10.045.10a आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।

10.045.10c प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥

10.045.10a ā tam bhaja sauśravaseṣv agna uktha-uktha ā bhaja śasyamāne |
10.045.10c priyaḥ sūrye priyo agnā bhavāty uj jātena bhinadad uj janitvaiḥ ||

10.045.11a त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि ।

10.045.11c त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥

10.045.11a tvām agne yajamānā anu dyūn viśvā vasu dadhire vāryāṇi |
10.045.11c tvayā saha draviṇam icchamānā vrajaṁ gomantam uśijo vi vavruḥ ||

10.045.12a अस्ताव्यग्निर्नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।

10.045.12c अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥

10.045.12a astāvy agnir narāṁ suśevo vaiśvānara ṛṣibhiḥ somagopāḥ |
10.045.12c adveṣe dyāvāpṛthivī huvema devā dhatta rayim asme suvīram ||

10.046.01a प्र होता जातो महान्नभोविन्नृषद्वा सीददपामुपस्थे ।

10.046.01c दधिर्यो धायि स ते वयांसि यन्ता वसूनि विधते तनूपाः ॥

10.046.01a pra hotā jāto mahān nabhovin nṛṣadvā sīdad apām upasthe |
10.046.01c dadhir yo dhāyi sa te vayāṁsi yantā vasūni vidhate tanūpāḥ ||

10.046.02a इमं विधन्तो अपां सधस्थे पशुं न नष्टं पदैरनु ग्मन् ।

10.046.02c गुहा चतन्तमुशिजो नमोभिरिच्छन्तो धीरा भृगवोऽविन्दन् ॥

10.046.02a imaṁ vidhanto apāṁ sadhasthe paśuṁ na naṣṭam padair anu gman |
10.046.02c guhā catantam uśijo namobhir icchanto dhīrā bhṛgavo 'vindan ||

10.046.03a इमं त्रितो भूर्यविन्ददिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः ।

10.046.03c स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य ॥

10.046.03a imaṁ trito bhūry avindad icchan vaibhūvaso mūrdhany aghnyāyāḥ |
10.046.03c sa śevṛdho jāta ā harmyeṣu nābhir yuvā bhavati rocanasya ||

10.046.04a मन्द्रं होतारमुशिजो नमोभिः प्राञ्चं यज्ञं नेतारमध्वराणाम् ।

10.046.04c विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु ॥

10.046.04a mandraṁ hotāram uśijo namobhiḥ prāñcaṁ yajñaṁ netāram adhvarāṇām |
10.046.04c viśām akṛṇvann aratim pāvakaṁ havyavāhaṁ dadhato mānuṣeṣu ||

10.046.05a प्र भूर्जयन्तं महां विपोधां मूरा अमूरं पुरां दर्माणम् ।

10.046.05c नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चम् ॥

10.046.05a pra bhūr jayantam mahāṁ vipodhām mūrā amūram purāṁ darmāṇam |
10.046.05c nayanto garbhaṁ vanāṁ dhiyaṁ dhur hiriśmaśruṁ nārvāṇaṁ dhanarcam ||

10.046.06a नि पस्त्यासु त्रित स्तभूयन्परिवीतो योनौ सीददन्तः ।

10.046.06c अतः संगृभ्या विशां दमूना विधर्मणायन्त्रैरीयते नॄन् ॥

10.046.06a ni pastyāsu trita stabhūyan parivīto yonau sīdad antaḥ |
10.046.06c ataḥ saṅgṛbhyā viśāṁ damūnā vidharmaṇāyantrair īyate nṝn ||

10.046.07a अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।

10.046.07c श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥

10.046.07a asyājarāso damām aritrā arcaddhūmāso agnayaḥ pāvakāḥ |
10.046.07c śvitīcayaḥ śvātrāso bhuraṇyavo vanarṣado vāyavo na somāḥ ||

10.046.08a प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः ।

10.046.08c तमायवः शुचयन्तं पावकं मन्द्रं होतारं दधिरे यजिष्ठम् ॥

10.046.08a pra jihvayā bharate vepo agniḥ pra vayunāni cetasā pṛthivyāḥ |
10.046.08c tam āyavaḥ śucayantam pāvakam mandraṁ hotāraṁ dadhire yajiṣṭham ||

10.046.09a द्यावा यमग्निं पृथिवी जनिष्टामापस्त्वष्टा भृगवो यं सहोभिः ।

10.046.09c ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रम् ॥

10.046.09a dyāvā yam agnim pṛthivī janiṣṭām āpas tvaṣṭā bhṛgavo yaṁ sahobhiḥ |

10.046.09c īḷenyam prathamam mātariśvā devās tatakṣur manave yajatram ||

10.046.10a यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रम् ।

10.046.10c स यामन्नग्ने स्तुवते वयो धाः प्र देवयन्यशसः सं हि पूर्वीः ॥

10.046.10a yaṁ tvā devā dadhire havyavāham puruspṛho mānuṣāso yajatram |
10.046.10c sa yāmann agne stuvate vayo dhāḥ pra devayan yaśasaḥ saṁ hi pūrvīḥ ||

10.047.01a जगृभ्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।

10.047.01c विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.01a jagṛbhmā te dakṣiṇam indra hastaṁ vasūyavo vasupate vasūnām |
10.047.01c vidmā hi tvā gopatiṁ śūra gonām asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.02a स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।

10.047.02c चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.02a svāyudhaṁ svavasaṁ sunīthaṁ catuḥsamudraṁ dharuṇaṁ rayīṇām |
10.047.02c carkṛtyaṁ śaṁsyam bhūrivāram asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.03a सुब्रह्माणं देववन्तं बृहन्तमुरुं गभीरं पृथुबुध्नमिन्द्र ।

10.047.03c श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.03a subrahmāṇaṁ devavantam bṛhantam uruṁ gabhīram pṛthubudhnam indra |
10.047.03c śrutarṣim ugram abhimātiṣāham asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.04a सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम् ।

10.047.04c दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.04a sanadvājaṁ vipravīraṁ tarutraṁ dhanaspṛtaṁ śūśuvāṁsaṁ sudakṣam |
10.047.04c dasyuhanam pūrbhidam indra satyam asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.05a अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र ।

10.047.05c भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.05a aśvāvantaṁ rathinaṁ vīravantaṁ sahasriṇaṁ śatinaṁ vājam indra |
10.047.05c bhadravrātaṁ vipravīraṁ svarṣām asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.06a प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति ।

10.047.06c य आङ्गिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.06a pra saptagum ṛtadhītiṁ sumedhām bṛhaspatim matir acchā jigāti |
10.047.06c ya āṅgiraso namasopasadyo 'smabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.07a वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः ।

10.047.07c हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.07a vanīvāno mama dūtāsa indraṁ stomāś caranti sumatīr iyānāḥ |
10.047.07c hṛdispṛśo manasā vacyamānā asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.047.08a यत्त्वा यामि दद्धि तन्न इन्द्र बृहन्तं क्षयमसमं जनानाम् ।

10.047.08c अभि तद्द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.047.08a yat tvā yāmi daddhi tan na indra bṛhantaṁ kṣayam asamaṁ janānām |
10.047.08c abhi tad dyāvāpṛthivī gṛṇītām asmabhyaṁ citraṁ vṛṣaṇaṁ rayiṁ dāḥ ||

10.048.01a अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।

10.048.01c मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम् ॥

10.048.01a aham bhuvaṁ vasunaḥ pūrvyas patir ahaṁ dhanāni saṁ jayāmi śaśvataḥ |
10.048.01c māṁ havante pitaraṁ na jantavo 'haṁ dāśuṣe vi bhajāmi bhojanam ||

10.048.02a अहमिन्द्रो रोधो वक्षो अथर्वणस्त्रिताय गा अजनयमहेरधि ।

10.048.02c अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन्दधीचे मातरिश्वने ॥

10.048.02a aham indro rodho vakṣo atharvaṇas tritāya gā ajanayam aher adhi |
10.048.02c ahaṁ dasyubhyaḥ pari nṛmṇam ā dade gotrā śikṣan dadhīce mātariśvane ||

10.048.03a मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम् ।

10.048.03c ममानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च ॥

10.048.03a mahyaṁ tvaṣṭā vajram atakṣad āyasam mayi devāso 'vṛjann api kratum |
10.048.03c mamānīkaṁ sūryasyeva duṣṭaram mām āryanti kṛtena kartvena ca ||

10.048.04a अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययम् ।

10.048.04c पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः ॥

10.048.04a aham etaṁ gavyayam aśvyam paśum purīṣiṇaṁ sāyakenā hiraṇyayam |
10.048.04c purū sahasrā ni śiśāmi dāśuṣe yan mā somāsa ukthino amandiṣuḥ ||

10.048.05a अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽव तस्थे कदा चन ।

10.048.05c सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ॥

10.048.05a aham indro na parā jigya id dhanaṁ na mṛtyave 'va tasthe kadā cana |
10.048.05c somam in mā sunvanto yācatā vasu na me pūravaḥ sakhye riṣāthana ||

10.048.06a अहमेताञ्छाश्वसतो द्वाद्वेन्द्रं ये वज्रं युधयेऽकृण्वत ।

10.048.06c आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्ननमस्युर्नमस्विनः ॥

10.048.06a aham etāñ chāśvasato dvā-dvendraṁ ye vajraṁ yudhaye 'kṛṇvata |
10.048.06c āhvayamānām̐ ava hanmanāhanaṁ dṛḷhā vadann anamasyur namasvinaḥ ||

10.048.07a अभी३दमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति ।

10.048.07c खले न पर्षान्प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः ॥

10.048.07a abhī3dam ekam eko asmi niṣṣāḷ abhī dvā kim u trayaḥ karanti |
10.048.07c khale na parṣān prati hanmi bhūri kim mā nindanti śatravo 'nindrāḥ ||

10.048.08a अहं गुङ्गुभ्यो अतिथिग्वमिष्करमिषं न वृत्रतुरं विक्षु धारयम् ।

10.048.08c यत्पर्णयघ्न उत वा करञ्जहे प्राहं महे वृत्रहत्ये अशुश्रवि ॥

10.048.08a ahaṁ guṅgubhyo atithigvam iṣkaram iṣaṁ na vṛtraturaṁ vikṣu dhārayam |
10.048.08c yat parṇayaghna uta vā karañjahe prāham mahe vṛtrahatye aśuśravi ||

10.048.09a प्र मे नमी साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत द्विता ।

10.048.09c दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करम् ॥

10.048.09a pra me namī sāpya iṣe bhuje bhūd gavām eṣe sakhyā kṛṇuta dvitā |
10.048.09c didyuṁ yad asya samitheṣu maṁhayam ād id enaṁ śaṁsyam ukthyaṁ karam ||

10.048.10a प्र नेमस्मिन्ददृशे सोमो अन्तर्गोपा नेममाविरस्था कृणोति ।

10.048.10c स तिग्मशृङ्गं वृषभं युयुत्सन्द्रुहस्तस्थौ बहुले बद्धो अन्तः ॥

10.048.10a pra nemasmin dadṛśe somo antar gopā nemam āvir asthā kṛṇoti |

10.048.10c sa tigmaśṛṅgaṁ vṛṣabhaṁ yuyutsan druhas tasthau bahule baddho antaḥ ||

10.048.11a आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम ।

10.048.11c ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हम् ॥

10.048.11a ādityānāṁ vasūnāṁ rudriyāṇāṁ devo devānāṁ na mināmi dhāma |
10.048.11c te mā bhadrāya śavase tatakṣur aparājitam astṛtam aṣāḷham ||

10.049.01a अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनम् ।

10.049.01c अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे ॥

10.049.01a ahaṁ dāṁ gṛṇate pūrvyaṁ vasv aham brahma kṛṇavam mahyaṁ vardhanam |
10.049.01c aham bhuvaṁ yajamānasya coditāyajvanaḥ sākṣi viśvasmin bhare ||

10.049.02a मां धुरिन्द्रं नाम देवता दिवश्च ग्मश्चापां च जन्तवः ।

10.049.02c अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे ॥

10.049.02a māṁ dhur indraṁ nāma devatā divaś ca gmaś cāpāṁ ca jantavaḥ |
10.049.02c ahaṁ harī vṛṣaṇā vivratā raghū ahaṁ vajraṁ śavase dhṛṣṇv ā dade ||

10.049.03a अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः ।

10.049.03c अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे ॥

10.049.03a aham atkaṁ kavaye śiśnathaṁ hathair ahaṁ kutsam āvam ābhir ūtibhiḥ |
10.049.03c ahaṁ śuṣṇasya śnathitā vadhar yamaṁ na yo rara āryaṁ nāma dasyave ||

10.049.04a अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् ।

10.049.04c अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥

10.049.04a aham piteva vetasūm̐r abhiṣṭaye tugraṁ kutsāya smadibhaṁ ca randhayam |
10.049.04c aham bhuvaṁ yajamānasya rājani pra yad bhare tujaye na priyādhṛṣe ||

10.049.05a अहं रन्धयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् ।

10.049.05c अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरन्धयम् ॥

10.049.05a ahaṁ randhayam mṛgayaṁ śrutarvaṇe yan mājihīta vayunā canānuṣak |
10.049.05c ahaṁ veśaṁ namram āyave 'karam ahaṁ savyāya paḍgṛbhim arandhayam ||

10.049.06a अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम् ।

10.049.06c यद्वर्धयन्तं प्रथयन्तमानुषग्दूरे पारे रजसो रोचनाकरम् ॥

10.049.06a aham sa yo navavāstvam bṛhadratham sam vṛtreva dāsam vṛtrahārujam |
10.049.06c yad vardhayantam prathayantam ānuṣag dūre pāre rajaso rocanākaram ||

10.049.07a अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा ।

10.049.07c यन्मा सावो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः ॥

10.049.07a aham sūryasya pari yāmy āśubhiḥ praitaśebhir vahamāna ojasā |
10.049.07c yan mā sāvo manuṣa āha nirṇija ṛdhak kṛṣe dāsam kṛtvyam hathaiḥ ||

10.049.08a अहं सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम् ।

10.049.08c अहं न्य१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयम् ॥

10.049.08a aham saptahā nahuṣo nahuṣṭaraḥ prāśrāvayam śavasā turvaśam yadum |
10.049.08c aham ny a1nyam sahasā sahas karam nava vrādhato navatim ca vakṣayam ||

10.049.09a अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि ।

10.049.09c अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये ॥

10.049.09a aham sapta sravato dhārayam vṛṣā dravitnvaḥ pṛthivyām sīrā adhi |
10.049.09c aham arṇāṁsi vi tirāmi sukratur yudhā vidam manave gātum iṣṭaye ||

10.049.10a अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत् ।

10.049.10c स्पार्हं गवामूधःसु वक्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरम् ॥

10.049.10a aham tad āsu dhārayam yad āsu na devaś cana tvaṣṭādhārayad ruśat |
10.049.10c spārham gavām ūdhaḥsu vakṣaṇāsv ā madhor madhu śvātryam somam āśiram ||

10.049.11a एवा देवाँ इन्द्रो विव्ये नॄन्प्र च्यौत्नेन मघवा सत्यराधाः ।

10.049.11c विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणन्ति ॥

10.049.11a evā devām̐ indro vivye nṝn pra cyautnena maghavā satyarādhāḥ |
10.049.11c viśvet tā te harivaḥ śacīvo 'bhi turāsaḥ svayaśo gṛṇanti ||

10.050.01a प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।

10.050.01c इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥

10.050.01a pra vo mahe mandamānāyāndhaso 'rcā viśvānarāya viśvābhuve |
10.050.01c indrasya yasya sumakhaṁ saho mahi śravo nṛmṇaṁ ca rodasī saparyataḥ ||

10.050.02a सो चिन्नु सख्या नर्य इन स्तुतश्चर्कृत्य इन्द्रो मावते नरे ।

10.050.02c विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मन्दसे ॥

10.050.02a so cin nu sakhyā narya ina stutaś carkṛtya indro māvate nare |
10.050.02c viśvāsu dhūrṣu vājakṛtyeṣu satpate vṛtre vāpsv a1bhi śūra mandase ||

10.050.03a के ते नर इन्द्र ये त इषे ये ते सुम्नं सधन्य१मियक्षान् ।

10.050.03c के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥

10.050.03a ke te nara indra ye ta iṣe ye te sumnaṁ sadhanya1m iyakṣān |
10.050.03c ke te vājāyāsuryāya hinvire ke apsu svāsūrvarāsu pauṁsye ||

10.050.04a भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः ।

10.050.04c भुवो नॄँश्च्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥

10.050.04a bhuvas tvam indra brahmaṇā mahān bhuvo viśveṣu savaneṣu yajñiyaḥ |
10.050.04c bhuvo nṝm̐ś cyautno viśvasmin bhare jyeṣṭhaś ca mantro viśvacarṣaṇe ||

10.050.05a अवा नु कं ज्यायान्यज्ञवनसो महीं त ओमात्रां कृष्टयो विदुः ।

10.050.05c असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा कृषे ॥

10.050.05a avā nu kaṁ jyāyān yajñavanaso mahīṁ ta omātrāṁ kṛṣṭayo viduḥ |
10.050.05c aso nu kam ajaro vardhāś ca viśved etā savanā tūtumā kṛṣe ||

10.050.06a एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे ।

10.050.06c वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः ॥

10.050.06a etā viśvā savanā tūtumā kṛṣe svayaṁ sūno sahaso yāni dadhiṣe |
10.050.06c varāya te pātraṁ dharmaṇe tanā yajño mantro brahmodyataṁ vacaḥ ||

10.050.07a ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने ।

10.050.07c प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यान्धसः ॥

10.050.07a ye te vipra brahmakṛtaḥ sute sacā vasūnāṁ ca vasunaś ca dāvane |

10.050.07c pra te sumnasya manasā pathā bhuvan made sutasya somyasyāndhasaḥ ||

10.051.01a महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः ।

10.051.01c विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥

10.051.01a mahat tad ulbaṁ sthaviraṁ tad āsīd yenāviṣṭitaḥ praviveśithāpaḥ |
10.051.01c viśvā apaśyad bahudhā te agne jātavedas tanvo deva ekaḥ ||

10.051.02a को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।

10.051.02c क्वाह मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ॥

10.051.02a ko mā dadarśa katamaḥ sa devo yo me tanvo bahudhā paryapaśyat |
10.051.02c kvāha mitrāvaruṇā kṣiyanty agner viśvāḥ samidho devayānīḥ ||

10.051.03a ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।

10.051.03c तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ॥

10.051.03a aicchāma tvā bahudhā jātavedaḥ praviṣṭam agne apsv oṣadhīṣu |
10.051.03c taṁ tvā yamo acikec citrabhāno daśāntaruṣyād atirocamānam ||

10.051.04a होत्रादहं वरुण बिभ्यदायं नेदेव मा युनजन्नत्र देवाः ।

10.051.04c तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥

10.051.04a hotrād ahaṁ varuṇa bibhyad āyaṁ ned eva mā yunajann atra devāḥ |
10.051.04c tasya me tanvo bahudhā niviṣṭā etam arthaṁ na ciketāham agniḥ ||

10.051.05a एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने ।

10.051.05c सुगान्पथः कृणुहि देवयानान्वह हव्यानि सुमनस्यमानः ॥

10.051.05a ehi manur devayur yajñakāmo 'raṅkṛtyā tamasi kṣeṣy agne |
10.051.05c sugān pathaḥ kṛṇuhi devayānān vaha havyāni sumanasyamānaḥ ||

10.051.06a अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः ।

10.051.06c तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः ॥

10.051.06a agneḥ pūrve bhrātaro artham etaṁ rathīvādhvānam anv āvarīvuḥ |
10.051.06c tasmād bhiyā varuṇa dūram āyaṁ gauro na kṣepnor avije jyāyāḥ ||

10.051.07a कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।

10.051.07c अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥

10.051.07a kurmas ta āyur ajaraṁ yad agne yathā yukto jātavedo na riṣyāḥ |
10.051.07c athā vahāsi sumanasyamāno bhāgaṁ devebhyo haviṣaḥ sujāta ||

10.051.08a प्रयाजान्मे अनुयाजाँश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।

10.051.08c घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥

10.051.08a prayājān me anuyājām̐ś ca kevalān ūrjasvantaṁ haviṣo datta bhāgam |
10.051.08c ghṛtaṁ cāpām puruṣaṁ cauṣadhīnām agneś ca dīrgham āyur astu devāḥ ||

10.051.09a तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः ।

10.051.09c तवाग्ने यज्ञो३ऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः ॥

10.051.09a tava prayājā anuyājāś ca kevala ūrjasvanto haviṣaḥ santu bhāgāḥ |
10.051.09c tavāgne yajño3 'yam astu sarvas tubhyaṁ namantām pradiśaś catasraḥ ||

10.052.01a विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य ।

10.052.01c प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥

10.052.01a viśve devāḥ śāstana mā yatheha hotā vṛto manavai yan niṣadya |
10.052.01c pra me brūta bhāgadheyaṁ yathā vo yena pathā havyam ā vo vahāni ||

10.052.02a अहं होता न्यसीदं यजीयान्विश्वे देवा मरुतो मा जुनन्ति ।

10.052.02c अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम् ॥

10.052.02a ahaṁ hotā ny asīdaṁ yajīyān viśve devā maruto mā junanti |
10.052.02c ahar-ahar aśvinādhvaryavaṁ vām brahmā samid bhavati sāhutir vām ||

10.052.03a अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः ।

10.052.03c अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम् ॥

10.052.03a ayaṁ yo hotā kir u sa yamasya kam apy ūhe yat samañjanti devāḥ |
10.052.03c ahar-ahar jāyate māsi-māsy athā devā dadhire havyavāham ||

10.052.04a मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।

10.052.04c अग्निर्विद्वान्यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम् ॥

10.052.04a māṁ devā dadhire havyavāham apamluktam bahu kṛcchrā carantam |
10.052.04c agnir vidvān yajñaṁ naḥ kalpayāti pañcayāmaṁ trivṛtaṁ saptatantum ||

10.052.05a आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि ।

10.052.05c आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥

10.052.05a ā vo yakṣy amṛtatvaṁ suvīraṁ yathā vo devā varivaḥ karāṇi |
10.052.05c ā bāhvor vajram indrasya dheyām athemā viśvāḥ pṛtanā jayāti ||

10.052.06a त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।

10.052.06c औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥

10.052.06a trīṇi śatā trī sahasrāṇy agniṁ triṁśac ca devā nava cāsaparyan |
10.052.06c aukṣan ghṛtair astṛṇan barhir asmā ād id dhotāraṁ ny asādayanta ||

10.053.01a यमैच्छाम मनसा सो३ऽयमागाद्यज्ञस्य विद्वान्परुषश्चिकित्वान् ।

10.053.01c स नो यक्षद्देवताता यजीयान्नि हि षत्सदन्तरः पूर्वो अस्मत् ॥

10.053.01a yam aicchāma manasā so3 'yam āgād yajñasya vidvān paruṣaś cikitvān |
10.053.01c sa no yakṣad devatātā yajīyān ni hi ṣatsad antaraḥ pūrvo asmat ||

10.053.02a अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।

10.053.02c यजामहै यज्ञियान्हन्त देवाँ ईळामहा ईड्याँ आज्येन ॥

10.053.02a arādhi hotā niṣadā yajīyān abhi prayāṁsi sudhitāni hi khyat |
10.053.02c yajāmahai yajñiyān hanta devāṁ īlāmahā īḍyāṁ ājyena ||

10.053.03a साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।

10.053.03c स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥

10.053.03a sādhvīm akar devavītiṁ no adya yajñasya jihvām avidāma guhyām |
10.053.03c sa āyur āgāt surabhir vasāno bhadrām akar devahūtiṁ no adya ||

10.053.04a तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।

10.053.04c ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥

10.053.04a tad adya vācaḥ prathamam masīya yenāsurām̐ abhi devā asāma |
10.053.04c ūrjāda uta yajñiyāsaḥ pañca janā mama hotraṁ juṣadhvam ||

10.053.05a पञ्च जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः ।
10.053.05c पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥

10.053.05a pañca janā mama hotraṁ juṣantāṁ gojātā uta ye yajñiyāsaḥ |
10.053.05c pṛthivī naḥ pārthivāt pātv aṁhaso 'ntarikṣaṁ divyāt pātv asmān ||

10.053.06a तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
10.053.06c अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥

10.053.06a tantuṁ tanvan rajaso bhānum anv ihi jyotiṣmataḥ patho rakṣa dhiyā kṛtān |
10.053.06c anulbaṇaṁ vayata joguvām apo manur bhava janayā daivyaṁ janam ||

10.053.07a अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
10.053.07c अष्टावन्धुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियम् ॥

10.053.07a akṣānaho nahyatanota somyā iṣkṛṇudhvaṁ raśanā ota piṁśata |
10.053.07c aṣṭāvandhuraṁ vahatābhito rathaṁ yena devāso anayann abhi priyam ||

10.053.08a अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
10.053.08c अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान् ॥

10.053.08a aśmanvatī rīyate saṁ rabhadhvam ut tiṣṭhata pra taratā sakhāyaḥ |
10.053.08c atrā jahāma ye asann aśevāḥ śivān vayam ut taremābhi vājān ||

10.053.09a त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा देवपानानि शंतमा ।
10.053.09c शिशीते नूनं परशुं स्वायसं येन वृश्चादेतशो ब्रह्मणस्पतिः ॥

10.053.09a tvaṣṭā māyā ved apasām apastamo bibhrat pātrā devapānāni śantamā |
10.053.09c śiśīte nūnam paraśuṁ svāyasaṁ yena vṛścād etaśo brahmaṇas patiḥ ||

10.053.10a सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ ।
10.053.10c विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः ॥

10.053.10a sato nūnaṁ kavayaḥ saṁ śiśīta vāśībhir yābhir amṛtāya takṣatha |
10.053.10c vidvāṁsaḥ padā guhyāni kartana yena devāso amṛtatvam ānaśuḥ ||

10.053.11a गर्भे योषामदधुर्वत्समासन्यपीच्येन मनसोत जिह्वया ।

10.053.11c स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिम् ॥

10.053.11a garbhe yoṣām adadhur vatsam āsany apīcyena manasota jihvayā |
10.053.11c sa viśvāhā sumanā yogyā abhi siṣāsanir vanate kāra ij jitim ||

10.054.01a तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोदसी अह्वयेताम् ।

10.054.01c प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इन्द्र ॥

10.054.01a tāṁ su te kīrtim maghavan mahitvā yat tvā bhīte rodasī ahvayetām |
10.054.01c prāvo devām̐ ātiro dāsam ojaḥ prajāyai tvasyai yad aśikṣa indra ||

10.054.02a यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।

10.054.02c मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ॥

10.054.02a yad acaras tanvā vāvṛdhāno balānīndra prabruvāṇo janeṣu |
10.054.02c māyet sā te yāni yuddhāny āhur nādya śatruṁ nanu purā vivitse ||

10.054.03a क उ नु ते महिमनः समस्यास्मत्पूर्व ऋषयोऽन्तमापुः ।

10.054.03c यन्मातरं च पितरं च साकमजनयथास्तन्वः१ स्वायाः ॥

10.054.03a ka u nu te mahimanaḥ samasyāsmat pūrva ṛṣayo 'ntam āpuḥ |
10.054.03c yan mātaraṁ ca pitaraṁ ca sākam ajanayathās tanva1ḥ svāyāḥ ||

10.054.04a चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य सन्ति ।

10.054.04c त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ ॥

10.054.04a catvāri te asuryāṇi nāmādābhyāni mahiṣasya santi |
10.054.04c tvam aṅga tāni viśvāni vitse yebhiḥ karmāṇi maghavañ cakartha ||

10.054.05a त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि ।

10.054.05c काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता ॥

10.054.05a tvaṁ viśvā dadhiṣe kevalāni yāny āvir yā ca guhā vasūni |
10.054.05c kāmam in me maghavan mā vi tārīs tvam ājñātā tvam indrāsi dātā ||

10.054.06a यो अदधाज्ज्योतिषि ज्योतिरन्तर्यो असृजन्मधुना सं मधूनि ।

10.054.06c अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि ॥

10.054.06a yo adadhāj jyotiṣi jyotir antar yo asṛjan madhunā sam madhūni |
10.054.06c adha priyaṁ śūṣam indrāya manma brahmakṛto bṛhadukthād avāci ||

10.055.01a दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्वयेतां वयोधै ।

10.055.01c उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः ॥

10.055.01a dūre tan nāma guhyam parācair yat tvā bhīte ahvayetāṁ vayodhai |
10.055.01c ud astabhnāḥ pṛthivīṁ dyām abhīke bhrātuḥ putrān maghavan titviṣāṇaḥ ||

10.055.02a महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यम् ।

10.055.02c प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पञ्च ॥

10.055.02a mahat tan nāma guhyam puruspṛg yena bhūtaṁ janayo yena bhavyam |
10.055.02c pratnaṁ jātaṁ jyotir yad asya priyam priyāḥ sam aviśanta pañca ||

10.055.03a आ रोदसी अपृणादोत मध्यं पञ्च देवाँ ऋतुशः सप्तसप्त ।

10.055.03c चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥

10.055.03a ā rodasī apṛṇād ota madhyam pañca devām̐ ṛtuśaḥ sapta-sapta |
10.055.03c catustriṁśatā purudhā vi caṣṭe sarūpeṇa jyotiṣā vivratena ||

10.055.04a यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टम् ।

10.055.04c यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् ॥

10.055.04a yad uṣa aucchaḥ prathamā vibhānām ajanayo yena puṣṭasya puṣṭam |
10.055.04c yat te jāmitvam avaram parasyā mahan mahatyā asuratvam ekam ||

10.055.05a विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।

10.055.05c देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥

10.055.05a vidhuṁ dadrāṇaṁ samane bahūnāṁ yuvānaṁ santam palito jagāra |
10.055.05c devasya paśya kāvyam mahitvādyā mamāra sa hyaḥ sam āna ||

10.055.06a शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः ।

10.055.06c यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥

10.055.06a śākmanā śāko aruṇaḥ suparṇa ā yo mahaḥ śūraḥ sanād anīlaḥ |
10.055.06c yac ciketa satyam it tan na mogham vasu spārham uta jetota dātā ||

10.055.07a ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।

10.055.07c ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥

10.055.07a aibhir dade vṛṣṇyā pauṁsyāni yebhir aukṣad vṛtrahatyāya vajrī |
10.055.07c ye karmaṇaḥ kriyamāṇasya mahna ṛtekarmam udajāyanta devāḥ ||

10.055.08a युजा कर्माणि जनयन्विश्वौजा अशस्तिहा विश्वमनास्तुराषाट् ।

10.055.08c पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद्दस्यून् ॥

10.055.08a yujā karmāṇi janayan viśvaujā aśastihā viśvamanās turāṣāṭ |
10.055.08c pītvī somasya diva ā vṛdhānaḥ śūro nir yudhādhamad dasyūn ||

10.056.01a इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।

10.056.01c संवेशने तन्व१श्चारुरेधि प्रियो देवानां परमे जनित्रे ॥

10.056.01a idaṁ ta ekam para ū ta ekaṁ tṛtīyena jyotiṣā saṁ viśasva |
10.056.01c saṁveśane tanva1ś cārur edhi priyo devānām parame janitre ||

10.056.02a तनूष्टे वाजिन्तन्वं१ नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम् ।

10.056.02c अह्रुतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा मिमीयाः ॥

10.056.02a tanūṣ ṭe vājin tanvaṁ1 nayantī vāmam asmabhyaṁ dhātu śarma tubhyam |
10.056.02c ahruto maho dharuṇāya devān divīva jyotiḥ svam ā mimīyāḥ ||

10.056.03a वाज्यसि वाजिनेना सुवेनीः सुवित स्तोमं सुवितो दिवं गाः ।

10.056.03c सुवितो धर्म प्रथमानु सत्या सुवितो देवान्सुवितोऽनु पत्म ॥

10.056.03a vājy asi vājinenā suvenīḥ suvita stomaṁ suvito divaṁ gāḥ |
10.056.03c suvito dharma prathamānu satyā suvito devān suvito 'nu patma ||

10.056.04a महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम् ।

10.056.04c समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः ॥

10.056.04a mahimna eṣām pitaraś caneśire devā deveṣv adadhur api kratum |
10.056.04c sam avivyacur uta yāny atviṣur aiṣāṁ tanūṣu ni viviśuḥ punaḥ ||

10.056.05a सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।

10.056.05c तनूषु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥

10.056.05a sahobhir viśvam pari cakramū rajaḥ pūrvā dhāmāny amitā mimānāḥ |
10.056.05c tanūṣu viśvā bhuvanā ni yemire prāsārayanta purudha prajā anu ||

10.056.06a द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।

10.056.06c स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ॥

10.056.06a dvidhā sūnavo 'suraṁ svarvidam āsthāpayanta tṛtīyena karmaṇā |
10.056.06c svām prajām pitaraḥ pitryaṁ saha āvareṣv adadhus tantum ātatam ||

10.056.07a नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।

10.056.07c स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥

10.056.07a nāvā na kṣodaḥ pradiśaḥ pṛthivyāḥ svastibhir ati durgāṇi viśvā |
10.056.07c svām prajām bṛhaduktho mahitvāvareṣv adadhād ā pareṣu ||

10.057.01a मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः ।

10.057.01c मान्त स्थुर्नो अरातयः ॥

10.057.01a mā pra gāma patho vayam mā yajñād indra sominaḥ |
10.057.01c mānta sthur no arātayaḥ ||

10.057.02a यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः ।

10.057.02c तमाहुतं नशीमहि ॥

10.057.02a yo yajñasya prasādhanas tantur deveṣv ātataḥ |
10.057.02c tam āhutaṁ naśīmahi ||

10.057.03a मनो न्वा हुवामहे नाराशंसेन सोमेन ।

10.057.03c पितृणां च मन्मभिः ॥

10.057.03a mano nv ā huvāmahe nārāśaṁsena somena |
10.057.03c pitṝṇāṁ ca manmabhiḥ ||

10.057.04a आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।

10.057.04c ज्योक्च सूर्यं दृशे ॥

10.057.04a ā ta etu manaḥ punaḥ kratve dakṣāya jīvase |
10.057.04c jyok ca sūryaṁ dṛśe ||

10.057.05a पुनर्नः पितरो मनो ददातु दैव्यो जनः ।

10.057.05c जीवं व्रातं सचेमहि ॥

10.057.05a punar naḥ pitaro mano dadātu daivyo janaḥ |
10.057.05c jīvaṁ vrātaṁ sacemahi ||

10.057.06a वयं सोम व्रते तव मनस्तनूषु बिभ्रतः ।

10.057.06c प्रजावन्तः सचेमहि ॥

10.057.06a vayaṁ soma vrate tava manas tanūṣu bibhrataḥ |
10.057.06c prajāvantaḥ sacemahi ||

10.058.01a यत्ते यमं वैवस्वतं मनो जगाम दूरकम् ।

10.058.01c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.01a yat te yamaṁ vaivasvatam mano jagāma dūrakam |
10.058.01c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.02a यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकम् ।

10.058.02c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.02a yat te divaṁ yat pṛthivīm mano jagāma dūrakam |
10.058.02c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.03a यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकम् ।

10.058.03c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.03a yat te bhūmiṁ caturbhṛṣṭim mano jagāma dūrakam |
10.058.03c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.04a यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम् ।

10.058.04c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.04a yat te catasraḥ pradiśo mano jagāma dūrakam |
10.058.04c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.05a यत्ते समुद्रमर्णवं मनो जगाम दूरकम् ।
10.058.05c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.05a yat te samudram arṇavam mano jagāma dūrakam |
10.058.05c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.06a यत्ते मरीचीः प्रवतो मनो जगाम दूरकम् ।
10.058.06c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.06a yat te marīcīḥ pravato mano jagāma dūrakam |
10.058.06c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.07a यत्ते अपो यदोषधीर्मनो जगाम दूरकम् ।
10.058.07c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.07a yat te apo yad oṣadhīr mano jagāma dūrakam |
10.058.07c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.08a यत्ते सूर्यं यदुषसं मनो जगाम दूरकम् ।
10.058.08c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.08a yat te sūryaṁ yad uṣasam mano jagāma dūrakam |
10.058.08c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.09a यत्ते पर्वतान्बृहतो मनो जगाम दूरकम् ।
10.058.09c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.09a yat te parvatān bṛhato mano jagāma dūrakam |
10.058.09c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.10a यत्ते विश्वमिदं जगन्मनो जगाम दूरकम् ।
10.058.10c तत्त आ वर्तयामसीह क्षयाय जीवसे ॥

10.058.10a yat te viśvam idaṁ jagan mano jagāma dūrakam |
10.058.10c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.11a यत्ते परा॒ः परा॒वतो॒ मनो॒ जगाम॒ दूर॒कम् ।

10.058.11c तत्त॒ आ वर्तयामस॒ीह॒ क्षया॒य जी॒वसे ॥

10.058.11a yat te parāḥ parāvato mano jagāma dūrakam |
10.058.11c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.058.12a यत्ते भू॒तं च॒ भव्यं॒ च॒ मनो॒ जगाम॒ दूर॒कम् ।

10.058.12c तत्त॒ आ वर्तयामस॒ीह॒ क्षया॒य जी॒वसे ॥

10.058.12a yat te bhūtaṁ ca bhavyaṁ ca mano jagāma dūrakam |
10.058.12c tat ta ā vartayāmasīha kṣayāya jīvase ||

10.059.01a प्र ता॒र्यायुः॑ प्रत॒रं नवी॑य॒ स्थाता॑रेव॒ क्रतु॑मता॒ रथ॑स्य ।

10.059.01c अध॒ च्यवा॑न॒ उत्त॑वी॒त्यर्थं॑ परात॒रं सु निर्ऋ॑तिर्जिहीताम् ॥

10.059.01a pra tāry āyuḥ prataraṁ navīya sthātāreva kratumatā rathasya |
10.059.01c adha cyavāna ut tavīty artham parātaraṁ su nirṛtir jihītām ||

10.059.02a साम॒न्नु रा॒ये नि॑धि॒मन्न्वन्नं॒ करा॑महे॒ सु पु॑रु॒ध श्रवां॑सि ।

10.059.02c ता नो॒ विश्वा॑नि जरि॒ता म॑मत्तु परात॒रं सु निर्ऋ॑तिर्जिहीताम् ॥

10.059.02a sāman nu rāye nidhiman nv annaṁ karāmahe su purudha śravāṁsi |
10.059.02c tā no viśvāni jaritā mamattu parātaraṁ su nirṛtir jihītām ||

10.059.03a अ॒भी ष्व॒र्यः पौंस्यै॑र्भवेम॒ द्यौर्न भूमिं॑ गि॒रयो॒ नाज्रा॑न् ।

10.059.03c ता नो॒ विश्वा॑नि जरि॒ता चि॑केत परात॒रं सु निर्ऋ॑तिर्जिहीताम् ॥

10.059.03a abhī ṣv a1ryaḥ pauṁsyair bhavema dyaur na bhūmiṁ girayo nājrān |
10.059.03c tā no viśvāni jaritā ciketa parātaraṁ su nirṛtir jihītām ||

10.059.04a मो षु णः॑ सोम मृ॒त्यवे॒ परा॑ दाः॒ पश्ये॑म॒ नु सूर्य॑मु॒च्चर॑न्तम् ।

10.059.04c द्युभि॑र्हि॒तो ज॑रि॒मा सू नो॑ अस्तु परात॒रं सु निर्ऋ॑तिर्जिहीताम् ॥

10.059.04a mo ṣu ṇaḥ soma mṛtyave parā dāḥ paśyema nu sūryam uccarantam |
10.059.04c dyubhir hito jarimā sū no astu parātaraṁ su nirṛtir jihītām ||

10.059.05a असु॑नीते॒ मनो॑ अ॒स्मासु॑ धारय जी॒वात॑वे॒ सु प्र ति॑रा न॒ आयुः॑ ।

10.059.05c रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥

10.059.05a asunīte mano asmāsu dhāraya jīvātave su pra tirā na āyuḥ |
10.059.05c rārandhi naḥ sūryasya sandṛśi ghṛtena tvaṁ tanvaṁ vardhayasva ||

10.059.06a असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।

10.059.06c ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति ॥

10.059.06a asunīte punar asmāsu cakṣuḥ punaḥ prāṇam iha no dhehi bhogam |
10.059.06c jyok paśyema sūryam uccarantam anumate mṛḷayā naḥ svasti ||

10.059.07a पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।

10.059.07c पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥

10.059.07a punar no asum pṛthivī dadātu punar dyaur devī punar antarikṣam |
10.059.07c punar naḥ somas tanvaṁ dadātu punaḥ pūṣā pathyāṁ3 yā svastiḥ ||

10.059.08a शं रोदसी सुबन्धवे यह्वी ऋतस्य मातरा ।

10.059.08c भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥

10.059.08a śaṁ rodasī subandhave yahvī ṛtasya mātarā |
10.059.08c bharatām apa yad rapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ canāmamat ||

10.059.09a अव द्वके अव त्रिका दिवश्चरन्ति भेषजा ।

10.059.09c क्षमा चरिष्ण्वेककं भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥

10.059.09a ava dvake ava trikā divaś caranti bheṣajā |
10.059.09c kṣamā cariṣṇv ekakam bharatām apa yad rapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ canāmamat ||

10.059.10a समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।

10.059.10c भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥

10.059.10a sam indreraya gām anaḍvāhaṁ ya āvahad uśīnarāṇyā anaḥ |
10.059.10c bharatām apa yad rapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ canāmamat ||

10.060.01a आ जनं त्वेषसंदृशं माहीनानामुपस्तुतम् ।

10.060.01c अगन्म बिभ्रतो नमः ॥

10.060.01a ā janaṁ tveṣasandṛśam māhinānām upastutam |
10.060.01c aganma bibhrato namaḥ ||

10.060.02a असमातिं नितोशनं त्वेषं निययिनं रथम् ।

10.060.02c भजेरथस्य सत्पतिम् ॥

10.060.02a asamātiṁ nitośanaṁ tveṣaṁ niyayinaṁ ratham |
10.060.02c bhajerathasya satpatim ||

10.060.03a यो जनान्महिषाँ इवातितस्थौ पवीरवान् ।

10.060.03c उतापवीरवान्युधा ॥

10.060.03a yo janān mahiṣāṁ̐ ivātitasthau pavīravān |
10.060.03c utāpavīravān yudhā ||

10.060.04a यस्येक्ष्वाकुरुप व्रते रेवान्मराय्येधते ।

10.060.04c दिवीव पञ्च कृष्टयः ॥

10.060.04a yasyekṣvākur upa vrate revān marāyy edhate |
10.060.04c divīva pañca kṛṣṭayaḥ ||

10.060.05a इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय ।

10.060.05c दिवीव सूर्यं दृशे ॥

10.060.05a indra kṣatrāsamātiṣu rathaproṣṭheṣu dhāraya |
10.060.05c divīva sūryaṁ dṛśe ||

10.060.06a अगस्त्यस्य नद्भ्यः सप्ती युनक्षि रोहिता ।

10.060.06c पणीन्न्यक्रमीरभि विश्वान्राजन्नराधसः ॥

10.060.06a agastyasya nadbhyaḥ saptī yunakṣi rohitā |
10.060.06c paṇīn ny akramīr abhi viśvān rājann arādhasaḥ ||

10.060.07a अयं मातायं पितायं जीवातुरागमत् ।

10.060.07c इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥

10.060.07a ayam mātāyam pitāyam jīvātur āgamat |

10.060.07c idaṁ tava prasarpaṇaṁ subandhav ehi nir ihi ||

10.060.08a यथा युगं वरत्रया नह्यन्ति धरुणाय कम् ।

10.060.08c एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥

10.060.08a yathā yugaṁ varatrayā nahyanti dharuṇāya kam |
10.060.08c evā dādhāra te mano jīvātave na mṛtyave 'tho ariṣṭatātaye ||

10.060.09a यथेयं पृथिवी मही दाधारेमान्वनस्पतीन् ।

10.060.09c एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥

10.060.09a yatheyam pṛthivī mahī dādhāremān vanaspatīn |
10.060.09c evā dādhāra te mano jīvātave na mṛtyave 'tho ariṣṭatātaye ||

10.060.10a यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् ।

10.060.10c जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥

10.060.10a yamād ahaṁ vaivasvatāt subandhor mana ābharam |
10.060.10c jīvātave na mṛtyave 'tho ariṣṭatātaye ||

10.060.11a न्यग्वातोऽव वाति न्यक्तपति सूर्यः ।

10.060.11c नीचीनमघ्न्या दुहे न्यग्भवतु ते रपः ॥

10.060.11a nya1g vāto 'va vāti nyak tapati sūryaḥ |
10.060.11c nīcīnam aghnyā duhe nyag bhavatu te rapaḥ ||

10.060.12a अयं मे हस्तो भगवानयं मे भगवत्तरः ।

10.060.12c अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥

10.060.12a ayam me hasto bhagavān ayam me bhagavattaraḥ |
10.060.12c ayam me viśvabheṣajo 'yaṁ śivābhimarśanaḥ ||

10.061.01a इदमित्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्यामन्तराजौ ।

10.061.01c क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन् ॥

10.061.01a idam itthā raudraṁ gūrtavacā brahma kratvā śacyām antar ājau |
10.061.01c krāṇā yad asya pitarā maṁhaneṣṭhāḥ parṣat pakthe ahann ā sapta hotṝn ||

10.061.02a स इद्दानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिम् ।

10.061.02c तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिञ्चत् ॥

10.061.02a sa id dānāya dabhyāya vanvañ cyavānaḥ sūdair amimīta vedim |
10.061.02c tūrvayāṇo gūrtavacastamaḥ kṣodo na reta itaūti siñcat ||

10.061.03a मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।

10.061.03c आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥

10.061.03a mano na yeṣu havaneṣu tigmaṁ vipaḥ śacyā vanutho dravantā |
10.061.03c ā yaḥ śaryābhis tuvinṛmṇo asyāśrīṇītādiśaṁ gabhastau ||

10.061.04a कृष्णा यद्गोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वाम् ।

10.061.04c वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ॥

10.061.04a kṛṣṇā yad goṣv aruṇīṣu sīdad divo napātāśvinā huve vām |
10.061.04c vītam me yajñam ā gatam me annaṁ vavanvāṁsā neṣam asmṛtadhrū ||

10.061.05a प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत् ।

10.061.05c पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा ॥

10.061.05a prathiṣṭa yasya vīrakarmam iṣṇad anuṣṭhitaṁ nu naryo apauhat |
10.061.05c punas tad ā vṛhati yat kanāyā duhitur ā anubhṛtam anarvā ||

10.061.06a मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् ।

10.061.06c मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ ॥

10.061.06a madhyā yat kartvam abhavad abhīke kāmaṁ kṛṇvāne pitari yuvatyām |
10.061.06c manānag reto jahatur viyantā sānau niṣiktaṁ sukṛtasya yonau ||

10.061.07a पिता यत्स्वां दुहितरमधिष्कन्क्ष्मया रेतः संजग्मानो नि षिञ्चत् ।

10.061.07c स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥

10.061.07a pitā yat svāṁ duhitaram adhiṣkan kṣmayā retaḥ sañjagmāno ni ṣiñcat |
10.061.07c svādhyo 'janayan brahma devā vāstoṣ patiṁ vratapāṁ nir atakṣan ||

10.061.08a स ईं वृषा न फेनमस्यदाजौ स्मदा परैदप दभ्रचेताः ।

10.061.08c सरत्पदा न दक्षिणा परावृङ्न ता नु मे पृशन्यो जगृभ्रे ॥

10.061.08a sa īṁ vṛṣā na phenam asyad ājau smad ā paraid apa dabhracetāḥ |
10.061.08c sarat padā na dakṣiṇā parāvṛṅ na tā nu me pṛśanyo jagṛbhre ||

10.061.09a मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः ।

10.061.09c सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥

10.061.09a makṣū na vahniḥ prajāyā upabdir agniṁ na nagna upa sīdad ūdhaḥ |
10.061.09c sanitedhmaṁ sanitota vājaṁ sa dhartā jajñe sahasā yavīyut ||

10.061.10a मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन् ।

10.061.10c द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥

10.061.10a makṣū kanāyāḥ sakhyaṁ navagvā ṛtaṁ vadanta ṛtayuktim agman |
10.061.10c dvibarhaso ya upa gopam āgur adakṣiṇāso acyutā dudukṣan ||

10.061.11a मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् ।

10.061.11c शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥

10.061.11a makṣū kanāyāḥ sakhyaṁ navīyo rādho na reta ṛtam it turaṇyan |
10.061.11c śuci yat te rekṇa āyajanta sabardughāyāḥ paya usriyāyāḥ ||

10.061.12a पश्वा यत्पश्चा वियुता बुधन्तेति ब्रवीति वक्तरी रराणः ।

10.061.12c वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥

10.061.12a paśvā yat paścā viyutā budhanteti bravīti vaktarī rarāṇaḥ |
10.061.12c vasor vasutvā kāravo 'nehā viśvaṁ viveṣṭi draviṇam upa kṣu ||

10.061.13a तदिन्न्वस्य परिषद्वानो अग्मन्पुरू सदन्तो नार्षदं बिभित्सन् ।

10.061.13c वि शुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ॥

10.061.13a tad in nv asya pariṣadvāno agman purū sadanto nārṣadam bibhitsan |
10.061.13c vi śuṣṇasya saṅgrathitam anarvā vidat puruprajātasya guhā yat ||

10.061.14a भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः ।

10.061.14c अग्निर्ह नामोत जातवेदाः श्रुधी नो होतरृतस्य होताध्रुक् ॥

10.061.14a bhargo ha nāmota yasya devāḥ sva1r ṇa ye triṣadhasthe niṣeduḥ |

10.061.14c agnir ha nāmota jātavedāḥ śrudhī no hotar ṛtasya hotādhruk ||

10.061.15a उत त्या मे रौद्रावर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै ।

10.061.15c मनुष्वद्वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू ॥

10.061.15a uta tyā me raudrāv arcimantā nāsatyāv indra gūrtaye yajadhyai |
10.061.15c manuṣvad vṛktabarhiṣe rarāṇā mandū hitaprayasā vikṣu yajyū ||

10.061.16a अयं स्तुतो राजा वन्दि वेधा अपश्च विप्रस्तरति स्वसेतुः ।

10.061.16c स कक्षीवन्तं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥

10.061.16a ayaṁ stuto rājā vandi vedhā apaś ca vipras tarati svasetuḥ |
10.061.16c sa kakṣīvantaṁ rejayat so agniṁ nemiṁ na cakram arvato raghudru ||

10.061.17a स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै ।

10.061.17c सं यन्मित्रावरुणा वृञ्ज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥

10.061.17a sa dvibandhur vaitaraṇo yaṣṭā sabardhuṁ dhenum asvaṁ duhadhyai |
10.061.17c saṁ yan mitrāvaruṇā vṛñja ukthair jyeṣṭhebhir aryamaṇaṁ varūthaiḥ ||

10.061.18a तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।

10.061.18c सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास ॥

10.061.18a tadbandhuḥ sūrir divi te dhiyandhā nābhānediṣṭho rapati pra venan |
10.061.18c sā no nābhiḥ paramāsya vā ghāhaṁ tat paścā katithaś cid āsa ||

10.061.19a इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः ।

10.061.19c द्विजा अह प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ॥

10.061.19a iyam me nābhir iha me sadhastham ime me devā ayam asmi sarvaḥ |
10.061.19c dvijā aha prathamajā ṛtasyedaṁ dhenur aduhaj jāyamānā ||

10.061.20a अधासु मन्द्रो अरतिर्विभावाव स्यति द्विवर्तनिर्वनेषाट् ।

10.061.20c ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन्मक्षू स्थिरं शेवृधं सूत माता ॥

10.061.20a adhāsu mandro aratir vibhāvāva syati dvivartanir vaneṣāṭ |
10.061.20c ūrdhvā yac chreṇir na śiśur dan makṣū sthiraṁ śevṛdhaṁ sūta mātā ||

10.061.21a अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित्परेयुः ।

10.061.21c श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ॥

10.061.21a adhā gāva upamātiṁ kanāyā anu śvāntasya kasya cit pareyuḥ |
10.061.21c śrudhi tvaṁ sudraviṇo nas tvaṁ yāḷ āśvaghnasya vāvṛdhe sūnṛtābhiḥ ||

10.061.22a अध त्वमिन्द्र विद्ध्यस्मान्महो राये नृपते वज्रबाहुः ।

10.061.22c रक्षा च नो मघोनः पाहि सूरीननेहसस्ते हरिवो अभिष्टौ ॥

10.061.22a adha tvam indra viddhy asmān maho rāye nṛpate vajrabāhuḥ |
10.061.22c rakṣā ca no maghonaḥ pāhi sūrīn anehasas te harivo abhiṣṭau ||

10.061.23a अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः ।

10.061.23c विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान् ॥

10.061.23a adha yad rājānā gaviṣṭau sarat saraṇyuḥ kārave jaraṇyuḥ |
10.061.23c vipraḥ preṣṭhaḥ sa hy eṣām babhūva parā ca vakṣad uta parṣad enān ||

10.061.24a अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तदू नु ।

10.061.24c सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ ॥

10.061.24a adhā nv asya jenyasya puṣṭau vṛthā rebhanta īmahe tad ū nu |
10.061.24c saraṇyur asya sūnur aśvo vipraś cāsi śravasaś ca sātau ||

10.061.25a युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान् ।

10.061.25c विश्वत्र यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत्सूनृतायै ॥

10.061.25a yuvor yadi sakhyāyāsme śardhāya stomaṁ jujuṣe namasvān |
10.061.25c viśvatra yasminn ā giraḥ samīcīḥ pūrvīva gātur dāśat sūnṛtāyai ||

10.061.26a स गृणानो अद्भिर्देववानिति सुबन्धुर्नमसा सूक्तैः ।

10.061.26c वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः ॥

10.061.26a sa gṛṇāno adbhir devavān iti subandhur namasā sūktaiḥ |
10.061.26c vardhad ukthair vacobhir ā hi nūnaṁ vy adhvaiti payasa usriyāyāḥ ||

10.061.27a त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।

10.061.27c ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः ॥

10.061.27a ta ū ṣu ṇo maho yajatrā bhūta devāsa ūtaye sajoṣāḥ |

10.061.27c ye vājām̐ anayatā viyanto ye sthā nicetāro amūrāḥ ||

10.062.01a ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।

10.062.01c तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥

10.062.01a ye yajñena dakṣiṇayā samaktā indrasya sakhyam amṛtatvam ānaśa |
10.062.01c tebhyo bhadram aṅgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ ||

10.062.02a य उदाजन्पितरो गोमयं वस्वृतेनाभिन्दन्परिवत्सरे वलम् ।

10.062.02c दीर्घायुत्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥

10.062.02a ya udājan pitaro gomayaṁ vasv ṛtenābhindan parivatsare valam |
10.062.02c dīrghāyutvam aṅgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ ||

10.062.03a य ऋतेन सूर्यमारोहयन्दिव्यप्रथयन्पृथिवीं मातरं वि ।

10.062.03c सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥

10.062.03a ya ṛtena sūryam ārohayan divy aprathayan pṛthivīm mātaraṁ vi |
10.062.03c suprajāstvam aṅgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ ||

10.062.04a अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।

10.062.04c सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥

10.062.04a ayaṁ nābhā vadati valgu vo gṛhe devaputrā ṛṣayas tac chṛṇotana |
10.062.04c subrahmaṇyam aṅgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ ||

10.062.05a विरूपास इदृषयस्त इद्गम्भीरवेपसः ।

10.062.05c ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे ॥

10.062.05a virūpāsa id ṛṣayas ta id gambhīravepasaḥ |
10.062.05c te aṅgirasaḥ sūnavas te agneḥ pari jajñire ||

10.062.06a ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि ।

10.062.06c नवग्वो नु दशग्वो अङ्गिरस्तमः सचा देवेषु मंहते ॥

10.062.06a ye agneḥ pari jajñire virūpāso divas pari |
10.062.06c navagvo nu daśagvo aṅgirastamaḥ sacā deveṣu maṁhate ||

10.062.07a इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।

10.062.07c सहस्रं मे ददतो अष्टकर्ण्य१ः श्रवो देवेष्वक्रत ॥

10.062.07a indreṇa yujā niḥ sṛjanta vāghato vrajaṁ gomantam aśvinam |
10.062.07c sahasraṁ me dadato aṣṭakarṇya1ḥ śravo deveṣv akrata ||

10.062.08a प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु ।

10.062.08c यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥

10.062.08a pra nūnaṁ jāyatām ayam manus tokmeva rohatu |
10.062.08c yaḥ sahasraṁ śatāśvaṁ sadyo dānāya maṁhate ||

10.062.09a न तमश्नोति कश्चन दिव इव सान्वारभम् ।

10.062.09c सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ॥

10.062.09a na tam aśnoti kaś cana diva iva sānv ārabham |
10.062.09c sāvarṇyasya dakṣiṇā vi sindhur iva paprathe ||

10.062.10a उत दासा परिविषे स्मद्दिष्टी गोपरीणसा ।

10.062.10c यदुस्तुर्वश्च मामहे ॥

10.062.10a uta dāsā pariviṣe smaddiṣṭī goparīṇasā |
10.062.10c yadus turvaś ca māmahe ||

10.062.11a सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा ।

10.062.11c सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ॥

10.062.11a sahasradā grāmaṇīr mā riṣan manuḥ sūryeṇāsya yatamānaitu dakṣiṇā |
10.062.11c sāvarṇer devāḥ pra tirantv āyur yasminn aśrāntā asanāma vājam ||

10.063.01a परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः ।

10.063.01c ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ॥

10.063.01a parāvato ye didhiṣanta āpyam manuprītāso janimā vivasvataḥ |
10.063.01c yayāter ye nahuṣyasya barhiṣi devā āsate te adhi bruvantu naḥ ||

10.063.02a विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः ।

10.063.02c ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम् ॥

10.063.02a viśvā hi vo namasyāni vandyā nāmāni devā uta yajñiyāni vaḥ |
10.063.02c ye stha jātā aditer adbhyas pari ye pṛthivyās te ma iha śrutā havam ||

10.063.03a येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः ।

10.063.03c उक्थशुष्मान्वृषभरान्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥

10.063.03a yebhyo mātā madhumat pinvate payaḥ pīyūṣaṁ dyaur aditir adribarhāḥ |
10.063.03c ukthaśuṣmān vṛṣabharān svapnasas tām̐ ādityām̐ anu madā svastaye ||

10.063.04a नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः ।

10.063.04c ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥

10.063.04a nṛcakṣaso animiṣanto arhaṇā bṛhad devāso amṛtatvam ānaśuḥ |
10.063.04c jyotīrathā ahimāyā anāgaso divo varṣmāṇaṁ vasate svastaye ||

10.063.05a सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम् ।

10.063.05c ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥

10.063.05a samrājo ye suvṛdho yajñam āyayur aparihvṛtā dadhire divi kṣayam |
10.063.05c tām̐ ā vivāsa namasā suvṛktibhir maho ādityām̐ aditiṁ svastaye ||

10.063.06a को व स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन ।

10.063.06c को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥

10.063.06a ko va stomaṁ rādhati yaṁ jujoṣatha viśve devāso manuṣo yati ṣṭhana |
10.063.06c ko vo 'dhvaraṁ tuvijātā araṁ karad yo naḥ parṣad aty aṁhaḥ svastaye ||

10.063.07a येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः ।

10.063.07c त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥

10.063.07a yebhyo hotrām prathamām āyeje manuḥ samiddhāgnir manasā sapta hotṛbhiḥ |
10.063.07c ta ādityā abhayaṁ śarma yacchata sugā naḥ karta supathā svastaye ||

10.063.08a य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः ।

10.063.08c ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥

10.063.08a ya īśire bhuvanasya pracetaso viśvasya sthātur jagataś ca mantavaḥ |

10.063.08c te naḥ kṛtād akṛtād enasas pary adyā devāsaḥ pipṛtā svastaye ||

10.063.09a भरेष्विन्द्रं सुहवं हवामहेऽंहोमुचं सुकृतं दैव्यं जनम् ।

10.063.09c अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥

10.063.09a bhareṣv indraṁ suhavaṁ havāmahe 'ṁhomucaṁ sukṛtaṁ daivyaṁ janam |
10.063.09c agnim mitraṁ varuṇaṁ sātaye bhagaṁ dyāvāpṛthivī marutaḥ svastaye ||

10.063.10a सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।

10.063.10c दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥

10.063.10a sutrāmāṇam pṛthivīṁ dyām anehasaṁ suśarmāṇam aditiṁ supraṇītim |
10.063.10c daivīṁ nāvaṁ svaritrām anāgasam asravantīm ā ruhemā svastaye ||

10.063.11a विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।

10.063.11c सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥

10.063.11a viśve yajatrā adhi vocatotaye trāyadhvaṁ no durevāyā abhihrutaḥ |
10.063.11c satyayā vo devahūtyā huvema śṛṇvato devā avase svastaye ||

10.063.12a अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः ।

10.063.12c आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥

10.063.12a apāmīvām apa viśvām anāhutim apārātiṁ durvidatrām aghāyataḥ |
10.063.12c āre devā dveṣo asmad yuyotanoru ṇaḥ śarma yacchatā svastaye ||

10.063.13a अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।

10.063.13c यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ॥

10.063.13a ariṣṭaḥ sa marto viśva edhate pra prajābhir jāyate dharmaṇas pari |
10.063.13c yam ādityāso nayathā sunītibhir ati viśvāni duritā svastaye ||

10.063.14a यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।

10.063.14c प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ॥

10.063.14a yaṁ devāso 'vatha vājasātau yaṁ śūrasātā maruto hite dhane |
10.063.14c prātaryāvāṇaṁ ratham indra sānasim ariṣyantam ā ruhemā svastaye ||

10.063.15a स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति ।

10.063.15c स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥

10.063.15a svasti naḥ pathyāsu dhanvasu svasty apsu vṛjane svarvati |
10.063.15c svasti naḥ putrakṛtheṣu yoniṣu svasti rāye maruto dadhātana ||

10.063.16a स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।

10.063.16c सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥

10.063.16a svastir id dhi prapathe śreṣṭhā reknasvaty abhi yā vāmam eti |
10.063.16c sā no amā so araṇe ni pātu svāveśā bhavatu devagopā ||

10.063.17a एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।

10.063.17c ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥

10.063.17a evā plateḥ sūnur avīvṛdhad vo viśva ādityā adite manīṣī |
10.063.17c īśānāso naro amartyenāstāvi jano divyo gayena ||

10.064.01a कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वतां मनामहे ।

10.064.01c को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ॥

10.064.01a kathā devānāṁ katamasya yāmani sumantu nāma śṛṇvatām manāmahe |
10.064.01c ko mṛḷāti katamo no mayas karat katama ūtī abhy ā vavartati ||

10.064.02a क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।

10.064.02c न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ॥

10.064.02a kratūyanti kratavo hṛtsu dhītayo venanti venāḥ patayanty ā diśaḥ |
10.064.02c na marḍitā vidyate anya ebhyo deveṣu me adhi kāmā ayaṁsata ||

10.064.03a नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।

10.064.03c सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ॥

10.064.03a narā vā śaṁsam pūṣaṇam agohyam agniṁ deveddham abhy arcase girā |
10.064.03c sūryāmāsā candramasā yamaṁ divi tritaṁ vātam uṣasam aktum aśvinā ||

10.064.04a कथा कविस्तुवीरवान्कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।

10.064.04c अज एकपात्सुहवेभिरृक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ॥

10.064.04a kathā kavis tuvīravān kayā girā bṛhaspatir vāvṛdhate suvṛktibhiḥ |
10.064.04c aja ekapāt suhavebhir ṛkvabhir ahiḥ śṛṇotu budhnyo3 havīmani ||

10.064.05a दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।

10.064.05c अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ॥

10.064.05a dakṣasya vādite janmani vrate rājānā mitrāvaruṇā vivāsasi |
10.064.05c atūrtapanthāḥ pururatho aryamā saptahotā viṣurūpeṣu janmasu ||

10.064.06a ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।

10.064.06c सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे ॥

10.064.06a te no arvanto havanaśruto havaṁ viśve śṛṇvantu vājino mitadravaḥ |
10.064.06c sahasrasā medhasātāv iva tmanā maho ye dhanaṁ samitheṣu jabhrire ||

10.064.07a प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणम् ।

10.064.07c ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः ॥

10.064.07a pra vo vāyuṁ rathayujam purandhiṁ stomaiḥ kṛṇudhvaṁ sakhyāya pūṣaṇam |
10.064.07c te hi devasya savituḥ savīmani kratuṁ sacante sacitaḥ sacetasaḥ ||

10.064.08a त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन्पर्वताँ अग्निमूतये ।

10.064.08c कृशानुमस्तॄन्तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥

10.064.08a triḥ sapta sasrā nadyo mahīr apo vanaspatīn parvatām̐ agnim ūtaye |
10.064.08c kṛśānum astṝn tiṣyaṁ sadhastha ā rudraṁ rudreṣu rudriyaṁ havāmahe ||

10.064.09a सरस्वती सरयुः सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणीः ।

10.064.09c देवीरापो मातरः सूदयित्न्वो घृतवत्पयो मधुमन्नो अर्चत ॥

10.064.09a sarasvatī sarayuḥ sindhur ūrmibhir maho mahīr avasā yantu vakṣaṇīḥ |
10.064.09c devīr āpo mātaraḥ sūdayitnvo ghṛtavat payo madhuman no arcata ||

10.064.10a उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः ।

10.064.10c ऋभुक्षा वाजो रथस्पतिर्भगो रण्वः शंसः शशमानस्य पातु नः ॥

10.064.10a uta mātā bṛhaddivā śṛṇotu nas tvaṣṭā devebhir janibhiḥ pitā vacaḥ |
10.064.10c ṛbhukṣā vājo rathaspatir bhago raṇvaḥ śaṁsaḥ śaśamānasya pātu naḥ ||

10.064.11a रण्वः संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः ।

10.064.11c गोभिः ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ॥

10.064.11a raṇvaḥ sandṛṣṭau pitumām̐ iva kṣayo bhadrā rudrāṇām marutām upastutiḥ |
10.064.11c gobhiḥ ṣyāma yaśaso janeṣv ā sadā devāsa iḷayā sacemahi ||

10.064.12a यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र यूयम् ।

10.064.12c तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ ॥

10.064.12a yām me dhiyam maruta indra devā adadāta varuṇa mitra yūyam |
10.064.12c tām pīpayata payaseva dhenuṁ kuvid giro adhi rathe vahātha ||

10.064.13a कुविदङ्ग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ ।

10.064.13c नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु नः ॥

10.064.13a kuvid aṅga prati yathā cid asya naḥ sajātyasya maruto bubodhatha |
10.064.13c nābhā yatra prathamaṁ sannasāmahe tatra jāmitvam aditir dadhātu naḥ ||

10.064.14a ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इतः ।

10.064.14c उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिञ्चतः ॥

10.064.14a te hi dyāvāpṛthivī mātarā mahī devī devāñ janmanā yajñiye itaḥ |
10.064.14c ubhe bibhṛta ubhayam bharīmabhiḥ purū retāṁsi pitṛbhiś ca siñcataḥ ||

10.064.15a वि षा होत्रा विश्वमश्नोति वार्यं बृहस्पतिररमतिः पनीयसी ।

10.064.15c ग्रावा यत्र मधुषुदुच्यते बृहदवीवशन्त मतिभिर्मनीषिणः ॥

10.064.15a vi ṣā hotrā viśvam aśnoti vāryam bṛhaspatir aramatiḥ panīyasī |
10.064.15c grāvā yatra madhuṣud ucyate bṛhad avīvaśanta matibhir manīṣiṇaḥ ||

10.064.16a एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसश्चकानः ।

10.064.16c उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद्गयो दिव्यानि जन्म ॥

10.064.16a evā kavis tuvīravām̐ ṛtajñā draviṇasyur draviṇasaś cakānaḥ |
10.064.16c ukthebhir atra matibhiś ca vipro 'pīpayad gayo divyāni janma ||

10.064.17a एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।

10.064.17c ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥

10.064.17a evā plateḥ sūnur avīvṛdhad vo viśva ādityā adite manīṣī |
10.064.17c īśānāso naro amartyenāstāvi jano divyo gayena ||

10.065.01a अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।

10.065.01c आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥

10.065.01a agnir indro varuṇo mitro aryamā vāyuḥ pūṣā sarasvatī sajoṣasaḥ |
10.065.01c ādityā viṣṇur marutaḥ svar bṛhat somo rudro aditir brahmaṇas patiḥ ||

10.065.02a इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।

10.065.02c अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥

10.065.02a indrāgnī vṛtrahatyeṣu satpatī mitho hinvānā tanvā3 samokasā |
10.065.02c antarikṣam mahy ā paprur ojasā somo ghṛtaśrīr mahimānam īrayan ||

10.065.03a तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।

10.065.03c ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥

10.065.03a teṣāṁ hi mahnā mahatām anarvaṇāṁ stomām̐ iyarmy ṛtajñā ṛtāvṛdhām |
10.065.03c ye apsavam arṇavaṁ citrarādhasas te no rāsantām mahaye sumitryāḥ ||

10.065.04a स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा ।

10.065.04c पृक्षा इव महयन्तः सुरातयो देवा स्तवन्ते मनुषाय सूरयः ॥

10.065.04a svarṇaram antarikṣāṇi rocanā dyāvābhūmī pṛthivīṁ skambhur ojasā |
10.065.04c pṛkṣā iva mahayantaḥ surātayo devā stavante manuṣāya sūrayaḥ ||

10.065.05a मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।

10.065.05c ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥

10.065.05a mitrāya śikṣa varuṇāya dāśuṣe yā samrājā manasā na prayucchataḥ |
10.065.05c yayor dhāma dharmaṇā rocate bṛhad yayor ubhe rodasī nādhasī vṛtau ||

10.065.06a या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।

10.065.06c सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥

10.065.06a yā gaur vartanim paryeti niṣkṛtam payo duhānā vratanīr avārataḥ |
10.065.06c sā prabruvāṇā varuṇāya dāśuṣe devebhyo dāśad dhaviṣā vivasvate ||

10.065.07a दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।

10.065.07c द्यां स्कभित्व्य१प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥

10.065.07a divakṣaso agnijihvā ṛtāvṛdha ṛtasya yoniṁ vimṛśanta āsate |
10.065.07c dyāṁ skabhitvy a1pa ā cakrur ojasā yajñaṁ janitvī tanvī3 ni māmṛjuḥ ||

10.065.08a परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।

10.065.08c द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥

10.065.08a parikṣitā pitarā pūrvajāvarī ṛtasya yonā kṣayataḥ samokasā |
10.065.08c dyāvāpṛthivī varuṇāya savrate ghṛtavat payo mahiṣāya pinvataḥ ||

10.065.09a पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा ।

10.065.09c देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥

10.065.09a parjanyāvātā vṛṣabhā purīṣiṇendravāyū varuṇo mitro aryamā |
10.065.09c devām̐ ādityām̐ aditiṁ havāmahe ye pārthivāso divyāso apsu ye ||

10.065.10a त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।

10.065.10c बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥

10.065.10a tvaṣṭāraṁ vāyum ṛbhavo ya ohate daivyā hotārā uṣasaṁ svastaye |
10.065.10c bṛhaspatiṁ vṛtrakhādaṁ sumedhasam indriyaṁ somaṁ dhanasā u īmahe ||

10.065.11a ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः ।

10.065.11c सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥

10.065.11a brahma gām aśvaṁ janayanta oṣadhīr vanaspatīn pṛthivīm parvatām̐ apaḥ |
10.065.11c sūryaṁ divi rohayantaḥ sudānava āryā vratā visṛjanto adhi kṣami ||

10.065.12a भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् ।

10.065.12c कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः ॥

10.065.12a bhujyum aṁhasaḥ pipṛtho nir aśvinā śyāvam putraṁ vadhrimatyā ajinvatam |
10.065.12c kamadyuvaṁ vimadāyohathur yuvaṁ viṣṇāpvaṁ1 viśvakāyāva sṛjathaḥ ||

10.065.13a पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।

10.065.13c विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥

10.065.13a pāvīravī tanyatur ekapād ajo divo dhartā sindhur āpaḥ samudriyaḥ |
10.065.13c viśve devāsaḥ śṛṇavan vacāṁsi me sarasvatī saha dhībhiḥ purandhyā ||

10.065.14a विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः ।

10.065.14c रातिषाचो अभिषाचः स्वर्विदः स्व१र्गिरो ब्रह्म सूक्तं जुषेरत ॥

10.065.14a viśve devāḥ saha dhībhiḥ purandhyā manor yajatrā amṛtā ṛtajñāḥ |
10.065.14c rātiṣāco abhiṣācaḥ svarvidaḥ sva1r giro brahma sūktaṁ juṣerata ||

10.065.15a देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।

10.065.15c ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

10.065.15a devān vasiṣṭho amṛtān vavande ye viśvā bhuvanābhi pratasthuḥ |
10.065.15c te no rāsantām urugāyam adya yūyam pāta svastibhiḥ sadā naḥ ||

10.066.01a देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः ।

10.066.01c ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः ॥

10.066.01a devān huve bṛhacchravasaḥ svastaye jyotiṣkṛto adhvarasya pracetasaḥ |
10.066.01c ye vāvṛdhuḥ prataraṁ viśvavedasa indrajyeṣṭhāso amṛtā ṛtāvṛdhaḥ ||

10.066.02a इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः ।

10.066.02c मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ॥

10.066.02a indraprasūtā varuṇapraśiṣṭā ye sūryasya jyotiṣo bhāgam ānaśuḥ |
10.066.02c marudgaṇe vṛjane manma dhīmahi māghone yajñaṁ janayanta sūrayaḥ ||

10.066.03a इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु ।

10.066.03c रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥

10.066.03a indro vasubhiḥ pari pātu no gayam ādityair no aditiḥ śarma yacchatu |
10.066.03c rudro rudrebhir devo mṛḷayāti nas tvaṣṭā no gnābhiḥ suvitāya jinvatu ||

10.066.04a अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत् ।

10.066.04c देवाँ आदित्याँ अवसे हवामहे वसून्रुद्रान्सवितारं सुदंससम् ॥

10.066.04a aditir dyāvāpṛthivī ṛtam mahad indrāviṣṇū marutaḥ svar bṛhat |
10.066.04c devām̐ ādityām̐ avase havāmahe vasūn rudrān savitāraṁ sudaṁsasam ||

10.066.05a सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना ।

10.066.05c ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन्त्रिवरूथमंहसः ॥

10.066.05a sarasvān dhībhir varuṇo dhṛtavrataḥ pūṣā viṣṇur mahimā vāyur aśvinā |
10.066.05c brahmakṛto amṛtā viśvavedasaḥ śarma no yaṁsan trivarūtham aṁhasaḥ ||

10.066.06a वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृतः ।

10.066.06c वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥

10.066.06a vṛṣā yajño vṛṣaṇaḥ santu yajñiyā vṛṣaṇo devā vṛṣaṇo haviṣkṛtaḥ |
10.066.06c vṛṣaṇā dyāvāpṛthivī ṛtāvarī vṛṣā parjanyo vṛṣaṇo vṛṣastubhaḥ ||

10.066.07a अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।

10.066.07c यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥

10.066.07a agnīṣomā vṛṣaṇā vājasātaye purupraśastā vṛṣaṇā upa bruve |
10.066.07c yāv ījire vṛṣaṇo devayajyayā tā naḥ śarma trivarūthaṁ vi yaṁsataḥ ||

10.066.08a धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः ।

10.066.08c अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ॥

10.066.08a dhṛtavratāḥ kṣatriyā yajñaniṣkṛto bṛhaddivā adhvarāṇām abhiśriyaḥ |
10.066.08c agnihotāra ṛtasāpo adruho 'po asṛjann anu vṛtratūrye ||

10.066.09a द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया ।

10.066.09c अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजुः ॥

10.066.09a dyāvāpṛthivī janayann abhi vratāpa oṣadhīr vaninānі yajñiyā |
10.066.09c antarikṣaṁ sva1r ā paprur ūtaye vaśaṁ devāsas tanvī3 ni māmṛjuḥ ||

10.066.10a धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।

10.066.10c आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥

10.066.10a dhartāro diva ṛbhavaḥ suhastā vātāparjanyā mahiṣasya tanyatoḥ |

10.066.10c āpa oṣadhīḥ pra tirantu no giro bhago rātir vājino yantu me havam ||

10.066.11a समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः ।

10.066.11c अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥

10.066.11a samudraḥ sindhū rajo antarikṣam aja ekapāt tanayitnur arṇavaḥ |
10.066.11c ahir budhnyaḥ śṛṇavad vacāṁsi me viśve devāsa uta sūrayo mama ||

10.066.12a स्याम वो मनवो देववीतये प्राञ्चं नो यज्ञं प्र णयत साधुया ।

10.066.12c आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥

10.066.12a syāma vo manavo devavītaye prāñcaṁ no yajñam pra ṇayata sādhuyā |
10.066.12c ādityā rudrā vasavaḥ sudānava imā brahma śasyamānāni jinvata ||

10.066.13a दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।

10.066.13c क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥

10.066.13a daivyā hotārā prathamā purohita ṛtasya panthām anv emi sādhuyā |
10.066.13c kṣetrasya patim prativeśam īmahe viśvān devām̐ amṛtām̐ aprayucchataḥ ||

10.066.14a वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।

10.066.14c प्रीता इव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥

10.066.14a vasiṣṭhāsaḥ pitṛvad vācam akrata devām̐ īḻānā ṛṣivat svastaye |
10.066.14c prītā iva jñātayaḥ kāmam etyāsme devāso 'va dhūnutā vasu ||

10.066.15a देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।

10.066.15c ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

10.066.15a devān vasiṣṭho amṛtān vavande ye viśvā bhuvanābhi pratasthuḥ |
10.066.15c te no rāsantām urugāyam adya yūyam pāta svastibhiḥ sadā naḥ ||

10.067.01a इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत् ।

10.067.01c तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥

10.067.01a imāṁ dhiyaṁ saptaśīrṣṇīm pitā na ṛtaprajātām bṛhatīm avindat |
10.067.01c turīyaṁ svij janayad viśvajanyo 'yāsya uktham indrāya śaṁsan ||

10.067.02a ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।

10.067.02c विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ॥

10.067.02a ṛtaṁ śaṁsanta ṛju dīdhyānā divas putrāso asurasya vīrāḥ |
10.067.02c vipram padam aṅgiraso dadhānā yajñasya dhāma prathamam mananta ||

10.067.03a हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।

10.067.03c बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥

10.067.03a haṁsair iva sakhibhir vāvadadbhir aśmanmayāni nahanā vyasyan |
10.067.03c bṛhaspatir abhikanikradad gā uta prāstaud uc ca vidvām̐ agāyat ||

10.067.04a अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।

10.067.04c बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥

10.067.04a avo dvābhyām para ekayā gā guhā tiṣṭhantīr anṛtasya setau |
10.067.04c bṛhaspatis tamasi jyotir icchann ud usrā ākar vi hi tisra āvaḥ ||

10.067.05a विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् ।

10.067.05c बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥

10.067.05a vibhidyā puraṁ śayathem apācīṁ nis trīṇi sākam udadher akṛntat |
10.067.05c bṛhaspatir uṣasaṁ sūryaṁ gām arkaṁ viveda stanayann iva dyauḥ ||

10.067.06a इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण ।

10.067.06c स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥

10.067.06a indro valaṁ rakṣitāraṁ dughānāṁ kareṇeva vi cakartā raveṇa |
10.067.06c svedāñjibhir āśiram icchamāno 'rodayat paṇim ā gā amuṣṇāt ||

10.067.07a स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।

10.067.07c ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥

10.067.07a sa īṁ satyebhiḥ sakhibhiḥ śucadbhir godhāyasaṁ vi dhanasair adardaḥ |
10.067.07c brahmaṇas patir vṛṣabhir varāhair gharmasvedebhir draviṇaṁ vy ānaṭ ||

10.067.08a ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।

10.067.08c बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥

10.067.08a te satyena manasā gopatiṁ gā iyānāsa iṣaṇayanta dhībhiḥ |
10.067.08c bṛhaspatir mithoavadyapebhir ud usriyā asṛjata svayugbhiḥ ||

10.067.09a तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे ।

10.067.09c बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ॥

10.067.09a taṁ vardhayanto matibhiḥ śivābhiḥ siṁham iva nānadataṁ sadhasthe |
10.067.09c bṛhaspatiṁ vṛṣaṇaṁ śūrasātau bhare-bhare anu madema jiṣṇum ||

10.067.10a यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।

10.067.10c बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥

10.067.10a yadā vājam asanad viśvarūpam ā dyām arukṣad uttarāṇi sadma |
10.067.10c bṛhaspatiṁ vṛṣaṇaṁ vardhayanto nānā santo bibhrato jyotir āsā ||

10.067.11a सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।

10.067.11c पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥

10.067.11a satyām āśiṣaṁ kṛṇutā vayodhai kīriṁ cid dhy avatha svebhir evaiḥ |
10.067.11c paścā mṛdho apa bhavantu viśvās tad rodasī śṛṇutaṁ viśvaminve ||

10.067.12a इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य ।

10.067.12c अहन्नहिमरिणात्सप्त सिन्धून्देवैर्द्यावापृथिवी प्रावतं नः ॥

10.067.12a indro mahnā mahato arṇavasya vi mūrdhānam abhinad arbudasya |
10.067.12c ahann ahim ariṇāt sapta sindhūn devair dyāvāpṛthivī prāvataṁ naḥ ||

10.068.01a उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।

10.068.01c गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन् ॥

10.068.01a udapruto na vayo rakṣamāṇā vāvadato abhriyasyeva ghoṣāḥ |
10.068.01c giribhrajo normayo madanto bṛhaspatim abhy a1rkā anāvan ||

10.068.02a सं गोभिराङ्गिरसो नक्षमाणो भग इवेदर्यमणं निनाय ।

10.068.02c जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥

10.068.02a saṁ gobhir āṅgiraso nakṣamāṇo bhaga ived aryamaṇaṁ nināya |
10.068.02c jane mitro na dampatī anakti bṛhaspate vājayāśūm̐r ivājau ||

10.068.03a साध्वर्या अतिथिनीरिषिरा स्पार्हाः सुवर्णा अनवद्यरूपाः ।

10.068.03c बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ॥

10.068.03a sādhvaryā atithinīr iṣirā spārhāḥ suvarṇā anavadyarūpāḥ |
10.068.03c bṛhaspatiḥ parvatebhyo vitūryā nir gā ūpe yavam iva sthivibhyaḥ ||

10.068.04a आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।

10.068.04c बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद ॥

10.068.04a āpruṣāyan madhuna ṛtasya yonim avakṣipann arka ulkām iva dyoḥ |
10.068.04c bṛhaspatir uddharann aśmano gā bhūmyā udneva vi tvacam bibheda ||

10.068.05a अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत् ।

10.068.05c बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ॥

10.068.05a apa jyotiṣā tamo antarikṣād udnaḥ śīpālam iva vāta ājat |
10.068.05c bṛhaspatir anumṛśyā valasyābhram iva vāta ā cakra ā gāḥ ||

10.068.06a यदा वलस्य पीयतो जसुं भेद्बृहस्पतिरग्नितपोभिरर्कैः ।

10.068.06c दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम् ॥

10.068.06a yadā valasya pīyato jasum bhed bṛhaspatir agnitapobhir arkaiḥ |
10.068.06c dadbhir na jihvā pariviṣṭam ādad āvir nidhīm̐r akṛṇod usriyāṇām ||

10.068.07a बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।

10.068.07c आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ॥

10.068.07a bṛhaspatir amata hi tyad āsāṁ nāma svarīṇāṁ sadane guhā yat |
10.068.07c āṇḍeva bhittvā śakunasya garbham ud usriyāḥ parvatasya tmanājat ||

10.068.08a अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।

10.068.08c निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य ॥

10.068.08a aśnāpinaddham madhu pary apaśyan matsyaṁ na dīna udani kṣiyantam |
10.068.08c niṣ ṭaj jabhāra camasaṁ na vṛkṣād bṛhaspatir viraveṇā vikṛtya ||

10.068.09a सोषामविन्दत्स स्व१ः सो अग्निं सो अर्केण वि बबाधे तमांसि ।

10.068.09c बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥

10.068.09a soṣām avindat sa sva1ḥ so agniṁ so arkeṇa vi babādhe tamāṁsi |
10.068.09c bṛhaspatir govapuṣo valasya nir majjānaṁ na parvaṇo jabhāra ||

10.068.10a हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः ।

10.068.10c अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः ॥

10.068.10a himeva parṇā muṣitā vanāni bṛhaspatinākṛpayad valo gāḥ |
10.068.10c anānukṛtyam apunaś cakāra yāt sūryāmāsā mitha uccarātaḥ ||

10.068.11a अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।

10.068.11c रात्र्यां तमो अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिं विदद्गाः ॥

10.068.11a abhi śyāvaṁ na kṛśanebhir aśvaṁ nakṣatrebhiḥ pitaro dyām apiṁśan |
10.068.11c rātryāṁ tamo adadhur jyotir ahan bṛhaspatir bhinad adriṁ vidad gāḥ ||

10.068.12a इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।

10.068.12c बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ॥

10.068.12a idam akarma namo abhriyāya yaḥ pūrvīr anv ānonavīti |
10.068.12c bṛhaspatiḥ sa hi gobhiḥ so aśvaiḥ sa vīrebhiḥ sa nṛbhir no vayo dhāt ||

10.069.01a भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः ।

10.069.01c यदीं सुमित्रा विशो अग्र इन्धते घृतेनाहुतो जरते दविद्युतत् ॥

10.069.01a bhadrā agner vadhryaśvasya sandṛśo vāmī praṇītiḥ suraṇā upetayaḥ |
10.069.01c yad īṁ sumitrā viśo agra indhate ghṛtenāhuto jarate davidyutat ||

10.069.02a घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनम् ।

10.069.02c घृतेनाहुत उर्विया वि पप्रथे सूर्य इव रोचते सर्पिरासुतिः ॥

10.069.02a ghṛtam agner vadhryaśvasya vardhanaṁ ghṛtam annaṁ ghṛtam v asya medanam |
10.069.02c ghṛtenāhuta urviyā vi paprathe sūrya iva rocate sarpirāsutiḥ ||

10.069.03a यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीयः ।

10.069.03c स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥

10.069.03a yat te manur yad anīkaṁ sumitraḥ samīdhe agne tad idaṁ navīyaḥ |
10.069.03c sa revac choca sa giro juṣasva sa vājaṁ darṣi sa iha śravo dhāḥ ||

10.069.04a यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व ।

10.069.04c स न स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे ॥

10.069.04a yaṁ tvā pūrvam īḻito vadhryaśvaḥ samīdhe agne sa idaṁ juṣasva |
10.069.04c sa na stipā uta bhavā tanūpā dātraṁ rakṣasva yad idaṁ te asme ||

10.069.05a भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानाम् ।

10.069.05c शूर इव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम ॥

10.069.05a bhavā dyumnī vādhryaśvota gopā mā tvā tārīd abhimātir janānām |
10.069.05c śūra iva dhṛṣṇuś cyavanaḥ sumitraḥ pra nu vocaṁ vādhryaśvasya nāma ||

10.069.06a समज्र्या पर्वत्या३ वसूनि दासा वृत्राण्यार्या जिगेथ ।

10.069.06c शूर इव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः ॥

10.069.06a sam ajryā parvatyā3 vasūni dāsā vṛtrāṇy āryā jigetha |
10.069.06c śūra iva dhṛṣṇuś cyavano janānāṁ tvam agne pṛtanāyūm̐r abhi ṣyāḥ ||

10.069.07a दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋभ्वा ।

10.069.07c द्युमान्द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥

10.069.07a dīrghatantur bṛhadukṣāyam agniḥ sahasrastarīḥ śatanītha ṛbhvā |
10.069.07c dyumān dyumatsu nṛbhir mṛjyamānaḥ sumitreṣu dīdayo devayatsu ||

10.069.08a त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक् ।

10.069.08c त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः ॥

10.069.08a tve dhenuḥ sudughā jātavedo 'saścateva samanā sabardhuk |
10.069.08c tvaṁ nṛbhir dakṣiṇāvadbhir agne sumitrebhir idhyase devayadbhiḥ ||

10.069.09a देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन् ।

10.069.09c यत्सम्पृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥

10.069.09a devāś cit te amṛtā jātavedo mahimānaṁ vādhryaśva pra vocan |

10.069.09c yat sampṛccham mānuṣīr viśa āyan tvaṁ nṛbhir ajayas tvāvṛdhebhiḥ ||

10.069.10a पितेव पुत्रमबिभरुपस्थे त्वामग्ने वध्र्यश्वः सपर्यन् ।

10.069.10c जुषाणो अस्य समिधं यविष्ठोत पूर्वाँ अवनोर्व्राधतश्चित् ॥

10.069.10a piteva putram abibhar upasthe tvām agne vadhryaśvaḥ saparyan |
10.069.10c juṣāṇo asya samidhaṁ yaviṣṭhota pūrvām̐ avanor vrādhataś cit ||

10.069.11a शश्वदग्निर्वध्र्यश्वस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः ।

10.069.11c समनं चिददहश्चित्रभानोऽव व्राधन्तमभिनद्वृधश्चित् ॥

10.069.11a śaśvad agnir vadhryaśvasya śatrūn nṛbhir jigāya sutasomavadbhiḥ |
10.069.11c samanaṁ cid adahaś citrabhāno 'va vrādhantam abhinad vṛdhaś cit ||

10.069.12a अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः ।

10.069.12c स नो अजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व ॥

10.069.12a ayam agnir vadhryaśvasya vṛtrahā sanakāt preddho namasopavākyaḥ |
10.069.12c sa no ajāmīm̐r uta vā vijāmīn abhi tiṣṭha śardhato vādhryaśva ||

10.070.01a इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीम् ।

10.070.01c वर्ष्मन्पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या ॥

10.070.01a imām me agne samidhaṁ juṣasvelas pade prati haryā ghṛtācīm |
10.070.01c varṣman pṛthivyāḥ sudinatve ahnām ūrdhvo bhava sukrato devayajyā ||

10.070.02a आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः ।

10.070.02c ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत् ॥

10.070.02a ā devānām agrayāveha yātu narāśaṁso viśvarūpebhir aśvaiḥ |
10.070.02c ṛtasya pathā namasā miyedho devebhyo devatamaḥ suṣūdat ||

10.070.03a शश्वत्तममीळते दूत्याय हविष्मन्तो मनुष्यासो अग्निम् ।

10.070.03c वहिष्ठैरश्वैः सुवृता रथेना देवान्वक्षि नि षदेह होता ॥

10.070.03a śaśvattamam īlate dūtyāya haviṣmanto manuṣyāso agnim |
10.070.03c vahiṣṭhair aśvaiḥ suvṛtā rathenā devān vakṣi ni ṣadeha hotā ||

10.070.04a वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे ।

10.070.04c अहेळता मनसा देव बर्हिरिन्द्रज्येष्ठाँ उशतो यक्षि देवान् ॥

10.070.04a vi prathatāṁ devajuṣṭaṁ tiraścā dīrghaṁ drāghmā surabhi bhūtv asme |
10.070.04c ahelatā manasā deva barhir indrajyeṣṭhām̐ uśato yakṣi devān ||

10.070.05a दिवो वा सानु स्पृशता वरीयः पृथिव्या वा मात्रया वि श्रयध्वम् ।

10.070.05c उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वम् ॥

10.070.05a divo vā sānu spṛśatā varīyaḥ pṛthivyā vā mātrayā vi śrayadhvam |
10.070.05c uśatīr dvāro mahinā mahadbhir devaṁ rathaṁ rathayur dhārayadhvam ||

10.070.06a देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ ।

10.070.06c आ वां देवास उशती उशन्त उरौ सीदन्तु सुभगे उपस्थे ॥

10.070.06a devī divo duhitarā suśilpe uṣāsānaktā sadatāṁ ni yonau |
10.070.06c ā vāṁ devāsa uśatī uśanta urau sīdantu subhage upasthe ||

10.070.07a ऊर्ध्वो ग्रावा बृहदग्निः समिद्धः प्रिया धामान्यदितेरुपस्थे ।

10.070.07c पुरोहितावृत्विजा यज्ञे अस्मिन्विदुष्टरा द्रविणमा यजेथाम् ॥

10.070.07a ūrdhvo grāvā bṛhad agniḥ samiddhaḥ priyā dhāmāny aditer upasthe |
10.070.07c purohitāv ṛtvijā yajñe asmin viduṣṭarā draviṇam ā yajethām ||

10.070.08a तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनम् ।

10.070.08c मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषन्त ॥

10.070.08a tisro devīr barhir idaṁ varīya ā sīdata cakṛmā vaḥ syonam |
10.070.08c manuṣvad yajñaṁ sudhitā havīṁṣīḷā devī ghṛtapadī juṣanta ||

10.070.09a देव त्वष्टर्यद्ध चारुत्वमानड्यदङ्गिरसामभवः सचाभूः ।

10.070.09c स देवानां पाथ उप प्र विद्वाँ उशन्यक्षि द्रविणोदः सुरत्नः ॥

10.070.09a deva tvaṣṭar yad dha cārutvam ānaḍ yad aṅgirasām abhavaḥ sacābhūḥ |
10.070.09c sa devānām pātha upa pra vidvām̐ uśan yakṣi draviṇodaḥ suratnaḥ ||

10.070.10a वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान् ।

10.070.10c स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥

10.070.10a vanaspate raśanayā niyūyā devānām pātha upa vakṣi vidvān |
10.070.10c svadāti devaḥ kṛṇavad dhavīṁṣy avatāṁ dyāvāpṛthivī havam me ||

10.070.11a आग्ने वह वरुणमिष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् ।

10.070.11c सीदन्तु बर्हिर्विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् ॥

10.070.11a āgne vaha varuṇam iṣṭaye na indraṁ divo maruto antarikṣāt |
10.070.11c sīdantu barhir viśva ā yajatrāḥ svāhā devā amṛtā mādayantām ||

10.071.01a बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।

10.071.01c यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥

10.071.01a bṛhaspate prathamaṁ vāco agraṁ yat prairata nāmadheyaṁ dadhānāḥ |
10.071.01c yad eṣāṁ śreṣṭhaṁ yad aripram āsīt preṇā tad eṣāṁ nihitaṁ guhāviḥ ||

10.071.02a सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।

10.071.02c अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

10.071.02a saktum iva titaunā punanto yatra dhīrā manasā vācam akrata |
10.071.02c atrā sakhāyaḥ sakhyāni jānate bhadraiṣāṁ lakṣmīr nihitādhi vāci ||

10.071.03a यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम् ।

10.071.03c तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥

10.071.03a yajñena vācaḥ padavīyam āyan tām anv avindann ṛṣiṣu praviṣṭām |
10.071.03c tām ābhṛtyā vy adadhuḥ purutrā tāṁ sapta rebhā abhi saṁ navante ||

10.071.04a उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।

10.071.04c उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥

10.071.04a uta tvaḥ paśyan na dadarśa vācam uta tvaḥ śṛṇvan na śṛṇoty enām |
10.071.04c uto tvasmai tanvaṁ1 vi sasre jāyeva patya uśatī suvāsāḥ ||

10.071.05a उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।

10.071.05c अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥

10.071.05a uta tvaṁ sakhye sthirapītam āhur nainaṁ hinvanty api vājineṣu |
10.071.05c adhenvā carati māyayaiṣa vācaṁ śuśruvāṁ̐ aphalām apuṣpām ||

10.071.06a यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।

10.071.06c यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥

10.071.06a yas tityāja sacividaṁ sakhāyaṁ na tasya vācy api bhāgo asti |
10.071.06c yad īṁ śṛṇoty alakaṁ śṛṇoti nahi praveda sukṛtasya panthām ||

10.071.07a अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।

10.071.07c आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥

10.071.07a akṣaṇvantaḥ karṇavantaḥ sakhāyo manojaveṣv asamā babhūvuḥ |
10.071.07c ādaghnāsa upakakṣāsa u tve hradā iva snātvā u tve dadṛśre ||

10.071.08a हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः ।

10.071.08c अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ॥

10.071.08a hṛdā taṣṭeṣu manaso javeṣu yad brāhmaṇāḥ saṁyajante sakhāyaḥ |
10.071.08c atrāha tvaṁ vi jahur vedyābhir ohabrahmāṇo vi caranty u tve ||

10.071.09a इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः ।

10.071.09c त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ॥

10.071.09a ime ye nārvāṅ na paraś caranti na brāhmaṇāso na sutekarāsaḥ |
10.071.09c ta ete vācam abhipadya pāpayā sirīs tantraṁ tanvate aprajajñayaḥ ||

10.071.10a सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः ।

10.071.10c किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥

10.071.10a sarve nandanti yaśasāgatena sabhāsāhena sakhyā sakhāyaḥ |
10.071.10c kilbiṣaspṛt pituṣaṇir hy eṣām araṁ hito bhavati vājināya ||

10.071.11a ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।

10.071.11c ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥

10.071.11a ṛcāṁ tvaḥ poṣam āste pupuṣvān gāyatraṁ tvo gāyati śakvarīṣu |
10.071.11c brahmā tvo vadati jātavidyāṁ yajñasya mātrāṁ vi mimīta u tvaḥ ||

10.072.01a देवानां नु वयं जाना प्र वोचाम विपन्यया ।

10.072.01c उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥

10.072.01a devānāṁ nu vayaṁ jānā pra vocāma vipanyayā |
10.072.01c uktheṣu śasyamāneṣu yaḥ paśyād uttare yuge ||

10.072.02a ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् ।

10.072.02c देवानां पूर्व्ये युगेऽसतः सदजायत ॥

10.072.02a brahmaṇas patir etā saṁ karmāra ivādhamat |
10.072.02c devānām pūrvye yuge 'sataḥ sad ajāyata ||

10.072.03a देवानां युगे प्रथमेऽसतः सदजायत ।

10.072.03c तदाशा अन्वजायन्त तदुत्तानपदस्परि ॥

10.072.03a devānāṁ yuge prathame 'sataḥ sad ajāyata |
10.072.03c tad āśā anv ajāyanta tad uttānapadas pari ||

10.072.04a भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त ।

10.072.04c अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥

10.072.04a bhūr jajña uttānapado bhuva āśā ajāyanta |
10.072.04c aditer dakṣo ajāyata dakṣād v aditiḥ pari ||

10.072.05a अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।

10.072.05c तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥

10.072.05a aditir hy ajaniṣṭa dakṣa yā duhitā tava |
10.072.05c tāṁ devā anv ajāyanta bhadrā amṛtabandhavaḥ ||

10.072.06a यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत ।

10.072.06c अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥

10.072.06a yad devā adaḥ salile susaṁrabdhā atiṣṭhata |
10.072.06c atrā vo nṛtyatām iva tīvro reṇur apāyata ||

10.072.07a यद्देवा यतयो यथा भुवनान्यपिन्वत ।

10.072.07c अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥

10.072.07a yad devā yatayo yathā bhuvanāny apinvata |
10.072.07c atrā samudra ā gūḷham ā sūryam ajabhartana ||

10.072.08a अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि ।

10.072.08c देवाँ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत् ॥

10.072.08a aṣṭau putrāso aditer ye jātās tanva1s pari |
10.072.08c devām̐ upa prait saptabhiḥ parā mārtāṇḍam āsyat ||

10.072.09a सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगम् ।

10.072.09c प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत् ॥

10.072.09a saptabhiḥ putrair aditir upa prait pūrvyaṁ yugam |
10.072.09c prajāyai mṛtyave tvat punar mārtāṇḍam ābharat ||

10.073.01a जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।

10.073.01c अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥

10.073.01a janiṣṭhā ugraḥ sahase turāya mandra ojiṣṭho bahulābhimānaḥ |
10.073.01c avardhann indram marutaś cid atra mātā yad vīraṁ dadhanad dhaniṣṭhā ||

10.073.02a द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावृधुष्ट इन्द्रम् ।

10.073.02c अभीवृतेव ता महापदेन ध्वान्तात्प्रपित्वादुदरन्त गर्भाः ॥

10.073.02a druho niṣattā pṛśanī cid evaiḥ purū śaṁsena vāvṛdhuṣ ṭa indram |
10.073.02c abhīvṛteva tā mahāpadena dhvāntāt prapitvād ud aranta garbhāḥ ||

10.073.03a ऋष्वा ते पादा प्र यज्जिगास्यवर्धन्वाजा उत ये चिदत्र ।

10.073.03c त्वमिन्द्र सालावृकान्सहस्रमासन्दधिषे अश्विना ववृत्याः ॥

10.073.03a ṛṣvā te pādā pra yaj jigāsy avardhan vājā uta ye cid atra |
10.073.03c tvam indra sālāvṛkān sahasram āsan dadhiṣe aśvinā vavṛtyāḥ ||

10.073.04a समना तूर्णिरुप यासि यज्ञमा नासत्या सख्याय वक्षि ।

10.073.04c वसाव्यामिन्द्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥

10.073.04a samanā tūrṇir upa yāsi yajñam ā nāsatyā sakhyāya vakṣi |
10.073.04c vasāvyām indra dhārayaḥ sahasrāśvinā śūra dadatur maghāni ||

10.073.05a मन्दमान ऋतादधि प्रजायै सखिभिरिन्द्र इषिरेभिरर्थम्।

10.073.05c आभिर्हि माया उप दस्युमागान्मिहः प्र तम्रा अवपत्तमांसि ॥

10.073.05a mandamāna ṛtād adhi prajāyai sakhibhir indra iṣirebhir artham |
10.073.05c ābhir hi māyā upa dasyum āgān mihaḥ pra tamrā avapat tamāṁsi ||

10.073.06a सनामाना चिद्ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथानः।

10.073.06c ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ ॥

10.073.06a sanāmānā cid dhvasayo ny asmā avāhann indra uṣaso yathānaḥ |
10.073.06c ṛṣvair agacchaḥ sakhibhir nikāmaiḥ sākam pratiṣṭhā hṛdyā jaghantha ||

10.073.07a त्वं जघन्थ नमुचिं मखस्युं दासं कृण्वान ऋषये विमायम्।

10.073.07c त्वं चकर्थ मनवे स्योनान्पथो देवत्राञ्जसेव यानान्॥

10.073.07a tvaṁ jaghantha namucim makhasyuṁ dāsaṁ kṛṇvāna ṛṣaye vimāyam |
10.073.07c tvaṁ cakartha manave syonān patho devatrāñjaseva yānān ||

10.073.08a त्वमेतानि पप्रिषे वि नामेशान इन्द्र दधिषे गभस्तौ।

10.073.08c अनु त्वा देवाः शवसा मदन्त्युपरिबुध्नान्वनिनश्चकर्थ॥

10.073.08a tvam etāni papriṣe vi nāmeśāna indra dadhiṣe gabhastau |
10.073.08c anu tvā devāḥ śavasā madanty uparibudhnān vaninaś cakartha ||

10.073.09a चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात्।

10.073.09c पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु॥

10.073.09a cakraṁ yad asyāpsv ā niṣattam uto tad asmai madhv ic cacchadyāt |
10.073.09c pṛthivyām atiṣitaṁ yad ūdhaḥ payo goṣv adadhā oṣadhīṣu ||

10.073.10a अश्वादियायेति यद्वदन्त्योजसो जातमुत मन्य एनम्।

10.073.10c मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद॥

10.073.10a aśvād iyāyeti yad vadanty ojaso jātam uta manya enam |
10.073.10c manyor iyāya harmyeṣu tasthau yataḥ prajajña indro asya veda ||

10.073.11a वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।

10.073.11c अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान् ॥

10.073.11a vayaḥ suparṇā upa sedur indram priyamedhā ṛṣayo nādhamānāḥ |
10.073.11c apa dhvāntam ūrṇuhi pūrdhi cakṣur mumugdhy a1smān nidhayeva baddhān ||

10.074.01a वसूनां वा चर्कृष इयक्षन्धिया वा यज्ञैर्वा रोदस्योः ।

10.074.01c अर्वन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः ॥

10.074.01a vasūnāṁ vā carkṛṣa iyakṣan dhiyā vā yajñair vā rodasyoḥ |
10.074.01c arvanto vā ye rayimantaḥ sātau vanuṁ vā ye suśruṇaṁ suśruto dhuḥ ||

10.074.02a हव एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम् ।

10.074.02c चक्षाणा यत्र सुविताय देवा द्यौर्न वारेभिः कृणवन्त स्वैः ॥

10.074.02a hava eṣām asuro nakṣata dyāṁ śravasyatā manasā niṁsata kṣām |
10.074.02c cakṣāṇā yatra suvitāya devā dyaur na vārebhiḥ kṛṇavanta svaiḥ ||

10.074.03a इयमेषाममृतानां गीः सर्वताता ये कृपणन्त रत्नम् ।

10.074.03c धियं च यज्ञं च साधन्तस्ते नो धान्तु वसव्य१मसामि ॥

10.074.03a iyam eṣām amṛtānāṁ gīḥ sarvatātā ye kṛpaṇanta ratnam |
10.074.03c dhiyaṁ ca yajñaṁ ca sādhantas te no dhāntu vasavya1m asāmi ||

10.074.04a आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।

10.074.04c सकृत्स्वं१ ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन् ॥

10.074.04a ā tat ta indrāyavaḥ panantābhi ya ūrvaṁ gomantaṁ titṛtsān |
10.074.04c sakṛtsvaṁ1 ye puruputrām mahīṁ sahasradhārām bṛhatīṁ dudukṣan ||

10.074.05a शचीव इन्द्रमवसे कृणुध्वमनानतं दमयन्तं पृतन्यून् ।

10.074.05c ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः ॥

10.074.05a śacīva indram avase kṛṇudhvam anānataṁ damayantam pṛtanyūn |
10.074.05c ṛbhukṣaṇam maghavānaṁ suvṛktim bhartā yo vajraṁ naryam purukṣuḥ ||

10.074.06a यद्वावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः ।

10.074.06c अचेति प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तत् ॥

10.074.06a yad vāvāna purutamam purāṣāḷ ā vṛtrahendro nāmāny aprāḥ |
10.074.06c aceti prāsahas patis tuviṣmān yad īm uśmasi kartave karat tat ||

10.075.01a प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।

10.075.01c प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा ॥

10.075.01a pra su va āpo mahimānam uttamaṁ kārur vocāti sadane vivasvataḥ |
10.075.01c pra sapta-sapta tredhā hi cakramuḥ pra sṛtvarīṇām ati sindhur ojasā ||

10.075.02a प्र तेऽरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँ अभ्यद्रवस्त्वम् ।

10.075.02c भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि ॥

10.075.02a pra te 'radad varuṇo yātave pathaḥ sindho yad vājām̐ abhy adravas tvam |
10.075.02c bhūmyā adhi pravatā yāsi sānunā yad eṣām agraṁ jagatām irajyasi ||

10.075.03a दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना ।

10.075.03c अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ॥

10.075.03a divi svano yatate bhūmyopary anantaṁ śuṣmam ud iyarti bhānunā |
10.075.03c abhrād iva pra stanayanti vṛṣṭayaḥ sindhur yad eti vṛṣabho na roruvat ||

10.075.04a अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः ।

10.075.04c राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥

10.075.04a abhi tvā sindho śiśum in na mātaro vāśrā arṣanti payaseva dhenavaḥ |
10.075.04c rājeva yudhvā nayasi tvam it sicau yad āsām agraṁ pravatām inakṣasi ||

10.075.05a इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।

10.075.05c असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

10.075.05a imam me gaṅge yamune sarasvati śutudri stomaṁ sacatā paruṣṇy ā |
10.075.05c asiknyā marudvṛdhe vitastayārjīkīye śṛṇuhy ā suṣomayā ||

10.075.06a तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या ।

10.075.06c त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥

10.075.06a tṛṣṭāmayā prathamaṁ yātave sajūḥ susartvā rasayā śvetyā tyā |
10.075.06c tvaṁ sindho kubhayā gomatīṁ krumum mehatnvā sarathaṁ yābhir īyase ||

10.075.07a ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि ।
10.075.07c अदब्धा सिन्धुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥

10.075.07a ṛjīty enī ruśatī mahitvā pari jrayāṁsi bharate rajāṁsi |
10.075.07c adabdhā sindhur apasām apastamāśvā na citrā vapuṣīva darśatā ||

10.075.08a स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती ।
10.075.08c ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ॥

10.075.08a svaśvā sindhuḥ surathā suvāsā hiraṇyayī sukṛtā vājinīvatī |
10.075.08c ūrṇāvatī yuvatiḥ sīlamāvaty utādhi vaste subhagā madhuvṛdham ||

10.075.09a सुखं रथं युयुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ ।
10.075.09c महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ॥

10.075.09a sukhaṁ rathaṁ yuyuje sindhur aśvinaṁ tena vājaṁ saniṣad asminn ājau |
10.075.09c mahān hy asya mahimā panasyate 'dabdhasya svayaśaso virapśinaḥ ||

10.076.01a आ व ऋञ्जस ऊर्जां व्युष्टिष्विन्द्रं मरुतो रोदसी अनक्तन ।
10.076.01c उभे यथा नो अहनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा ॥

10.076.01a ā va ṛñjasa ūrjāṁ vyuṣṭiṣv indraṁ maruto rodasī anaktana |
10.076.01c ubhe yathā no ahanī sacābhuvā sadaḥ-sado varivasyāta udbhidā ||

10.076.02a तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि ।
10.076.02c विदद्ध्यर्१यो अभिभूति पौंस्यं महो राये चित्तरुते यदर्वतः ॥

10.076.02a tad u śreṣṭhaṁ savanaṁ sunotanātyo na hastayato adriḥ sotari |
10.076.02c vidad dhy a1ryo abhibhūti pauṁsyam maho rāye cit tarute yad arvataḥ ||

10.076.03a तदिद्ध्यस्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत् ।
10.076.03c गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः ॥

10.076.03a tad id dhy asya savanaṁ viver apo yathā purā manave gātum aśret |
10.076.03c goarṇasi tvāṣṭre aśvanirṇiji prem adhvareṣv adhvarām̐ aśiśrayuḥ ||

10.076.04a अप हत रक्षसो भङ्गुरावत स्कभायत निरृतिं सेधतामतिम् ।

10.076.04c आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः ॥

10.076.04a apa hata rakṣaso bhaṅgurāvata skabhāyata nirṛtiṁ sedhatāmatim |
10.076.04c ā no rayiṁ sarvavīraṁ sunotana devāvyam bharata ślokam adrayaḥ ||

10.076.05a दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः ।

10.076.05c वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः ॥

10.076.05a divaś cid ā vo 'mavattarebhyo vibhvanā cid āśvapastarebhyaḥ |
10.076.05c vāyoś cid ā somarabhastarebhyo 'gneś cid arca pitukṛttarebhyaḥ ||

10.076.06a भुरन्तु नो यशसः सोत्वन्धसो ग्रावाणो वाचा दिविता दिवित्मता ।

10.076.06c नरो यत्र दुहते काम्यं मध्वाघोषयन्तो अभितो मिथस्तुरः ॥

10.076.06a bhurantu no yaśasaḥ sotv andhaso grāvāṇo vācā divitā divitmatā |
10.076.06c naro yatra duhate kāmyam madhv āghoṣayanto abhito mithasturaḥ ||

10.076.07a सुन्वन्ति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहन्ति ते ।

10.076.07c दुहन्त्यूधरुपसेचनाय कं नरो हव्या न मर्जयन्त आसभिः ॥

10.076.07a sunvanti somaṁ rathirāso adrayo nir asya rasaṁ gaviṣo duhanti te |
10.076.07c duhanty ūdhar upasecanāya kaṁ naro havyā na marjayanta āsabhiḥ ||

10.076.08a एते नरः स्वपसो अभूतन य इन्द्राय सुनुथ सोममद्रयः ।

10.076.08c वामंवामं वो दिव्याय धाम्ने वसुवसु वः पार्थिवाय सुन्वते ॥

10.076.08a ete naraḥ svapaso abhūtana ya indrāya sunutha somam adrayaḥ |
10.076.08c vāmaṁ-vāmaṁ vo divyāya dhāmne vasu-vasu vaḥ pārthivāya sunvate ||

10.077.01a अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः ।

10.077.01c सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे ॥

10.077.01a abhrapruṣo na vācā pruṣā vasu haviṣmanto na yajñā vijānuṣaḥ |
10.077.01c sumārutaṁ na brahmāṇam arhase gaṇam astoṣy eṣāṁ na śobhase ||

10.077.02a श्रिये मर्यासो अञ्जीँरकृण्वत सुमारुतं न पूर्वीरति क्षपः ।

10.077.02c दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ॥

10.077.02a śriye maryāso añjīm̐r akṛṇvata sumārutaṁ na pūrvīr ati kṣapaḥ |
10.077.02c divas putrāsa etā na yetira ādityāsas te akrā na vāvṛdhuḥ ||

10.077.03a प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः ।

10.077.03c पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥

10.077.03a pra ye divaḥ pṛthivyā na barhaṇā tmanā riricre abhrān na sūryaḥ |
10.077.03c pājasvanto na vīrāḥ panasyavo riśādaso na maryā abhidyavaḥ ||

10.077.04a युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति ।

10.077.04c विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वन्तो न सत्राच आ गत ॥

10.077.04a yuṣmākam budhne apāṁ na yāmani vithuryati na mahī śratharyati |
10.077.04c viśvapsur yajño arvāg ayaṁ su vaḥ prayasvanto na satrāca ā gata ||

10.077.05a यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मन्तो न भासा व्युष्टिषु ।

10.077.05c श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः ॥

10.077.05a yūyaṁ dhūrṣu prayujo na raśmibhir jyotiṣmanto na bhāsā vyuṣṭiṣu |
10.077.05c śyenāso na svayaśaso riśādasaḥ pravāso na prasitāsaḥ paripruṣaḥ ||

10.077.06a प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः ।

10.077.06c विदानासो वसवो राध्यस्याराच्चिद्द्वेषः सनुतर्युयोत ॥

10.077.06a pra yad vahadhve marutaḥ parākād yūyam mahaḥ saṁvaraṇasya vasvaḥ |
10.077.06c vidānāso vasavo rādhyasyārāc cid dveṣaḥ sanutar yuyota ||

10.077.07a य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् ।

10.077.07c रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ॥

10.077.07a ya udṛci yajñe adhvareṣṭhā marudbhyo na mānuṣo dadāśat |
10.077.07c revat sa vayo dadhate suvīraṁ sa devānām api gopīthe astu ||

10.077.08a ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शम्भविष्ठाः ।

10.077.08c ते नोऽवन्तु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ॥

10.077.08a te hi yajñeṣu yajñiyāsa ūmā ādityena nāmnā śambhaviṣṭhāḥ |

10.077.08c te no 'vantu rathatūr manīṣām mahaś ca yāmann adhvare cakānāḥ ||

10.078.01a विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः ।

10.078.01c राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥

10.078.01a viprāso na manmabhiḥ svādhyo devāvyo3 na yajñaiḥ svapnasaḥ |
10.078.01c rājāno na citrāḥ susandṛśaḥ kṣitīnāṁ na maryā arepasaḥ ||

10.078.02a अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।

10.078.02c प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ॥

10.078.02a agnir na ye bhrājasā rukmavakṣaso vātāso na svayujaḥ sadyaūtayaḥ |
10.078.02c prajñātāro na jyeṣṭhāḥ sunītayaḥ suśarmāṇo na somā ṛtaṁ yate ||

10.078.03a वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।

10.078.03c वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः ॥

10.078.03a vātāso na ye dhunayo jigatnavo 'gnīnāṁ na jihvā virokiṇaḥ |
10.078.03c varmaṇvanto na yodhāḥ śimīvantaḥ pitṝṇāṁ na śaṁsāḥ surātayaḥ ||

10.078.04a रथानां न ये१ऽराः सनाभयो जिगीवांसो न शूरा अभिद्यवः ।

10.078.04c वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ॥

10.078.04a rathānāṁ na ye1 'rāḥ sanābhayo jigīvāṁso na śūrā abhidyavaḥ |
10.078.04c vareyavo na maryā ghṛtapruṣo 'bhisvartāro arkaṁ na suṣṭubhaḥ ||

10.078.05a अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।

10.078.05c आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अङ्गिरसो न सामभिः ॥

10.078.05a aśvāso na ye jyeṣṭhāsa āśavo didhiṣavo na rathyaḥ sudānavaḥ |
10.078.05c āpo na nimnair udabhir jigatnavo viśvarūpā aṅgiraso na sāmabhiḥ ||

10.078.06a ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।

10.078.06c शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ॥

10.078.06a grāvāṇo na sūrayaḥ sindhumātara ādardirāso adrayo na viśvahā |
10.078.06c śiśūlā na krīḷayaḥ sumātaro mahāgrāmo na yāmann uta tviṣā ||

10.078.07a उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन् ।

10.078.07c सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ॥

10.078.07a uṣasāṁ na ketavo 'dhvaraśriyaḥ śubhaṁyavo nāñjibhir vy aśvitan |
10.078.07c sindhavo na yayiyo bhrājadṛṣṭayaḥ parāvato na yojanāni mamire ||

10.078.08a सुभागान्नो देवाः कृणुता सुरत्नानस्मान्स्तोतॄन्मरुतो वावृधानाः ।

10.078.08c अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति ॥

10.078.08a subhāgān no devāḥ kṛṇutā suratnān asmān stotṝn maruto vāvṛdhānāḥ |
10.078.08c adhi stotrasya sakhyasya gāta sanād dhi vo ratnadheyāni santi ||

10.079.01a अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु ।

10.079.01c नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः ॥

10.079.01a apaśyam asya mahato mahitvam amartyasya martyāsu vikṣu |
10.079.01c nānā hanū vibhṛte sam bharete asinvatī bapsatī bhūry attaḥ ||

10.079.02a गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जिह्वया वनानि ।

10.079.02c अत्राण्यस्मै पड्भिः सं भरन्त्युत्तानहस्ता नमसाधि विक्षु ॥

10.079.02a guhā śiro nihitam ṛdhag akṣī asinvann atti jihvayā vanāni |
10.079.02c atrāṇy asmai paḍbhiḥ sam bharanty uttānahastā namasādhi vikṣu ||

10.079.03a प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो न वीरुधः सर्पदुर्वीः ।

10.079.03c ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥

10.079.03a pra mātuḥ prataraṁ guhyam icchan kumāro na vīrudhaḥ sarpad urvīḥ |
10.079.03c sasaṁ na pakvam avidac chucantaṁ ririhvāṁsaṁ ripa upasthe antaḥ ||

10.079.04a तद्वामृतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।

10.079.04c नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः ॥

10.079.04a tad vāṁ ṛtaṁ rodasī pra bravīmi jāyamāno mātarā garbho atti |
10.079.04c nāhaṁ devasya martyaś ciketāgnir aṅga vicetāḥ sa pracetāḥ ||

10.079.05a यो अस्मा अन्नं तृष्वा३दधात्याज्यैर्घृतैर्जुहोति पुष्यति ।

10.079.05c तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वम् ॥

10.079.05a yo asmā annaṁ tṛṣv ā3dadhāty ājyair ghṛtair juhoti puṣyati |
10.079.05c tasmai sahasram akṣabhir vi cakṣe 'gne viśvataḥ pratyaṅṅ asi tvam ||

10.079.06a किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।

10.079.06c अक्रीळन्क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥

10.079.06a kiṁ deveṣu tyaja enaś cakarthāgne pṛcchāmi nu tvām avidvān |
10.079.06c akrīḻan krīḻan harir attave 'dan vi parvaśaś cakarta gām ivāsiḥ ||

10.079.07a विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान् ।

10.079.07c चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥

10.079.07a viṣūco aśvān yuyuje vanejā ṛjītibhī raśanābhir gṛbhītān |
10.079.07c cakṣade mitro vasubhiḥ sujātaḥ sam ānṛdhe parvabhir vāvṛdhānaḥ ||

10.080.01a अग्निः सप्तिं वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम् ।

10.080.01c अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरंधिम् ॥

10.080.01a agniḥ saptiṁ vājambharaṁ dadāty agnir vīraṁ śrutyaṁ karmaniṣṭhām |
10.080.01c agnī rodasī vi carat samañjann agnir nārīṁ vīrakukṣim purandhim ||

10.080.02a अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश ।

10.080.02c अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥

10.080.02a agner apnasaḥ samid astu bhadrāgnir mahī rodasī ā viveśa |
10.080.02c agnir ekaṁ codayat samatsv agnir vṛtrāṇi dayate purūṇi ||

10.080.03a अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम् ।

10.080.03c अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेधं प्रजयासृजत्सम् ॥

10.080.03a agnir ha tyaṁ jarataḥ karṇam āvāgnir adbhyo nir adahaj jarūtham |
10.080.03c agnir atriṁ gharma uruṣyad antar agnir nṛmedham prajayāsṛjat sam ||

10.080.04a अग्निर्दाद्द्रविणं वीरपेशा अग्निरृषिं यः सहस्रा सनोति ।

10.080.04c अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥

10.080.04a agnir dād draviṇaṁ vīrapeśā agnir ṛṣiṁ yaḥ sahasrā sanoti |
10.080.04c agnir divi havyam ā tatānāgner dhāmāni vibhṛtā purutrā ||

10.080.05a अग्निमुक्थैरृषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः ।

10.080.05c अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम् ॥

10.080.05a agnim ukthair ṛṣayo vi hvayante 'gniṁ naro yāmani bādhitāsaḥ |
10.080.05c agniṁ vayo antarikṣe patanto 'gniḥ sahasrā pari yāti gonām ||

10.080.06a अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः ।

10.080.06c अग्निर्गान्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥

10.080.06a agniṁ viśa īḻate mānuṣīr yā agnim manuṣo nahuṣo vi jātāḥ |
10.080.06c agnir gāndharvīm pathyām ṛtasyāgner gavyūtir ghṛta ā niṣattā ||

10.080.07a अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिम् ।

10.080.07c अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व ॥

10.080.07a agnaye brahma ṛbhavas tatakṣur agnim mahām avocāmā suvṛktim |
10.080.07c agne prāva jaritāraṁ yaviṣṭhāgne mahi draviṇam ā yajasva ||

10.081.01a य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।

10.081.01c स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥

10.081.01a ya imā viśvā bhuvanāni juhvad ṛṣir hotā ny asīdat pitā naḥ |
10.081.01c sa āśiṣā draviṇam icchamānaḥ prathamacchad avarām̐ ā viveśa ||

10.081.02a किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।

10.081.02c यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥

10.081.02a kiṁ svid āsīd adhiṣṭhānam ārambhaṇaṁ katamat svit kathāsīt |
10.081.02c yato bhūmiṁ janayan viśvakarmā vi dyām aurṇon mahinā viśvacakṣāḥ ||

10.081.03a विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।

10.081.03c सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥

10.081.03a viśvataścakṣur uta viśvatomukho viśvatobāhur uta viśvataspāt |
10.081.03c sam bāhubhyāṁ dhamati sam patatrair dyāvābhūmī janayan deva ekaḥ ||

10.081.04a किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।

10.081.04c मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥

10.081.04a kiṁ svid vanaṁ ka u sa vṛkṣa āsa yato dyāvāpṛthivī niṣṭatakṣuḥ |
10.081.04c manīṣiṇo manasā pṛcchated u tad yad adhyatiṣṭhad bhuvanāni dhārayan ||

10.081.05a या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।

10.081.05c शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥

10.081.05a yā te dhāmāni paramāṇi yāvamā yā madhyamā viśvakarmann utemā |
10.081.05c śikṣā sakhibhyo haviṣi svadhāvaḥ svayaṁ yajasva tanvaṁ vṛdhānaḥ ||

10.081.06a विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।

10.081.06c मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥

10.081.06a viśvakarman haviṣā vāvṛdhānaḥ svayaṁ yajasva pṛthivīm uta dyām |
10.081.06c muhyantv anye abhito janāsa ihāsmākam maghavā sūrir astu ||

10.081.07a वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।

10.081.07c स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥

10.081.07a vācas patiṁ viśvakarmāṇam ūtaye manojuvaṁ vāje adyā huvema |
10.081.07c sa no viśvāni havanāni joṣad viśvaśambhūr avase sādhukarmā ||

10.082.01a चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।

10.082.01c यदेदन्ता अददृहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥

10.082.01a cakṣuṣaḥ pitā manasā hi dhīro ghṛtam ene ajanan nannamāne |
10.082.01c yaded antā adadṛhanta pūrva ād id dyāvāpṛthivī aprathetām ||

10.082.02a विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।

10.082.02c तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः ॥

10.082.02a viśvakarmā vimanā ād vihāyā dhātā vidhātā paramota sandṛk |
10.082.02c teṣām iṣṭāni sam iṣā madanti yatrā saptarṣīn para ekam āhuḥ ||

10.082.03a यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।

10.082.03c यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ॥

10.082.03a yo naḥ pitā janitā yo vidhātā dhāmāni veda bhuvanāni viśvā |
10.082.03c yo devānāṁ nāmadhā eka eva taṁ sampraśnam bhuvanā yanty anyā ||

10.082.04a त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।

10.082.04c असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥

10.082.04a ta āyajanta draviṇaṁ sam asmā ṛṣayaḥ pūrve jaritāro na bhūnā |
10.082.04c asūrte sūrte rajasi niṣatte ye bhūtāni samakṛṇvann imāni ||

10.082.05a परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।

10.082.05c कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥

10.082.05a paro divā para enā pṛthivyā paro devebhir asurair yad asti |
10.082.05c kaṁ svid garbham prathamaṁ dadhra āpo yatra devāḥ samapaśyanta viśve ||

10.082.06a तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।

10.082.06c अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥

10.082.06a tam id garbham prathamaṁ dadhra āpo yatra devāḥ samagacchanta viśve |
10.082.06c ajasya nābhāv adhy ekam arpitaṁ yasmin viśvāni bhuvanāni tasthuḥ ||

10.082.07a न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।

10.082.07c नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥

10.082.07a na taṁ vidātha ya imā jajānānyad yuṣmākam antaram babhūva |
10.082.07c nīhāreṇa prāvṛtā jalpyā cāsutṛpa ukthaśāsaś caranti ||

10.083.01a यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।

10.083.01c साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥

10.083.01a yas te manyo 'vidhad vajra sāyaka saha ojaḥ puṣyati viśvam ānuṣak |
10.083.01c sāhyāma dāsam āryaṁ tvayā yujā sahaskṛtena sahasā sahasvatā ||

10.083.02a मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः ।

10.083.02c मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥

10.083.02a manyur indro manyur evāsa devo manyur hotā varuṇo jātavedāḥ |
10.083.02c manyuṁ viśa īḻate mānuṣīr yāḥ pāhi no manyo tapasā sajoṣāḥ ||

10.083.03a अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शत्रून् ।

10.083.03c अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥

10.083.03a abhīhi manyo tavasas tavīyān tapasā yujā vi jahi śatrūn |
10.083.03c amitrahā vṛtrahā dasyuhā ca viśvā vasūny ā bharā tvaṁ naḥ ||

10.083.04a त्वं हि मन्यो अभिभूत्योजाः स्वयम्भूर्भामो अभिमातिषाहः ।

10.083.04c विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥

10.083.04a tvaṁ hi manyo abhibhūtyojāḥ svayambhūr bhāmo abhimātiṣāhaḥ |
10.083.04c viśvacarṣaṇiḥ sahuriḥ sahāvān asmāsv ojaḥ pṛtanāsu dhehi ||

10.083.05a अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।

10.083.05c तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥

10.083.05a abhāgaḥ sann apa pareto asmi tava kratvā taviṣasya pracetaḥ |
10.083.05c taṁ tvā manyo akratur jihīḻāhaṁ svā tanūr baladeyāya mehi ||

10.083.06a अयं ते अस्म्युप मेह्यर्वाङ्प्रतीचीनः सहुरे विश्वधायः ।

10.083.06c मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥

10.083.06a ayaṁ te asmy upa mehy arvāṅ pratīcīnaḥ sahure viśvadhāyaḥ |
10.083.06c manyo vajrinn abhi mām ā vavṛtsva hanāva dasyūm̐r uta bodhy āpeḥ ||

10.083.07a अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जङ्घनाव भूरि ।

10.083.07c जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥

10.083.07a abhi prehi dakṣiṇato bhavā me 'dhā vṛtrāṇi jaṅghanāva bhūri |
10.083.07c juhomi te dharuṇam madhvo agram ubhā upāṁśu prathamā pibāva ||

10.084.01a त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः ।

10.084.01c तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ॥

10.084.01a tvayā manyo saratham ārujanto harṣamāṇāso dhṛṣitā marutvaḥ |
10.084.01c tigmeṣava āyudhā saṁśiśānā abhi pra yantu naro agnirūpāḥ ||

10.084.02a अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।

10.084.02c हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥

10.084.02a agnir iva manyo tviṣitaḥ sahasva senānīr naḥ sahure hūta edhi |
10.084.02c hatvāya śatrūn vi bhajasva veda ojo mimāno vi mṛdho nudasva ||

10.084.03a सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् ।

10.084.03c उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ॥

10.084.03a sahasva manyo abhimātim asme rujan mṛṇan pramṛṇan prehi śatrūn |
10.084.03c ugraṁ te pājo nanv ā rurudhre vaśī vaśaṁ nayasa ekaja tvam ||

10.084.04a एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।

10.084.04c अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥

10.084.04a eko bahūnām asi manyav īḻito viśaṁ-viśaṁ yudhaye saṁ śiśādhi |
10.084.04c akṛttaruk tvayā yujā vayaṁ dyumantaṁ ghoṣaṁ vijayāya kṛṇmahe ||

10.084.05a विजेषकृदिन्द्र इवानवब्रवो३ऽस्माकं मन्यो अधिपा भवेह ।

10.084.05c प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥

10.084.05a vijeṣakṛd indra ivānavabravo3 'smākam manyo adhipā bhaveha |
10.084.05c priyaṁ te nāma sahure gṛṇīmasi vidmā tam utsaṁ yata ābabhūtha ||

10.084.06a आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।

10.084.06c क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥

10.084.06a ābhūtyā sahajā vajra sāyaka saho bibharṣy abhibhūta uttaram |
10.084.06c kratvā no manyo saha medy edhi mahādhanasya puruhūta saṁsṛji ||

10.084.07a संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।

10.084.07c भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ॥

10.084.07a saṁsṛṣṭaṁ dhanam ubhayaṁ samākṛtam asmabhyaṁ dattāṁ varuṇaś ca manyuḥ |
10.084.07c bhiyaṁ dadhānā hṛdayeṣu śatravaḥ parājitāso apa ni layantām ||

10.085.01a सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।

10.085.01c ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥

10.085.01a satyenottabhitā bhūmiḥ sūryeṇottabhitā dyauḥ |
10.085.01c ṛtenādityās tiṣṭhanti divi somo adhi śritaḥ ||

10.085.02a सोमेनादित्या बलिनः सोमेन पृथिवी मही ।

10.085.02c अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥

10.085.02a somenādityā balinaḥ somena pṛthivī mahī |
10.085.02c atho nakṣatrāṇām eṣām upasthe soma āhitaḥ ||

10.085.03a सोमं मन्यते पपिवान्यत्सम्पिंषन्त्योषधिम् ।

10.085.03c सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥

10.085.03a somam manyate papivān yat sampiṁṣanty oṣadhim |
10.085.03c somaṁ yam brahmāṇo vidur na tasyāśnāti kaś cana ||

10.085.04a आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ।

10.085.04c ग्राव्णामिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ॥

10.085.04a ācchadvidhānair gupito bārhataiḥ soma rakṣitaḥ |
10.085.04c grāvṇām ic chṛṇvan tiṣṭhasi na te aśnāti pārthivaḥ ||

10.085.05a यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।

10.085.05c वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥

10.085.05a yat tvā deva prapibanti tata ā pyāyase punaḥ |
10.085.05c vāyuḥ somasya rakṣitā samānām māsa ākṛtiḥ ||

10.085.06a रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।

10.085.06c सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ॥

10.085.06a raibhy āsīd anudeyī nārāśaṁsī nyocanī |
10.085.06c sūryāyā bhadram id vāso gāthayaiti pariṣkṛtam ||

10.085.07a चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् ।

10.085.07c द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ॥

10.085.07a cittir ā upabarhaṇaṁ cakṣur ā abhyañjanam |

10.085.07c dyaur bhūmiḥ kośa āsīd yad ayāt sūryā patim ||

10.085.08a स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः ।

10.085.08c सूर्याया अश्विना वराग्निरासीत्पुरोगवः ॥

10.085.08a stomā āsan pratidhayaḥ kurīraṁ chanda opaśaḥ |
10.085.08c sūryāyā aśvinā varāgnir āsīt purogavaḥ ||

10.085.09a सोमो वधूयुरभवदश्विनास्तामुभा वरा ।

10.085.09c सूर्यां यत्पत्ये शंसन्तीं मनसा सविताददात् ॥

10.085.09a somo vadhūyur abhavad aśvināstām ubhā varā |
10.085.09c sūryāṁ yat patye śaṁsantīm manasā savitādadāt ||

10.085.10a मनो अस्या अन आसीद्द्यौरासीदुत च्छदिः ।

10.085.10c शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम् ॥

10.085.10a mano asyā ana āsīd dyaur āsīd uta cchadiḥ |
10.085.10c śukrāv anaḍvāhāv āstāṁ yad ayāt sūryā gṛham ||

10.085.11a ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ।

10.085.11c श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचारः ॥

10.085.11a ṛksāmābhyām abhihitau gāvau te sāmanāv itaḥ |
10.085.11c śrotraṁ te cakre āstāṁ divi panthāś carācāraḥ ||

10.085.12a शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।

10.085.12c अनो मनस्मयं सूर्यारोहत्प्रयती पतिम् ॥

10.085.12a śucī te cakre yātyā vyāno akṣa āhataḥ |
10.085.12c ano manasmayaṁ sūryārohat prayatī patim ||

10.085.13a सूर्याया वहतुः प्रागात्सविता यमवासृजत् ।

10.085.13c अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ॥

10.085.13a sūryāyā vahatuḥ prāgāt savitā yam avāsṛjat |
10.085.13c aghāsu hanyante gāvo 'rjunyoḥ pary uhyate ||

10.085.14a यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।

10.085.14c विश्वे देवा अनु तद्वामजानन्पुत्रः पितराववृणीत पूषा ॥

10.085.14a yad aśvinā pṛcchamānāv ayātaṁ tricakreṇa vahatuṁ sūryāyāḥ ।
10.085.14c viśve devā anu tad vām ajānan putraḥ pitarāv avṛṇīta pūṣā ॥

10.085.15a यदयातं शुभस्पती वरेयं सूर्यामुप ।

10.085.15c क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः ॥

10.085.15a yad ayātaṁ śubhas patī vareyaṁ sūryām upa ।
10.085.15c kvaikaṁ cakraṁ vām āsīt kva deṣṭrāya tasthathuḥ ॥

10.085.16a द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।

10.085.16c अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥

10.085.16a dve te cakre sūrye brahmāṇa ṛtuthā viduḥ ।
10.085.16c athaikaṁ cakraṁ yad guhā tad addhātaya id viduḥ ॥

10.085.17a सूर्यायै देवेभ्यो मित्राय वरुणाय च ।

10.085.17c ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥

10.085.17a sūryāyai devebhyo mitrāya varuṇāya ca ।
10.085.17c ye bhūtasya pracetasa idaṁ tebhyo 'karaṁ namaḥ ॥

10.085.18a पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।

10.085.18c विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥

10.085.18a pūrvāparaṁ carato māyayaitau śiśū krīḻantau pari yāto adhvaram ।
10.085.18c viśvāny anyo bhuvanābhicaṣṭa ṛtūm̐r anyo vidadhaj jāyate punaḥ ॥

10.085.19a नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।

10.085.19c भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥

10.085.19a navo-navo bhavati jāyamāno 'hnāṁ ketur uṣasām ety agram ।
10.085.19c bhāgaṁ devebhyo vi dadhāty āyan pra candramās tirate dīrgham āyuḥ ॥

10.085.20a सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।

10.085.20c आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥

10.085.20a sukiṁśukaṁ śalmaliṁ viśvarūpaṁ hiraṇyavarṇaṁ suvṛtaṁ sucakram ।

10.085.20c ā roha sūrye amṛtasya lokaṁ syonam patye vahatuṁ kṛṇuṣva ||

10.085.21a उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे ।

10.085.21c अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥

10.085.21a ud īrṣvātaḥ pativatī hy e3ṣā viśvāvasuṁ namasā gīrbhir īḷe |
10.085.21c anyām iccha pitṛṣadaṁ vyaktāṁ sa te bhāgo januṣā tasya viddhi ||

10.085.22a उदीर्ष्वातो विश्वावसो नमसेळा महे त्वा ।

10.085.22c अन्यामिच्छ प्रफर्व्यं१ सं जायां पत्या सृज ॥

10.085.22a ud īrṣvāto viśvāvaso namaseḷā mahe tvā |
10.085.22c anyām iccha prapharvyaṁ1 saṁ jāyām patyā sṛja ||

10.085.23a अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।

10.085.23c समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥

10.085.23a anṛkṣarā ṛjavaḥ santu panthā yebhiḥ sakhāyo yanti no vareyam |
10.085.23c sam aryamā sam bhago no ninīyāt saṁ jāspatyaṁ suyamam astu devāḥ ||

10.085.24a प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।

10.085.24c ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥

10.085.24a pra tvā muñcāmi varuṇasya pāśād yena tvābadhnāt savitā suśevaḥ |
10.085.24c ṛtasya yonau sukṛtasya loke 'riṣṭāṁ tvā saha patyā dadhāmi ||

10.085.25a प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम् ।

10.085.25c यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥

10.085.25a preto muñcāmi nāmutaḥ subaddhām amutas karam |
10.085.25c yatheyam indra mīḍhvaḥ suputrā subhagāsati ||

10.085.26a पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।

10.085.26c गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥

10.085.26a pūṣā tveto nayatu hastagṛhyāśvinā tvā pra vahatāṁ rathena |
10.085.26c gṛhān gaccha gṛhapatnī yathāso vaśinī tvaṁ vidatham ā vadāsi ||

10.085.27a इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।

10.085.27c एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥

10.085.27a iha priyam prajayā te sam ṛdhyatām asmin gṛhe gārhapatyāya jāgṛhi |
10.085.27c enā patyā tanvaṁ1 saṁ sṛjasvādhā jivrī vidatham ā vadāthaḥ ||

10.085.28a नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।

10.085.28c एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥

10.085.28a nīlalohitam bhavati kṛtyāsaktir vy ajyate |
10.085.28c edhante asyā jñātayaḥ patir bandheṣu badhyate ||

10.085.29a परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ।

10.085.29c कृत्यैषा पद्वती भूत्व्या जाया विशते पतिम् ॥

10.085.29a parā dehi śāmulyam brahmabhyo vi bhajā vasu |
10.085.29c kṛtyaiṣā padvatī bhūtvy ā jāyā viśate patim ||

10.085.30a अश्रीरा तनूर्भवति रुशती पापयामुया ।

10.085.30c पतिर्यद्वध्वो३ वाससा स्वमङ्गमभिधित्सते ॥

10.085.30a aśrīrā tanūr bhavati ruśatī pāpayāmuyā |
10.085.30c patir yad vadhvo3 vāsasā svam aṅgam abhidhitsate ||

10.085.31a ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनादनु ।

10.085.31c पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥

10.085.31a ye vadhvaś candraṁ vahatuṁ yakṣmā yanti janād anu |
10.085.31c punas tān yajñiyā devā nayantu yata āgatāḥ ||

10.085.32a मा विदन्परिपन्थिनो य आसीदन्ति दम्पती ।

10.085.32c सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥

10.085.32a mā vidan paripanthino ya āsīdanti dampatī |
10.085.32c sugebhir durgam atītām apa drāntv arātayaḥ ||

10.085.33a सुमङ्गलीरियं वधूरिमां समेत पश्यत ।

10.085.33c सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥

10.085.33a sumaṅgalīr iyaṁ vadhūr imāṁ sameta paśyata |

10.085.33c saubhāgyam asyai dattvāyāthāstaṁ vi paretana ||

10.085.34a तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे ।

10.085.34c सूर्यां यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ॥

10.085.34a tṛṣṭam etat kaṭukam etad apāṣṭhavad viṣavan naitad attave |
10.085.34c sūryāṁ yo brahmā vidyāt sa id vādhūyam arhati ||

10.085.35a आशसनं विशसनमथो अधिविकर्तनम् ।

10.085.35c सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥

10.085.35a āśasanaṁ viśasanam atho adhivikartanam |
10.085.35c sūryāyāḥ paśya rūpāṇi tāni brahmā tu śundhati ||

10.085.36a गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।

10.085.36c भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥

10.085.36a gṛbhṇāmi te saubhagatvāya hastam mayā patyā jaradaṣṭir yathāsaḥ |
10.085.36c bhago aryamā savitā purandhir mahyaṁ tvādur gārhapatyāya devāḥ ||

10.085.37a तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।

10.085.37c या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥

10.085.37a tām pūṣañ chivatamām erayasva yasyām bījam manuṣyā3 vapanti |
10.085.37c yā na ūrū uśatī viśrayāte yasyām uśantaḥ praharāma śepam ||

10.085.38a तुभ्यमग्रे पर्यवहन्सूर्यां वहतुना सह ।

10.085.38c पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

10.085.38a tubhyam agre pary avahan sūryāṁ vahatunā saha |
10.085.38c punaḥ patibhyo jāyāṁ dā agne prajayā saha ||

10.085.39a पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।

10.085.39c दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥

10.085.39a punaḥ patnīm agnir adād āyuṣā saha varcasā |
10.085.39c dīrghāyur asyā yaḥ patir jīvāti śaradaḥ śatam ||

10.085.40a सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।

10.085.40c तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥

10.085.40a somaḥ prathamo vivide gandharvo vivida uttaraḥ |
10.085.40c tṛtīyo agniṣ ṭe patis turīyas te manuṣyajāḥ ||

10.085.41a सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये ।

10.085.41c रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥

10.085.41a somo dadad gandharvāya gandharvo dadad agnaye |
10.085.41c rayiṁ ca putrām̐ś cādād agnir mahyam atho imām ||

10.085.42a इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।

10.085.42c क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥

10.085.42a ihaiva stam mā vi yauṣṭaṁ viśvam āyur vy aśnutam |
10.085.42c krīḻantau putrair naptṛbhir modamānau sve gṛhe ||

10.085.43a आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।

10.085.43c अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥

10.085.43a ā naḥ prajāṁ janayatu prajāpatir ājarasāya sam anaktv aryamā |
10.085.43c adurmaṅgalīḥ patilokam ā viśa śaṁ no bhava dvipade śaṁ catuṣpade ||

10.085.44a अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।

10.085.44c वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

10.085.44a aghoracakṣur apatighny edhi śivā paśubhyaḥ sumanāḥ suvarcāḥ |
10.085.44c vīrasūr devakāmā syonā śaṁ no bhava dvipade śaṁ catuṣpade ||

10.085.45a इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।

10.085.45c दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥

10.085.45a imāṁ tvam indra mīḍhvaḥ suputrāṁ subhagāṁ kṛṇu |
10.085.45c daśāsyām putrān ā dhehi patim ekādaśaṁ kṛdhi ||

10.085.46a सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।

10.085.46c ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥

10.085.46a samrājñī śvaśure bhava samrājñī śvaśrvām bhava |

10.085.46c nanā̍ndari sa̱mrājñī̍ bhava sa̱mrājñī̱ adhi̍ de̱vṛṣu̍ ||

10.085.47a समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।

10.085.47c सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

10.085.47a sam a̍ñjantu̱ viśve̍ de̱vāḥ sam āpo̱ hṛda̍yāni nau |
10.085.47c sam mā̍ta̱riśvā̱ saṁ dhā̱tā sam u̱ deṣṭrī̍ dadhātu nau ||

10.086.01a वि हि सोतोरसृक्षत नेन्द्रं देवममंसत ।

10.086.01c यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥

10.086.01a vi hi soto̱r asṛ̍kṣata̱ nendra̍ṁ de̱vam a̍maṁsata |
10.086.01c yatrāma̍dad vṛ̱ṣāka̍pir a̱ryaḥ pu̱ṣṭeṣu̱ matsa̍khā̱ viśva̍smā̱d indra̱ utta̍raḥ ||

10.086.02a परा हीन्द्र धावसि वृषाकपेरति व्यथिः ।

10.086.02c नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥

10.086.02a parā̱ hī̍ndra̱ dhāva̍si vṛ̱ṣāka̍pe̱r ati̱ vyathi̍ḥ |
10.086.02c no aha̱ pra vi̍ndasy a̱nyatra̱ soma̍pītaye̱ viśva̍smā̱d indra̱ utta̍raḥ ||

10.086.03a किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।

10.086.03c यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः ॥

10.086.03a kim a̱yaṁ tvāṁ vṛ̱ṣāka̍piś ca̱kāra̱ hari̍to mṛ̱gaḥ |
10.086.03c yasmā̍ ira̱syasīd u̱ nv a1̱ryo vā̍ puṣṭi̱mad vasu̱ viśva̍smā̱d indra̱ utta̍raḥ ||

10.086.04a यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।

10.086.04c श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥

10.086.04a yam i̱maṁ tvaṁ vṛ̱ṣāka̍pim pri̱yam i̍ndrābhi̱rakṣa̍si |
10.086.04c śvā nv a̍sya jambhiṣa̱d api̱ karṇe̍ varāha̱yur viśva̍smā̱d indra̱ utta̍raḥ ||

10.086.05a प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।

10.086.05c शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥

10.086.05a pri̱yā ta̱ṣṭāni̍ me ka̱pir vya̍ktā̱ vy a̍dūduṣat |
10.086.05c śiro̱ nv a̍sya rāviṣa̱ṁ na su̱gaṁ du̱ṣkṛte̍ bhuva̱ṁ viśva̍smā̱d indra̱ utta̍raḥ ||

10.086.06a न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।

10.086.06c न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥

10.086.06a na mat strī subhasattarā na suyāśutarā bhuvat |
10.086.06c na mat praticyavīyasī na sakthy udyamīyasī viśvasmād indra uttaraḥ ||

10.086.07a उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ।

10.086.07c भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ॥

10.086.07a uve amba sulābhike yathevāṅga bhaviṣyati |
10.086.07c bhasan me amba sakthi me śiro me vīva hṛṣyati viśvasmād indra uttaraḥ ||

10.086.08a किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।

10.086.08c किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥

10.086.08a kiṁ subāho svaṅgure pṛthuṣṭo pṛthujāghane |
10.086.08c kiṁ śūrapatni nas tvam abhy amīṣi vṛṣākapiṁ viśvasmād indra uttaraḥ ||

10.086.09a अवीरामिव मामयं शरारुरभि मन्यते ।

10.086.09c उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥

10.086.09a avīrām iva mām ayaṁ śarārur abhi manyate |
10.086.09c utāham asmi vīriṇīndrapatnī marutsakhā viśvasmād indra uttaraḥ ||

10.086.10a संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।

10.086.10c वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥

10.086.10a saṁhotraṁ sma purā nārī samanaṁ vāva gacchati |
10.086.10c vedhā ṛtasya vīriṇīndrapatnī mahīyate viśvasmād indra uttaraḥ ||

10.086.11a इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।

10.086.11c नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥

10.086.11a indrāṇīm āsu nāriṣu subhagām aham aśravam |
10.086.11c nahy asyā aparaṁ cana jarasā marate patir viśvasmād indra uttaraḥ ||

10.086.12a नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।

10.086.12c यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥

10.086.12a nāham indrāṇi rāraṇa sakhyur vṛṣākaper ṛte |
10.086.12c yasyedam apyaṁ haviḥ priyaṁ deveṣu gacchati viśvasmād indra uttaraḥ ||

10.086.13a वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।

10.086.13c घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥

10.086.13a vṛṣākapāyi revati suputra ād u susnuṣe |
10.086.13c ghasat ta indra ukṣaṇaḥ priyaṁ kācitkaraṁ havir viśvasmād indra uttaraḥ ||

10.086.14a उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।

10.086.14c उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥

10.086.14a ukṣṇo hi me pañcadaśa sākam pacanti viṁśatim |
10.086.14c utāham admi pīva id ubhā kukṣī pṛṇanti me viśvasmād indra uttaraḥ ||

10.086.15a वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत् ।

10.086.15c मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥

10.086.15a vṛṣabho na tigmaśṛṅgo 'ntar yūtheṣu roruvat |
10.086.15c manthas ta indra śaṁ hṛde yaṁ te sunoti bhāvayur viśvasmād indra uttaraḥ ||

10.086.16a न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ।

10.086.16c सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥

10.086.16a na seśe yasya rambate 'ntarā sakthyā3 kapṛt |
10.086.16c sed īśe yasya romaśaṁ niṣeduṣo vijṛmbhate viśvasmād indra uttaraḥ ||

10.086.17a न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।

10.086.17c सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृद्विश्वस्मादिन्द्र उत्तरः ॥

10.086.17a na seśe yasya romaśaṁ niṣeduṣo vijṛmbhate |
10.086.17c sed īśe yasya rambate 'ntarā sakthyā3 kapṛd viśvasmād indra uttaraḥ ||

10.086.18a अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।

10.086.18c असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥

10.086.18a ayam indra vṛṣākapiḥ parasvantaṁ hataṁ vidat |

10.086.18c asiṁ sūnāṁ navaṁ carum ād edhasyāna ācitaṁ viśvasmād indra uttaraḥ ||

10.086.19a अयमेमि विचाकशद्विचिन्वन्दासमार्यम् ।

10.086.19c पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥

10.086.19a ayam emi vicākaśad vicinvan dāsam āryam |
10.086.19c pibāmi pākasutvano 'bhi dhīram acākaśaṁ viśvasmād indra uttaraḥ ||

10.086.20a धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना ।

10.086.20c नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥

10.086.20a dhanva ca yat kṛntatraṁ ca kati svit tā vi yojanā |
10.086.20c nedīyaso vṛṣākape 'stam ehi gṛhām̐ upa viśvasmād indra uttaraḥ ||

10.086.21a पुनरेहि वृषाकपे सुविता कल्पयावहै ।

10.086.21c य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥

10.086.21a punar ehi vṛṣākape suvitā kalpayāvahai |
10.086.21c ya eṣa svapnanaṁśano 'stam eṣi pathā punar viśvasmād indra uttaraḥ ||

10.086.22a यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ।

10.086.22c क्व१ स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥

10.086.22a yad udañco vṛṣākape gṛham indrājagantana |
10.086.22c kva1 sya pulvagho mṛgaḥ kam agañ janayopano viśvasmād indra uttaraḥ ||

10.086.23a पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।

10.086.23c भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः ॥

10.086.23a parśur ha nāma mānavī sākaṁ sasūva viṁśatim |
10.086.23c bhadram bhala tyasyā abhūd yasyā udaram āmayad viśvasmād indra uttaraḥ ||

10.087.01a रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।

10.087.01c शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥

10.087.01a rakṣohaṇaṁ vājinam ā jigharmi mitram prathiṣṭham upa yāmi śarma |
10.087.01c śiśāno agniḥ kratubhiḥ samiddhaḥ sa no divā sa riṣaḥ pātu naktam ||

10.087.02a अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।

10.087.02c आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् ॥

10.087.02a ayodaṁṣṭro arciṣā yātudhānān upa spṛśa jātavedaḥ samiddhaḥ |
10.087.02c ā jihvayā mūradevān rabhasva kravyādo vṛktvy api dhatsvāsan ||

10.087.03a उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च ।

10.087.03c उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान् ॥

10.087.03a ubhobhayāvinn upa dhehi daṁṣṭrā hiṁsraḥ śiśāno 'varam param ca |
10.087.03c utāntarikṣe pari yāhi rājañ jambhaiḥ saṁ dhehy abhi yātudhānān ||

10.087.04a यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः ।

10.087.04c ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्येषाम् ॥

10.087.04a yajñair iṣūḥ sannamamāno agne vācā śalyām̐ aśanibhir dihānaḥ |
10.087.04c tābhir vidhya hṛdaye yātudhānān pratīco bāhūn prati bhaṅdhy eṣām ||

10.087.05a अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।

10.087.05c प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम् ॥

10.087.05a agne tvacaṁ yātudhānasya bhindhi hiṁsrāśanir harasā hantv enam |
10.087.05c pra parvāṇi jātavedaḥ śṛṇīhi kravyāt kraviṣṇur vi cinotu vṛkṇam ||

10.087.06a यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् ।

10.087.06c यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः ॥

10.087.06a yatredānīm paśyasi jātavedas tiṣṭhantam agna uta vā carantam |
10.087.06c yad vāntarikṣe pathibhiḥ patantaṁ tam astā vidhya śarvā śiśānaḥ ||

10.087.07a उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात् ।

10.087.07c अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास्तमदन्त्वेनीः ॥

10.087.07a utālabdhaṁ spṛṇuhi jātaveda ālebhānād ṛṣṭibhir yātudhānāt |
10.087.07c agne pūrvo ni jahi śośucāna āmādaḥ kṣviṅkās tam adantv enīḥ ||

10.087.08a इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।

10.087.08c तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ॥

10.087.08a iha pra brūhi yatamaḥ so agne yo yātudhāno ya idaṁ kṛṇoti |
10.087.08c tam ā rabhasva samidhā yaviṣṭha nṛcakṣasaś cakṣuṣe randhayainam ||

10.087.09a तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।

10.087.09c हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥

10.087.09a tīkṣṇenāgne cakṣuṣā rakṣa yajñam prāñcaṁ vasubhyaḥ pra ṇaya pracetaḥ |
10.087.09c hiṁsraṁ rakṣāṁsy abhi śośucānam mā tvā dabhan yātudhānā nṛcakṣaḥ ||

10.087.10a नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा ।

10.087.10c तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥

10.087.10a nṛcakṣā rakṣaḥ pari paśya vikṣu tasya trīṇi prati śṛṇīhy agrā |
10.087.10c tasyāgne pṛṣṭīr harasā śṛṇīhi tredhā mūlaṁ yātudhānasya vṛśca ||

10.087.11a त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।

10.087.11c तमर्चिषा स्फूर्जयञ्जातवेदः समक्षमेनं गृणते नि वृङ्धि ॥

10.087.11a trir yātudhānaḥ prasitiṁ ta etv ṛtaṁ yo agne anṛtena hanti |
10.087.11c tam arciṣā sphūrjayañ jātavedaḥ samakṣam enaṁ gṛṇate ni vṛṅdhi ||

10.087.12a तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।

10.087.12c अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥

10.087.12a tad agne cakṣuḥ prati dhehi rebhe śaphārujaṁ yena paśyasi yātudhānam |
10.087.12c atharvavaj jyotiṣā daivyena satyaṁ dhūrvantam acitaṁ ny oṣa ||

10.087.13a यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।

10.087.13c मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् ॥

10.087.13a yad agne adya mithunā śapāto yad vācas tṛṣṭaṁ janayanta rebhāḥ |
10.087.13c manyor manasaḥ śaravyā3 jāyate yā tayā vidhya hṛdaye yātudhānān ||

10.087.14a परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।

10.087.14c परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥

10.087.14a parā śṛṇīhi tapasā yātudhānān parāgne rakṣo harasā śṛṇīhi |

10.087.14c parārciṣā mūradevāñ chṛṇīhi parāsutṛpo abhi śośucānaḥ ||

10.087.15a परादृ देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः ।

10.087.15c वाचास्तेनं शरव ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥

10.087.15a parādya devā vṛjinaṁ śṛṇantu pratyag enaṁ śapathā yantu tṛṣṭāḥ |
10.087.15c vācāstenaṁ śarava ṛcchantu marman viśvasyaitu prasitiṁ yātudhānaḥ ||

10.087.16a यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।

10.087.16c यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥

10.087.16a yaḥ pauruṣeyeṇa kraviṣā samaṅkte yo aśvyena paśunā yātudhānaḥ |
10.087.16c yo aghnyāyā bharati kṣīram agne teṣāṁ śīrṣāṇi harasāpi vṛśca ||

10.087.17a संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः ।

10.087.17c पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यञ्चमर्चिषा विध्य मर्मन् ॥

10.087.17a saṁvatsarīṇam paya usriyāyās tasya māśīd yātudhāno nṛcakṣaḥ |
10.087.17c pīyūṣam agne yatamas titṛpsāt tam pratyañcam arciṣā vidhya marman ||

10.087.18a विषं गवां यातुधानाः पिबन्त्वा वृश्च्यन्तामदितये दुरेवाः ।

10.087.18c परैनान्देवः सविता ददातु परा भागमोषधीनां जयन्ताम् ॥

10.087.18a viṣaṁ gavāṁ yātudhānāḥ pibantv ā vṛścyantām aditaye durevāḥ |
10.087.18c parainān devaḥ savitā dadātu parā bhāgam oṣadhīnāṁ jayantām ||

10.087.19a सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।

10.087.19c अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥

10.087.19a sanād agne mṛṇasi yātudhānān na tvā rakṣāṁsi pṛtanāsu jigyuḥ |
10.087.19c anu daha sahamūrān kravyādo mā te hetyā mukṣata daivyāyāḥ ||

10.087.20a त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् ।

10.087.20c प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥

10.087.20a tvaṁ no agne adharād udaktāt tvam paścād uta rakṣā purastāt |
10.087.20c prati te te ajarāsas tapiṣṭhā aghaśaṁsaṁ śośucato dahantu ||

10.087.21a पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् ।

10.087.21c सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥

10.087.21a paścāt purastād adharād udaktāt kaviḥ kāvyena pari pāhi rājan |
10.087.21c sakhe sakhāyam ajaro jarimṇe 'gne martām̐ amartyas tvaṁ naḥ ||

10.087.22a परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।

10.087.22c धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम् ॥

10.087.22a pari tvāgne puraṁ vayaṁ vipraṁ sahasya dhīmahi |
10.087.22c dhṛṣadvarṇaṁ dive-dive hantāram bhaṅgurāvatām ||

10.087.23a विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह ।

10.087.23c अग्ने तिग्मेन शोचिषा तपुरग्राभिरृष्टिभिः ॥

10.087.23a viṣeṇa bhaṅgurāvataḥ prati ṣma rakṣaso daha |
10.087.23c agne tigmena śociṣā tapuragrābhir ṛṣṭibhiḥ ||

10.087.24a प्रत्यग्ने मिथुना दह यातुधाना किमीदिना ।

10.087.24c सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥

10.087.24a praty agne mithunā daha yātudhānā kimīdinā |
10.087.24c saṁ tvā śiśāmi jāgṛhy adabdhaṁ vipra manmabhiḥ ||

10.087.25a प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति ।

10.087.25c यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥

10.087.25a praty agne harasā haraḥ śṛṇīhi viśvataḥ prati |
10.087.25c yātudhānasya rakṣaso balaṁ vi ruja vīryam ||

10.088.01a हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।

10.088.01c तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ॥

10.088.01a haviṣ pāntam ajaraṁ svarvidi divispṛśy āhutaṁ juṣṭam agnau |
10.088.01c tasya bharmaṇe bhuvanāya devā dharmaṇe kaṁ svadhayā paprathanta ||

10.088.02a गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ ।

10.088.02c तस्य देवाः पृथिवी द्यौरुतापोऽरणयन्नोषधीः सख्ये अस्य ॥

10.088.02a gīrṇam bhuvanam tamasāpagūḷham āviḥ svar abhavaj jāte agnau |

10.088.02c tasya devāḥ pṛthivī dyaur utāpo 'raṇayann oṣadhīḥ sakhye asya ||

10.088.03a देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम् ।

10.088.03c यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम् ॥

10.088.03a devebhir nv iṣito yajñiyebhir agnim stoṣāṇy ajaram bṛhantam |

10.088.03c yo bhānunā pṛthivīm dyām utemām ātatāna rodasī antarikṣam ||

10.088.04a यो होतासीत्प्रथमो देवजुष्टो यं समाञ्जन्नाज्येना वृणानाः ।

10.088.04c स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ॥

10.088.04a yo hotāsīt prathamo devajuṣṭo yam samāñjann ājyenā vṛṇānāḥ |

10.088.04c sa patatrītvaram sthā jagad yac chvātram agnir akṛṇoj jātavedāḥ ||

10.088.05a यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।

10.088.05c तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥

10.088.05a yaj jātavedo bhuvanasya mūrdhann atiṣṭho agne saha rocanena |

10.088.05c tam tvāhema matibhir gīrbhir ukthaiḥ sa yajñiyo abhavo rodasiprāḥ ||

10.088.06a मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।

10.088.06c मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥

10.088.06a mūrdhā bhuvo bhavati naktam agnis tataḥ sūryo jāyate prātar udyan |

10.088.06c māyām ū tu yajñiyānām etām apo yat tūrṇiś carati prajānan ||

10.088.07a दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।

10.088.07c तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥

10.088.07a dṛśenyo yo mahinā samiddho 'rocata diviyonir vibhāvā |

10.088.07c tasminn agnau sūktavākena devā havir viśva ājuhavus tanūpāḥ ||

10.088.08a सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः ।

10.088.08c स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥

10.088.08a sūktavākam prathamam ād id agnim ād id dhavir ajanayanta devāḥ |

10.088.08c sa eṣām yajño abhavat tanūpās tam dyaur veda tam pṛthivī tam āpaḥ ||

10.088.09a यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।

10.088.09c सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥

10.088.09a yaṁ devāso 'janayantāgniṁ yasminn ājuhavur bhuvanāni viśvā |
10.088.09c so arciṣā pṛthivīṁ dyām utemām ṛjūyamāno atapan mahitvā ||

10.088.10a स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम् ।

10.088.10c तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥

10.088.10a stomena hi divi devāso agnim ajījanañ chaktibhī rodasiprām |
10.088.10c tam ū akṛṇvan tredhā bhuve kaṁ sa oṣadhīḥ pacati viśvarūpāḥ ||

10.088.11a यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।

10.088.11c यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥

10.088.11a yaded enam adadhur yajñiyāso divi devāḥ sūryam āditeyam |
10.088.11c yadā cariṣṇū mithunāv abhūtām ād it prāpaśyan bhuvanāni viśvā ||

10.088.12a विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।

10.088.12c आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥

10.088.12a viśvasmā agnim bhuvanāya devā vaiśvānaraṁ ketum ahnām akṛṇvan |
10.088.12c ā yas tatānoṣaso vibhātīr apo ūrṇoti tamo arciṣā yan ||

10.088.13a वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम् ।

10.088.13c नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् ॥

10.088.13a vaiśvānaraṁ kavayo yajñiyāso 'gniṁ devā ajanayann ajuryam |
10.088.13c nakṣatram pratnam aminac cariṣṇu yakṣasyādhyakṣaṁ taviṣam bṛhantam ||

10.088.14a वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः ।

10.088.14c यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥

10.088.14a vaiśvānaraṁ viśvahā dīdivāṁsam mantrair agniṁ kavim acchā vadāmaḥ |
10.088.14c yo mahimnā paribabhūvorvī utāvastād uta devaḥ parastāt ||

10.088.15a द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।

10.088.15c ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥

10.088.15a dve srutī aśṛṇavam pitṝṇām ahaṁ devānām uta martyānām |
10.088.15c tābhyām idaṁ viśvam ejat sam eti yad antarā pitaram mātaraṁ ca ||

10.088.16a द्वे समीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम् ।

10.088.16c स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥

10.088.16a dve samīcī bibhṛtaś carantaṁ śīrṣato jātam manasā vimṛṣṭam |
10.088.16c sa pratyaṅ viśvā bhuvanāni tasthāv aprayucchan taraṇir bhrājamānaḥ ||

10.088.17a यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।

10.088.17c आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥

10.088.17a yatrā vadete avaraḥ paraś ca yajñanyoḥ kataro nau vi veda |
10.088.17c ā śekur it sadhamādaṁ sakhāyo nakṣanta yajñaṁ ka idaṁ vi vocat ||

10.088.18a कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।

10.088.18c नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ॥

10.088.18a katy agnayaḥ kati sūryāsaḥ katy uṣāsaḥ katy u svid āpaḥ |
10.088.18c nopaspijaṁ vaḥ pitaro vadāmi pṛcchāmi vaḥ kavayo vidmane kam ||

10.088.19a यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।

10.088.19c तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥

10.088.19a yāvanmātram uṣaso na pratīkaṁ suparṇyo3 vasate mātariśvaḥ |
10.088.19c tāvad dadhāty upa yajñam āyan brāhmaṇo hotur avaro niṣīdan ||

10.089.01a इन्द्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अन्तान् ।

10.089.01c आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिन्धुभ्यो रिरिचानो महित्वा ॥

10.089.01a indraṁ stavā nṛtamaṁ yasya mahnā vibabādhe rocanā vi jmo antān |
10.089.01c ā yaḥ paprau carṣaṇīdhṛd varobhiḥ pra sindhubhyo riricāno mahitvā ||

10.089.02a स सूर्यः पर्युरू वरांस्येन्द्रो ववृत्याद्रथ्येव चक्रा ।

10.089.02c अतिष्ठन्तमपस्यं१ न सर्गं कृष्णा तमांसि त्विष्या जघान ॥

10.089.02a sa sūryaḥ pary urū varāṁsy endro vavṛtyād rathyeva cakrā |

10.089.02c atiṣṭhantam apasyaṁ1 na sargaṁ kṛṣṇā tamāṁsi tviṣyā jaghāna ||

10.089.03a समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यम् ।

10.089.03c वि यः पृष्ठेव जनिमान्यर्य इन्द्रश्चिकाय न सखायमीषे ॥

10.089.03a samānam asmā anapāvṛd arca kṣmayā divo asamam brahma navyam |

10.089.03c vi yaḥ pṛṣṭheva janimāny arya indraś cikāya na sakhāyam īṣe ||

10.089.04a इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।

10.089.04c यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥

10.089.04a indrāya giro aniśitasargā apaḥ prerayaṁ sagarasya budhnāt |

10.089.04c yo akṣeṇeva cakriyā śacībhir viṣvak tastambha pṛthivīm uta dyām ||

10.089.05a आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।

10.089.05c सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥

10.089.05a āpāntamanyus tṛpalaprabharmā dhuniḥ śimīvāñ charumām̐ ṛjīṣī |

10.089.05c somo viśvāny atasā vanāni nārvāg indram pratimānāni debhuḥ ||

10.089.06a न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः ।

10.089.06c यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥

10.089.06a na yasya dyāvāpṛthivī na dhanva nāntarikṣaṁ nādrayaḥ somo akṣāḥ |

10.089.06c yad asya manyur adhinīyamānaḥ śṛṇāti vīḷu rujati sthirāṇi ||

10.089.07a जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून् ।

10.089.07c बिभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः ॥

10.089.07a jaghāna vṛtraṁ svadhitir vaneva ruroja puro aradan na sindhūn |

10.089.07c bibheda giriṁ navam in na kumbham ā gā indro akṛṇuta svayugbhiḥ ||

10.089.08a त्वं ह त्यदृणया इन्द्र धीरोऽसिर्न पर्व वृजिना शृणासि ।

10.089.08c प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ॥

10.089.08a tvaṁ ha tyad ṛṇayā indra dhīro 'sir na parva vṛjinā śṛṇāsi |

10.089.08c pra ye mitrasya varuṇasya dhāma yujaṁ na janā minanti mitram ||

10.089.09a प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति ।

10.089.09c न्यश्मित्रेषु वधमिन्द्र तुम्रं वृषन्वृषाणमरुषं शिशीहि ॥

10.089.09a pra ye mitram prāryamaṇaṁ durevāḥ pra saṅgiraḥ pra varuṇam minanti |
10.089.09c ny a1mitreṣu vadham indra tumraṁ vṛṣan vṛṣāṇam aruṣaṁ śiśīhi ||

10.089.10a इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।

10.089.10c इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥

10.089.10a indro diva indra īśe pṛthivyā indro apām indra it parvatānām |
10.089.10c indro vṛdhām indra in medhirāṇām indraḥ kṣeme yoge havya indraḥ ||

10.089.11a प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः ।

10.089.11c प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ॥

10.089.11a prāktubhya indraḥ pra vṛdho ahabhyaḥ prāntarikṣāt pra samudrasya dhāseḥ |
10.089.11c pra vātasya prathasaḥ pra jmo antāt pra sindhubhyo ririce pra kṣitibhyaḥ ||

10.089.12a प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः ।

10.089.12c अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥

10.089.12a pra śośucatyā uṣaso na ketur asinvā te vartatām indra hetiḥ |
10.089.12c aśmeva vidhya diva ā sṛjānas tapiṣṭhena heṣasā droghamitrān ||

10.089.13a अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः ।

10.089.13c अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥

10.089.13a anv aha māsā anv id vanāny anv oṣadhīr anu parvatāsaḥ |
10.089.13c anv indraṁ rodasī vāvaśāne anv āpo ajihata jāyamānam ||

10.089.14a कर्हि स्वित्सा त इन्द्र चेत्यासदघस्य यद्भिनदो रक्ष एषत् ।

10.089.14c मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते ॥

10.089.14a karhi svit sā ta indra cetyāsad aghasya yad bhinado rakṣa eṣat |
10.089.14c mitrakruvo yac chasane na gāvaḥ pṛthivyā āpṛg amuyā śayante ||

10.089.15a शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इन्द्र ।

10.089.15c अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥

10.089.15a śatrūyanto abhi ye nas tatasre mahi vrādhanta oganāsa indra |
10.089.15c andhenāmitrās tamasā sacantāṁ sujyotiṣo aktavas tām̐ abhi ṣyuḥ ||

10.089.16a पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन्गृणतामृषीणाम् ।

10.089.16c इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥

10.089.16a purūṇi hi tvā savanā janānām brahmāṇi mandan gṛṇatām ṛṣīṇām |
10.089.16c imām āghoṣann avasā sahūtiṁ tiro viśvām̐ arcato yāhy arvāṅ ||

10.089.17a एवा ते वयमिन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम् ।

10.089.17c विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत त इन्द्र नूनम् ॥

10.089.17a evā te vayam indra bhuñjatīnāṁ vidyāma sumatīnāṁ navānām |
10.089.17c vidyāma vastor avasā gṛṇanto viśvāmitrā uta ta indra nūnam ||

10.089.18a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

10.089.18c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

10.089.18a śunaṁ huvema maghavānam indram asmin bhare nṛtamaṁ vājasātau |
10.089.18c śṛṇvantam ugram ūtaye samatsu ghnantaṁ vṛtrāṇi sañjitaṁ dhanānām ||

10.090.01a सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

10.090.01c स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

10.090.01a sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt |
10.090.01c sa bhūmiṁ viśvato vṛtvāty atiṣṭhad daśāṅgulam ||

10.090.02a पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।

10.090.02c उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

10.090.02a puruṣa evedaṁ sarvaṁ yad bhūtaṁ yac ca bhavyam |
10.090.02c utāmṛtatvasyeśāno yad annenātirohati ||

10.090.03a एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।

10.090.03c पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

10.090.03a  etāvān asya mahimāto jyāyām̐ś ca pūruṣaḥ ।
10.090.03c  pādo 'sya viśvā bhūtāni tripād asyāmṛtaṁ divi ।।

10.090.04a त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।

10.090.04c ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥

10.090.04a  tripād ūrdhva ud ait puruṣaḥ pādo 'syehābhavat punaḥ ।
10.090.04c  tato viṣvaṅ vy akrāmat sāśanānaśane abhi ।।

10.090.05a तस्माद्विराळजायत विराजो अधि पूरुषः ।

10.090.05c स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

10.090.05a  tasmād virāḷ ajāyata virājo adhi pūruṣaḥ ।
10.090.05c  sa jāto aty aricyata paścād bhūmim atho puraḥ ।।

10.090.06a यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

10.090.06c वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥

10.090.06a  yat puruṣeṇa haviṣā devā yajñam atanvata ।
10.090.06c  vasanto asyāsīd ājyaṁ grīṣma idhmaḥ śarad dhaviḥ ।।

10.090.07a तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।

10.090.07c तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

10.090.07a  taṁ yajñam barhiṣi praukṣan puruṣaṁ jātam agrataḥ ।
10.090.07c  tena devā ayajanta sādhyā ṛṣayaś ca ye ।।

10.090.08a तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।

10.090.08c पशून्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥

10.090.08a  tasmād yajñāt sarvahutaḥ sambhṛtam pṛṣadājyam ।
10.090.08c  paśūn tām̐ś cakre vāyavyān āraṇyān grāmyāś ca ye ।।

10.090.09a तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।

10.090.09c छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

10.090.09a  tasmād yajñāt sarvahuta ṛcaḥ sāmāni jajñire ।
10.090.09c  chandāṁsi jajñire tasmād yajus tasmād ajāyata ।।

10.090.10a तस्मादश्वा अजायन्त ये के चोभयादतः ।

10.090.10c गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥

10.090.10a tasmād aśvā ajāyanta ye ke cobhayādataḥ |
10.090.10c gāvo ha jajñire tasmāt tasmāj jātā ajāvayaḥ ||

10.090.11a यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।

10.090.11c मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥

10.090.11a yat puruṣaṁ vy adadhuḥ katidhā vy akalpayan |
10.090.11c mukhaṁ kim asya kau bāhū kā ūrū pādā ucyete ||

10.090.12a ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।

10.090.12c ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

10.090.12a brāhmaṇo 'sya mukham āsīd bāhū rājanyaḥ kṛtaḥ |
10.090.12c ūrū tad asya yad vaiśyaḥ padbhyāṁ śūdro ajāyata ||

10.090.13a चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।

10.090.13c मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

10.090.13a candramā manaso jātaś cakṣoḥ sūryo ajāyata |
10.090.13c mukhād indraś cāgniś ca prāṇād vāyur ajāyata ||

10.090.14a नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।

10.090.14c पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥

10.090.14a nābhyā āsīd antarikṣaṁ śīrṣṇo dyauḥ sam avartata |
10.090.14c padbhyām bhūmir diśaḥ śrotrāt tathā lokām̐ akalpayan ||

10.090.15a सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।

10.090.15c देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥

10.090.15a saptāsyāsan paridhayas triḥ sapta samidhaḥ kṛtāḥ |
10.090.15c devā yad yajñaṁ tanvānā abadhnan puruṣam paśum ||

10.090.16a यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

10.090.16c ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

10.090.16a yajñena yajñam ayajanta devās tāni dharmāṇi prathamāny āsan |
10.090.16c te ha nākam mahimānaḥ sacanta yatra pūrve sādhyāḥ santi devāḥ ||

10.091.01a सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे ।

10.091.01c विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते ॥

10.091.01a saṁ jāgṛvadbhir jaramāṇa idhyate dame damūnā iṣayann iḷas pade |
10.091.01c viśvasya hotā haviṣo vareṇyo vibhur vibhāvā suṣakhā sakhīyate ||

10.091.02a स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव ।

10.091.02c जनंजनं जन्यो नाति मन्यते विश आ क्षेति विश्यो३ विशंविशम् ॥

10.091.02a sa darśataśrīr atithir gṛhe-gṛhe vane-vane śiśriye takvavīr iva |
10.091.02c janaṁ-janaṁ janyo nāti manyate viśa ā kṣeti viśyo3 viśaṁ-viśam ||

10.091.03a सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् ।

10.091.03c वसुर्वसूनां क्षयसि त्वमेक इद्द्यावा च यानि पृथिवी च पुष्यतः ॥

10.091.03a sudakṣo dakṣaiḥ kratunāsi sukratur agne kaviḥ kāvyenāsi viśvavit |
10.091.03c vasur vasūnāṁ kṣayasi tvam eka id dyāvā ca yāni pṛthivī ca puṣyataḥ ||

10.091.04a प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः ।

10.091.04c आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः ॥

10.091.04a prajānann agne tava yonim ṛtviyam iḷāyās pade ghṛtavantam āsadaḥ |
10.091.04c ā te cikitra uṣasām ivetayo 'repasaḥ sūryasyeva raśmayaḥ ||

10.091.05a तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्र उषसां न केतवः ।

10.091.05c यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥

10.091.05a tava śriyo varṣyasyeva vidyutaś citrāś cikitra uṣasāṁ na ketavaḥ |
10.091.05c yad oṣadhīr abhisṛṣṭo vanāni ca pari svayaṁ cinuṣe annam āsye ||

10.091.06a तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।

10.091.06c तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥

10.091.06a tam oṣadhīr dadhire garbham ṛtviyaṁ tam āpo agniṁ janayanta mātaraḥ |
10.091.06c tam it samānaṁ vaninaś ca vīrudho 'ntarvatīś ca suvate ca viśvahā ||

10.091.07a वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।

10.091.07c आ ते यतन्ते रथ्यो३ यथा पृथक्छर्धांस्यग्ने अजराणि धक्षतः ॥

10.091.07a vātopadhūta iṣito vaśāṁ̐ anu tṛṣu yad annā veviṣad vitiṣṭhase |
10.091.07c ā te yatante rathyo3 yathā pṛthak chardhāṁsy agne ajarāṇi dhakṣataḥ ||

10.091.08a मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् ।

10.091.08c तमिदर्भे हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत् ॥

10.091.08a medhākāraṁ vidathasya prasādhanam agniṁ hotāram paribhūtamam matim |
10.091.08c tam id arbhe haviṣy ā samānam it tam in mahe vṛṇate nānyaṁ tvat ||

10.091.09a त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः ।

10.091.09c यद्देवयन्तो दधति प्रयांसि ते हविष्मन्तो मनवो वृक्तबर्हिषः ॥

10.091.09a tvām id atra vṛṇate tvāyavo hotāram agne vidatheṣu vedhasaḥ |
10.091.09c yad devayanto dadhati prayāṁsi te haviṣmanto manavo vṛktabarhiṣaḥ ||

10.091.10a तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।

10.091.10c तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥

10.091.10a tavāgne hotraṁ tava potram ṛtviyaṁ tava neṣṭraṁ tvam agnid ṛtāyataḥ |
10.091.10c tava praśāstraṁ tvam adhvarīyasi brahmā cāsi gṛhapatiś ca no dame ||

10.091.11a यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति ।

10.091.11c तस्य होता भवसि यासि दूत्य१मुप ब्रूषे यजस्यध्वरीयसि ॥

10.091.11a yas tubhyam agne amṛtāya martyaḥ samidhā dāśad uta vā haviṣkṛti |
10.091.11c tasya hotā bhavasi yāsi dūtya1m upa brūṣe yajasy adhvarīyasi ||

10.091.12a इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत ।

10.091.12c वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत् ॥

10.091.12a imā asmai matayo vāco asmad āṁ̐ ṛco giraḥ suṣṭutayaḥ sam agmata |
10.091.12c vasūyavo vasave jātavedase vṛddhāsu cid vardhano yāsu cākanat ||

10.091.13a इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः ।

10.091.13c भूया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥

10.091.13a imām pratnāya suṣṭutiṁ navīyasīṁ voceyam asmā uśate śṛṇotu naḥ |
10.091.13c bhūyā antarā hṛdy asya nispṛśe jāyeva patya uśatī suvāsāḥ ||

10.091.14a यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।

10.091.14c कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥

10.091.14a yasminn aśvāsa ṛṣabhāsa ukṣaṇo vaśā meṣā avasṛṣṭāsa āhutāḥ |
10.091.14c kīlālape somapṛṣṭhāya vedhase hṛdā matiṁ janaye cārum agnaye ||

10.091.15a अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।

10.091.15c वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥

10.091.15a ahāvy agne havir āsye te sruciva ghṛtaṁ camvīva somaḥ |
10.091.15c vājasaniṁ rayim asme suvīram praśastaṁ dhehi yaśasam bṛhantam ||

10.092.01a यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम् ।

10.092.01c शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥

10.092.01a yajñasya vo rathyaṁ viśpatiṁ viśāṁ hotāram aktor atithiṁ vibhāvasum |
10.092.01c śocañ chuṣkāsu hariṇīṣu jarbhurad vṛṣā ketur yajato dyām aśāyata ||

10.092.02a इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।

10.092.02c अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥

10.092.02a imam añjaspām ubhaye akṛṇvata dharmāṇam agniṁ vidathasya sādhanam |
10.092.02c aktuṁ na yahvam uṣasaḥ purohitaṁ tanūnapātam aruṣasya niṁsate ||

10.092.03a बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे ।

10.092.03c यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ॥

10.092.03a baḷ asya nīthā vi paṇeś ca manmahe vayā asya prahutā āsur attave |
10.092.03c yadā ghorāso amṛtatvam āśatād ij janasya daivyasya carkiran ||

10.092.04a ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी ।

10.092.04c इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥

10.092.04a ṛtasya hi prasitir dyaur uru vyaco namo mahy a1ramatiḥ panīyasī |
10.092.04c indro mitro varuṇaḥ saṁ cikitrire 'tho bhagaḥ savitā pūtadakṣasaḥ ||

10.092.05a प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।

10.092.05c येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ॥

10.092.05a pra rudreṇa yayinā yanti sindhavas tiro mahīm aramatiṁ dadhanvire |
10.092.05c yebhiḥ parijmā pariyann uru jrayo vi roruvaj jaṭhare viśvam ukṣate ||

10.092.06a क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।

10.092.06c तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः ॥

10.092.06a krāṇā rudrā maruto viśvakṛṣṭayo divaḥ śyenāso asurasya nīlayaḥ |
10.092.06c tebhiś caṣṭe varuṇo mitro aryamendro devebhir arvaśebhir arvaśaḥ ||

10.092.07a इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।

10.092.07c प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥

10.092.07a indre bhujaṁ śaśamānāsa āśata sūro dṛśīke vṛṣaṇaś ca pauṁsye |
10.092.07c pra ye nv asyārhaṇā tatakṣire yujaṁ vajraṁ nṛṣadaneṣu kāravaḥ ||

10.092.08a सूरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः ।

10.092.08c भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरि स्तन्नबाधितः ॥

10.092.08a sūraś cid ā harito asya rīramad indrād ā kaś cid bhayate tavīyasaḥ |
10.092.08c bhīmasya vṛṣṇo jaṭharād abhiśvaso dive-dive sahuri stann abādhitaḥ ||

10.092.09a स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।

10.092.09c येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥

10.092.09a stomaṁ vo adya rudrāya śikvase kṣayadvīrāya namasā didiṣṭana |
10.092.09c yebhiḥ śivaḥ svavām̐ evayāvabhir divaḥ siṣakti svayaśā nikāmabhiḥ ||

10.092.10a ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमजामयः ।

10.092.10c यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे ॥

10.092.10a te hi prajāyā abharanta vi śravo bṛhaspatir vṛṣabhaḥ somajāmayaḥ |

10.092.10c yajñair atharvā prathamo vi dhārayad devā dakṣair bhṛgavaḥ saṁ cikitrire ||

10.092.11a ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदितिः ।

10.092.11c देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे ॥

10.092.11a te hi dyāvāpṛthivī bhūriretasā narāśaṁsaś caturaṅgo yamo 'ditiḥ |

10.092.11c devas tvaṣṭā draviṇodā ṛbhukṣaṇaḥ pra rodasī maruto viṣṇur arhire ||

10.092.12a उत स्य न उशिजामुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि ।

10.092.12c सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम् ॥

10.092.12a uta sya na uśijām urviyā kavir ahiḥ śṛṇotu budhnyo3 havīmani |

10.092.12c sūryāmāsā vicarantā divikṣitā dhiyā śamīnahuṣī asya bodhatam ||

10.092.13a प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।

10.092.13c आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ॥

10.092.13a pra naḥ pūṣā carathaṁ viśvadevyo 'pāṁ napād avatu vāyur iṣṭaye |

10.092.13c ātmānaṁ vasyo abhi vātam arcata tad aśvinā suhavā yāmani śrutam ||

10.092.14a विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।

10.092.14c ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम् ॥

10.092.14a viśām āsām abhayānām adhikṣitaṁ gīrbhir u svayaśasaṁ gṛṇīmasi |

10.092.14c gnābhir viśvābhir aditim anarvaṇam aktor yuvānaṁ nṛmaṇā adhā patim ||

10.092.15a रेभदत्र जनुषा पूर्वो अङ्गिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।

10.092.15c येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ॥

10.092.15a rebhad atra januṣā pūrvo aṅgirā grāvāṇa ūrdhvā abhi cakṣur adhvaram |

10.092.15c yebhir vihāyā abhavad vicakṣaṇaḥ pāthaḥ sumekaṁ svadhitir vananvati ||

10.093.01a महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः ।

10.093.01c तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि ॥

10.093.01a mahi dyāvāpṛthivī bhūtam urvī nārī yahvī na rodasī sadaṁ naḥ |

10.093.01c tebhir naḥ pātaṁ sahyasa ebhir naḥ pātaṁ śūṣaṇi ||

10.093.02a यज्ञेयज्ञे स मर्त्यो देवान्सपर्यति ।

10.093.02c यः सुम्नैर्दीर्घश्रुत्तम आविवासत्येनान् ॥

10.093.02a yajñe-yajñe sa martyo devān saparyati |
10.093.02c yaḥ sumnair dīrghaśruttama āvivāsaty enān ||

10.093.03a विश्वेषामिरज्यवो देवानां वार्महः ।

10.093.03c विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः ॥

10.093.03a viśveṣām irajyavo devānām̐ vār mahaḥ |
10.093.03c viśve hi viśvamahaso viśve yajñeṣu yajñiyāḥ ||

10.093.04a ते घा राजानो अमृतस्य मन्द्रा अर्यमा मित्रो वरुणः परिज्मा ।

10.093.04c कद्रुद्रो नृणां स्तुतो मरुतः पूषणो भगः ॥

10.093.04a te ghā rājāno amṛtasya mandrā aryamā mitro varuṇaḥ parijmā |
10.093.04c kad rudro nṛṇām̐ stuto marutaḥ pūṣaṇo bhagaḥ ||

10.093.05a उत नो नक्तमपां वृषण्वसू सूर्यामासा सदनाय सधन्या ।

10.093.05c सचा यत्साद्येषामहिर्बुध्नेषु बुध्न्यः ॥

10.093.05a uta no naktam apām̐ vṛṣaṇvasū sūryāmāsā sadanāya sadhanyā |
10.093.05c sacā yat sādy eṣām ahir budhneṣu budhnyaḥ ||

10.093.06a उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यताम् ।

10.093.06c महः स राय एषतेऽति धन्वेव दुरिता ॥

10.093.06a uta no devāv aśvinā śubhas patī dhāmabhir mitrāvaruṇā uruṣyatām |
10.093.06c mahaḥ sa rāya eṣate 'ti dhanveva duritā ||

10.093.07a उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।

10.093.07c ऋभुर्वाज ऋभुक्षणः परिज्मा विश्ववेदसः ॥

10.093.07a uta no rudrā cin mṛḷatām aśvinā viśve devāso rathaspatir bhagaḥ |
10.093.07c ṛbhur vāja ṛbhukṣaṇaḥ parijmā viśvavedasaḥ ||

10.093.08a ऋभुरृभुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।

10.093.08c दुष्टरं यस्य साम चिदृधग्यज्ञो न मानुषः ॥

10.093.08a ṛbhur ṛbhukṣā ṛbhur vidhato mada ā te harī jūjuvānasya vājinā |
10.093.08c duṣṭaraṁ yasya sāma cid ṛdhag yajño na mānuṣaḥ ||

10.093.09a कृधी नो अह्रयो देव सवितः स च स्तुषे मघोनाम् ।

10.093.09c सहो न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे ॥

10.093.09a kṛdhī no ahrayo deva savitaḥ sa ca stuṣe maghonām |
10.093.09c saho na indro vahnibhir ny eṣāṁ carṣaṇīnāṁ cakraṁ raśmiṁ na yoyuve ||

10.093.10a ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।

10.093.10c पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥

10.093.10a aiṣu dyāvāpṛthivī dhātam mahad asme vīreṣu viśvacarṣaṇi śravaḥ |
10.093.10c pṛkṣaṁ vājasya sātaye pṛkṣaṁ rāyota turvaṇe ||

10.093.11a एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये ।

10.093.11c सदा पाह्यभिष्टये मेदतां वेदता वसो ॥

10.093.11a etaṁ śaṁsam indrāsmayuṣ ṭvaṁ kūcit santaṁ sahasāvann abhiṣṭaye |
10.093.11c sadā pāhy abhiṣṭaye medatāṁ vedatā vaso ||

10.093.12a एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम् ।

10.093.12c संवननं नाश्व्यं तष्टेवानपच्युतम् ॥

10.093.12a etam me stomaṁ tanā na sūrye dyutadyāmānaṁ vāvṛdhanta nṛṇām |
10.093.12c saṁvananaṁ nāśvyaṁ taṣṭevānapacyutam ||

10.093.13a वावर्त येषां राया युक्तैषां हिरण्ययी ।

10.093.13c नेमधिता न पौंस्या वृथेव विष्टान्ता ॥

10.093.13a vāvarta yeṣāṁ rāyā yuktaiṣāṁ hiraṇyayī |
10.093.13c nemadhitā na pauṁsyā vṛtheva viṣṭāntā ||

10.093.14a प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।

10.093.14c ये युक्त्वाय पञ्च शतास्मयु पथा विश्राव्येषाम् ॥

10.093.14a pra tad duḥśīme pṛthavāne vene pra rāme vocam asure maghavatsu |

10.093.14c ye yuktvāya pañca śatāsmayu pathā viśrāvy eṣām ||

10.093.15a अधीन्वत्र सप्ततिं च सप्त च ।

10.093.15b सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ॥

10.093.15a adhīn nv atra saptatiṁ ca sapta ca |
10.093.15b sadyo didiṣṭa tānvaḥ sadyo didiṣṭa pārthyaḥ sadyo didiṣṭa māyavaḥ ||

10.094.01a प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।

10.094.01c यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥

10.094.01a praite vadantu pra vayaṁ vadāma grāvabhyo vācaṁ vadatā vadadbhyaḥ |
10.094.01c yad adrayaḥ parvatāḥ sākam āśavaḥ ślokaṁ ghoṣam bharathendrāya sominaḥ ||

10.094.02a एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः ।

10.094.02c विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ॥

10.094.02a ete vadanti śatavat sahasravad abhi krandanti haritebhir āsabhiḥ |
10.094.02c viṣṭvī grāvāṇaḥ sukṛtaḥ sukṛtyayā hotuś cit pūrve haviradyam āśata ||

10.094.03a एते वदन्त्यविदन्नना मधु न्यूङ्खयन्ते अधि पक्व आमिषि ।

10.094.03c वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः ॥

10.094.03a ete vadanty avidann anā madhu ny ūṅkhayante adhi pakva āmiṣi |
10.094.03c vṛkṣasya śākhām aruṇasya bapsatas te sūbharvā vṛṣabhāḥ prem arāviṣuḥ ||

10.094.04a बृहद्वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु ।

10.094.04c संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ॥

10.094.04a bṛhad vadanti madireṇa mandinendraṁ krośanto 'vidann anā madhu |
10.094.04c saṁrabhyā dhīrāḥ svasṛbhir anartiṣur āghoṣayantaḥ pṛthivīm upabdibhiḥ ||

10.094.05a सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।

10.094.05c न्य१ङ्नि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥

10.094.05a suparṇā vācam akratopa dyavy ākhare kṛṣṇā iṣirā anartiṣuḥ |
10.094.05c nya1ṅ ni yanty uparasya niṣkṛtam purū reto dadhire sūryaśvitaḥ ||

10.094.06a उग्रा इव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।

10.094.06c यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ॥

10.094.06a ugrā iva pravahantaḥ samāyamuḥ sākaṁ yuktā vṛṣaṇo bibhrato dhuraḥ |
10.094.06c yac chvasanto jagrasānā arāviṣuḥ śṛṇva eṣām prothatho arvatām iva ||

10.094.07a दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।

10.094.07c दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥

10.094.07a daśāvanibhyo daśakakṣyebhyo daśayoktrebhyo daśayojanebhyaḥ |
10.094.07c daśābhīśubhyo arcatājarebhyo daśa dhuro daśa yuktā vahadbhyaḥ ||

10.094.08a ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।

10.094.08c त ऊ सुतस्य सोम्यस्यान्धसोंऽशोः पीयूषं प्रथमस्य भेजिरे ॥

10.094.08a te adrayo daśayantrāsa āśavas teṣām ādhānam pary eti haryatam |
10.094.08c ta ū sutasya somyasyāndhaso 'ṁśoḥ pīyūṣam prathamasya bhejire ||

10.094.09a ते सोमादो हरी इन्द्रस्य निंसतेंऽशुं दुहन्तो अध्यासते गवि ।

10.094.09c तेभिर्दुग्धं पपिवान्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते ॥

10.094.09a te somādo harī indrasya niṁsate 'ṁśuṁ duhanto adhy āsate gavi |
10.094.09c tebhir dugdham papivān somyam madhv indro vardhate prathate vṛṣāyate ||

10.094.10a वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः ।

10.094.10c रैवत्येव महसा चारव स्थन यस्य ग्रावाणो अजुषध्वमध्वरम् ॥

10.094.10a vṛṣā vo aṁśur na kilā riṣāthaneḷāvantaḥ sadam it sthanāśitāḥ |
10.094.10c raivatyeva mahasā cārava sthana yasya grāvāṇo ajuṣadhvam adhvaram ||

10.094.11a तृदिला अतृदिलासो अद्रयोऽश्रमणा अशृथिता अमृत्यवः ।

10.094.11c अनातुरा अजरा स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥

10.094.11a tṛdilā atṛdilāso adrayo 'śramaṇā aśṛthitā amṛtyavaḥ |
10.094.11c anāturā ajarā sthāmaviṣṇavaḥ supīvaso atṛṣitā atṛṣṇajaḥ ||

10.094.12a ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युञ्जते ।

10.094.12c अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥

10.094.12a dhruvā eva vaḥ pitaro yuge-yuge kṣemakāmāsaḥ sadaso na yuñjate |
10.094.12c ajuryāso hariṣāco haridrava ā dyāṁ raveṇa pṛthivīm aśuśravuḥ ||

10.094.13a तदिद्वदन्त्यद्रयो विमोचने यामन्नञ्जस्पा इव घेदुपब्दिभिः ।

10.094.13c वपन्तो बीजमिव धान्याकृतः पृञ्चन्ति सोमं न मिनन्ति बप्सतः ॥

10.094.13a tad id vadanty adrayo vimocane yāmann añjaspā iva ghed upabdibhiḥ |
10.094.13c vapanto bījam iva dhānyākṛtaḥ pṛñcanti somaṁ na minanti bapsataḥ ||

10.094.14a सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः ।

10.094.14c वि षू मुञ्चा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः ॥

10.094.14a sute adhvare adhi vācam akratā krīḷayo na mātaraṁ tudantaḥ |
10.094.14c vi ṣū muñcā suṣuvuṣo manīṣāṁ vi vartantām adrayaś cāyamānāḥ ||

10.095.01a हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।

10.095.01c न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥

10.095.01a haye jāye manasā tiṣṭha ghore vacāṁsi miśrā kṛṇavāvahai nu |
10.095.01c na nau mantrā anuditāsa ete mayas karan paratare canāhan ||

10.095.02a किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।

10.095.02c पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥

10.095.02a kim etā vācā kṛṇavā tavāham prākramiṣam uṣasām agriyeva |
10.095.02c purūravaḥ punar astam parehi durāpanā vāta ivāham asmi ||

10.095.03a इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।

10.095.03c अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥

10.095.03a iṣur na śriya iṣudher asanā goṣāḥ śatasā na raṁhiḥ |
10.095.03c avīre kratau vi davidyutan norā na māyuṁ citayanta dhunayaḥ ||

10.095.04a सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।

10.095.04c अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन ॥

10.095.04a sā vasu dadhatī śvaśurāya vaya uṣo yadi vaṣṭy antigṛhāt |
10.095.04c astaṁ nanakṣe yasmiñ cākan divā naktaṁ śnathitā vaitasena ||

10.095.05a त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।

10.095.05c पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः ॥

10.095.05a triḥ sma māhnaḥ śnathayo vaitasenota sma me 'vyatyai pṛṇāsi |
10.095.05c purūravo 'nu te ketam āyaṁ rājā me vīra tanva1s tad āsīḥ ||

10.095.06a या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः ।

10.095.06c ता अञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥

10.095.06a yā sujūrṇiḥ śreṇiḥ sumnaāpir hradecakṣur na granthinī caraṇyuḥ |
10.095.06c tā añjayo 'ruṇayo na sasruḥ śriye gāvo na dhenavo 'navanta ||

10.095.07a समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूर्ताः ।

10.095.07c महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥

10.095.07a sam asmiñ jāyamāna āsata gnā utem avardhan nadya1ḥ svagūrtāḥ |
10.095.07c mahe yat tvā purūravo raṇāyāvardhayan dasyuhatyāya devāḥ ||

10.095.08a सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।

10.095.08c अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः ॥

10.095.08a sacā yad āsu jahatīṣv atkam amānuṣīṣu mānuṣo niṣeve |
10.095.08c apa sma mat tarasantī na bhujyus tā atrasan rathaspṛśo nāśvāḥ ||

10.095.09a यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते ।

10.095.09c ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥

10.095.09a yad āsu marto amṛtāsu nispṛk saṁ kṣoṇībhiḥ kratubhir na pṛṅkte |
10.095.09c tā ātayo na tanvaḥ śumbhata svā aśvāso na krīḷayo dandaśānāḥ ||

10.095.10a विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।

10.095.10c जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥

10.095.10a vidyun na yā patantī davidyod bharantī me apyā kāmyāni |
10.095.10c janiṣṭo apo naryaḥ sujātaḥ prorvaśī tirata dīrgham āyuḥ ||

10.095.11a जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः।

10.095.11c अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि॥

10.095.11a jajñiṣa itthā gopīthyāya hi dadhātha tat purūravo ma ojaḥ |
10.095.11c aśāsaṁ tvā viduṣī sasminn ahan na ma āśṛṇoḥ kim abhug vadāsi ||

10.095.12a कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्।

10.095.12c को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत्॥

10.095.12a kadā sūnuḥ pitaraṁ jāta icchāc cakran nāśru vartayad vijānan |
10.095.12c ko dampatī samanasā vi yūyod adha yad agniḥ śvaśureṣu dīdayat ||

10.095.13a प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै।

10.095.13c प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः॥

10.095.13a prati bravāṇi vartayate aśru cakran na krandad ādhye śivāyai |
10.095.13c pra tat te hinavā yat te asme parehy astaṁ nahi mūra māpaḥ ||

10.095.14a सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ।

10.095.14c अधा शयीत निरृतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥

10.095.14a sudevo adya prapated anāvṛt parāvataṁ paramāṁ gantavā u |
10.095.14c adhā śayīta nirṛter upasthe 'dhainaṁ vṛkā rabhasāso adyuḥ ||

10.095.15a पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन्।

10.095.15c न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता॥

10.095.15a purūravo mā mṛthā mā pra papto mā tvā vṛkāso aśivāsa u kṣan |
10.095.15c na vai straiṇāni sakhyāni santi sālāvṛkāṇāṁ hṛdayāny etā ||

10.095.16a यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः।

10.095.16c घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि॥

10.095.16a yad virūpācaram martyeṣv avasaṁ rātrīḥ śaradaś catasraḥ |
10.095.16c ghṛtasya stokaṁ sakṛd ahna āśnāṁ tād evedaṁ tātṛpāṇā carāmi ||

10.095.17a अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः।

10.095.17c उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥

10.095.17a antarikṣaprāṁ rajaso vimānīm upa śikṣāmy urvaśīṁ vasiṣṭhaḥ |
10.095.17c upa tvā rātiḥ sukṛtasya tiṣṭhān ni vartasva hṛdayaṁ tapyate me ||

10.095.18a इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबन्धुः ।

10.095.18c प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥

10.095.18a iti tvā devā ima āhur aiḷa yathem etad bhavasi mṛtyubandhuḥ |
10.095.18c prajā te devān haviṣā yajāti svarga u tvam api mādayāse ||

10.096.01a प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।

10.096.01c घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥

10.096.01a pra te mahe vidathe śaṁsiṣaṁ harī pra te vanve vanuṣo haryatam madam |
10.096.01c ghṛtaṁ na yo haribhiś cāru secata ā tvā viśantu harivarpasaṁ giraḥ ||

10.096.02a हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं यथा सदः ।

10.096.02c आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिवन्तमर्चत ॥

10.096.02a hariṁ hi yonim abhi ye samasvaran hinvanto harī divyaṁ yathā sadaḥ |
10.096.02c ā yam pṛṇanti haribhir na dhenava indrāya śūṣaṁ harivantam arcata ||

10.096.03a सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।

10.096.03c द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥

10.096.03a so asya vajro harito ya āyaso harir nikāmo harir ā gabhastyoḥ |
10.096.03c dyumnī suśipro harimanyusāyaka indre ni rūpā haritā mimikṣire ||

10.096.04a दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या ।

10.096.04c तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिम्भरः ॥

10.096.04a divi na ketur adhi dhāyi haryato vivyacad vajro harito na raṁhyā |
10.096.04c tudad ahiṁ hariśipro ya āyasaḥ sahasraśokā abhavad dharimbharaḥ ||

10.096.05a त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।

10.096.05c त्वं हर्यसि तव विश्वमुक्थ्यमसामि राधो हरिजात हर्यतम् ॥

10.096.05a tvaṁ-tvam aharyathā upastutaḥ pūrvebhir indra harikeśa yajvabhiḥ |
10.096.05c tvaṁ haryasi tava viśvam ukthya1m asāmi rādho harijāta haryatam ||

10.096.06a ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी ।

10.096.06c पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥

10.096.06a tā vajriṇam mandinaṁ stomyam mada indraṁ rathe vahato haryatā harī |
10.096.06c purūṇy asmai savanāni haryata indrāya somā harayo dadhanvire ||

10.096.07a अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा ।

10.096.07c अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥

10.096.07a araṁ kāmāya harayo dadhanvire sthirāya hinvan harayo harī turā |
10.096.07c arvadbhir yo haribhir joṣam īyate so asya kāmaṁ harivantam ānaśe ||

10.096.08a हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत ।

10.096.08c अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥

10.096.08a hariśmaśārur harikeśa āyasas turaspeye yo haripā avardhata |
10.096.08c arvadbhir yo haribhir vājinīvasur ati viśvā duritā pāriṣad dharī ||

10.096.09a स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।

10.096.09c प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥

10.096.09a sruveva yasya hariṇī vipetatuḥ śipre vājāya hariṇī davidhvataḥ |
10.096.09c pra yat kṛte camase marmṛjad dharī pītvā madasya haryatasyāndhasaḥ ||

10.096.10a उत स्म सद्म हर्यतस्य पस्त्योरत्यो न वाजं हरिवाँ अचिक्रदत् ।

10.096.10c मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ॥

10.096.10a uta sma sadma haryatasya pastyo3r atyo na vājaṁ harivāṁ̐ acikradat |
10.096.10c mahī cid dhi dhiṣaṇāharyad ojasā bṛhad vayo dadhiṣe haryataś cid ā ||

10.096.11a आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।

10.096.11c प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥

10.096.11a ā rodasī haryamāṇo mahitvā navyaṁ-navyaṁ haryasi manma nu priyam |
10.096.11c pra pastyam asura haryataṁ gor āviṣ kṛdhi haraye sūryāya ||

10.096.12a आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।

10.096.12c पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम् ॥

10.096.12a ā tvā haryantam prayujo janānāṁ rathe vahantu hariśipram indra |
10.096.12c pibā yathā pratibhṛtasya madhvo haryan yajñaṁ sadhamāde daśoṇim ||

10.096.13a अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।

10.096.13c ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥

10.096.13a apāḥ pūrveṣāṁ harivaḥ sutānām atho idaṁ savanaṁ kevalaṁ te |
10.096.13c mamaddhi somam madhumantam indra satrā vṛṣañ jaṭhara ā vṛṣasva ||

10.097.01a या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।

10.097.01c मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥

10.097.01a yā oṣadhīḥ pūrvā jātā devebhyas triyugam purā |
10.097.01c manai nu babhrūṇām ahaṁ śataṁ dhāmāni sapta ca ||

10.097.02a शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।

10.097.02c अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥

10.097.02a śataṁ vo amba dhāmāni sahasram uta vo ruhaḥ |
10.097.02c adhā śatakratvo yūyam imam me agadaṁ kṛta ||

10.097.03a ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।

10.097.03c अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥

10.097.03a oṣadhīḥ prati modadhvam puṣpavatīḥ prasūvarīḥ |
10.097.03c aśvā iva sajitvarīr vīrudhaḥ pārayiṣṇavaḥ ||

10.097.04a ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।

10.097.04c सनेयमश्वं गां वास आत्मानं तव पूरुष ॥

10.097.04a oṣadhīr iti mātaras tad vo devīr upa bruve |
10.097.04c saneyam aśvaṁ gāṁ vāsa ātmānaṁ tava pūruṣa ||

10.097.05a अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।

10.097.05c गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥

10.097.05a aśvatthe vo niṣadanam parṇe vo vasatiṣ kṛtā ।
10.097.05c gobhāja it kilāsatha yat sanavatha pūruṣam ॥

10.097.06a यत्रौषधीः समग्मत राजानः समिताविव ।

10.097.06c विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥

10.097.06a yatrauṣadhīḥ samagmata rājānaḥ samitāv iva ।
10.097.06c vipraḥ sa ucyate bhiṣag rakṣohāmīvacātanaḥ ॥

10.097.07a अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् ।

10.097.07c आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥

10.097.07a aśvāvatīṁ somāvatīm ūrjayantīm udojasam ।
10.097.07c āvitsi sarvā oṣadhīr asmā ariṣṭatātaye ॥

10.097.08a उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।

10.097.08c धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥

10.097.08a uc chuṣmā oṣadhīnāṁ gāvo goṣṭhād iverate ।
10.097.08c dhanaṁ saniṣyantīnām ātmānaṁ tava pūruṣa ॥

10.097.09a इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः ।

10.097.09c सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥

10.097.09a iṣkṛtir nāma vo mātātho yūyaṁ stha niṣkṛtīḥ ।
10.097.09c sīrāḥ patatriṇī sthana yad āmayati niṣ kṛtha ॥

10.097.10a अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः ।

10.097.10c ओषधीः प्राचुच्यवुर्यत्किं च तन्वो३ रपः ॥

10.097.10a ati viśvāḥ pariṣṭhā stena iva vrajam akramuḥ ।
10.097.10c oṣadhīḥ prācucyavur yat kiṁ ca tanvo3 rapaḥ ॥

10.097.11a यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।

10.097.11c आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥

10.097.11a yad imā vājayann aham oṣadhīr hasta ādadhe ।

10.097.11c ātmā yakṣmasya naśyati purā jīvagṛbho yathā ||

10.097.12a यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।

10.097.12c ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥

10.097.12a yasyauṣadhīḥ prasarpathāṅgam-aṅgam paruṣ-paruḥ |
10.097.12c tato yakṣmaṁ vi bādhadhva ugro madhyamaśīr iva ||

10.097.13a साकं यक्ष्म प्र पत चाषेण किकिदीविना ।

10.097.13c साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥

10.097.13a sākaṁ yakṣma pra pata cāṣeṇa kikidīvinā |
10.097.13c sākaṁ vātasya dhrājyā sākaṁ naśya nihākayā ||

10.097.14a अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।

10.097.14c ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥

10.097.14a anyā vo anyām avatv anyānyasyā upāvata |
10.097.14c tāḥ sarvāḥ saṁvidānā idam me prāvatā vacaḥ ||

10.097.15a याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

10.097.15c बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥

10.097.15a yāḥ phalinīr yā aphalā apuṣpā yāś ca puṣpiṇīḥ |
10.097.15c bṛhaspatiprasūtās tā no muñcantv aṁhasaḥ ||

10.097.16a मुञ्चन्तु मा शपथ्या३दथो वरुण्यादुत ।

10.097.16c अथो यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषात् ॥

10.097.16a muñcantu mā śapathyā3d atho varuṇyād uta |
10.097.16c atho yamasya paḍbīśāt sarvasmād devakilbiṣāt ||

10.097.17a अवपतन्तीरवदन्दिव ओषधयस्परि ।

10.097.17c यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥

10.097.17a avapatantīr avadan diva oṣadhayas pari |
10.097.17c yaṁ jīvam aśnavāmahai na sa riṣyāti pūruṣaḥ ||

10.097.18a या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।

10.097.18c तासां त्वमस्युत्तमारं कामाय शं हृदे ॥

10.097.18a yā oṣadhīḥ somarājñīr bahvīḥ śatavicakṣaṇāḥ |
10.097.18c tāsāṁ tvam asy uttamāraṁ kāmāya śaṁ hṛde ||

10.097.19a या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।

10.097.19c बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ॥

10.097.19a yā oṣadhīḥ somarājñīr viṣṭhitāḥ pṛthivīm anu |
10.097.19c bṛhaspatiprasūtā asyai saṁ datta vīryam ||

10.097.20a मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।

10.097.20c द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥

10.097.20a mā vo riṣat khanitā yasmai cāhaṁ khanāmi vaḥ |
10.097.20c dvipac catuṣpad asmākaṁ sarvam astv anāturam ||

10.097.21a याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।

10.097.21c सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ॥

10.097.21a yāś cedam upaśṛṇvanti yāś ca dūram parāgatāḥ |
10.097.21c sarvāḥ saṅgatya vīrudho 'syai saṁ datta vīryam ||

10.097.22a ओषधयः सं वदन्ते सोमेन सह राज्ञा ।

10.097.22c यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥

10.097.22a oṣadhayaḥ saṁ vadante somena saha rājñā |
10.097.22c yasmai kṛṇoti brāhmaṇas taṁ rājan pārayāmasi ||

10.097.23a त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।

10.097.23c उपस्तिरस्तु सो३ऽस्माकं यो अस्माँ अभिदासति ॥

10.097.23a tvam uttamāsy oṣadhe tava vṛkṣā upastayaḥ |
10.097.23c upastir astu so3 'smākaṁ yo asmām̐ abhidāsati ||

10.098.01a बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।

10.098.01c आदित्यैर्वा यद्वसुभिर्मरुत्वान्स पर्जन्यं शंतनवे वृषाय ॥

10.098.01a bṛhaspate prati me devatām ihi mitro vā yad varuṇo vāsi pūṣā |
10.098.01c ādityair vā yad vasubhir marutvān sa parjanyaṁ śantanave vṛṣāya ||

10.098.02a आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत् ।

10.098.02c प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ॥

10.098.02a ā devo dūto ajiraś cikitvān tvad devāpe abhi mām agacchat |
10.098.02c pratīcīnaḥ prati mām ā vavṛtsva dadhāmi te dyumatīṁ vācam āsan ||

10.098.03a अस्मे धेहि द्युमतीं वाचमासन्बृहस्पते अनमीवामिषिराम् ।

10.098.03c यया वृष्टिं शंतनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश ॥

10.098.03a asme dhehi dyumatīṁ vācam āsan bṛhaspate anamīvām iṣirām |
10.098.03c yayā vṛṣṭiṁ śantanave vanāva divo drapso madhumām̐ ā viveśa ||

10.098.04a आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यधिरथं सहस्रम् ।

10.098.04c नि षीद होत्रमृतुथा यजस्व देवान्देवापे हविषा सपर्य ॥

10.098.04a ā no drapsā madhumanto viśantv indra dehy adhirathaṁ sahasram |
10.098.04c ni ṣīda hotram ṛtuthā yajasva devān devāpe haviṣā saparya ||

10.098.05a आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान् ।

10.098.05c स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥

10.098.05a ārṣṭiṣeṇo hotram ṛṣir niṣīdan devāpir devasumatiṁ cikitvān |
10.098.05c sa uttarasmād adharaṁ samudram apo divyā asṛjad varṣyā abhi ||

10.098.06a अस्मिन्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन् ।

10.098.06c ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ॥

10.098.06a asmin samudre adhy uttarasminn āpo devebhir nivṛtā atiṣṭhan |
10.098.06c tā adravann ārṣṭiṣeṇena sṛṣṭā devāpinā preṣitā mṛkṣiṇīṣu ||

10.098.07a यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।

10.098.07c देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ॥

10.098.07a yad devāpiḥ śantanave purohito hotrāya vṛtaḥ kṛpayann adīdhet |
10.098.07c devaśrutaṁ vṛṣṭivaniṁ rarāṇo bṛhaspatir vācam asmā ayacchat ||

10.098.08a यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।

10.098.08c विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ॥

10.098.08a yaṁ tvā devāpiḥ śuśucāno agna ārṣṭiṣeṇo manuṣyaḥ samīdhe |
10.098.08c viśvebhir devair anumadyamānaḥ pra parjanyam īrayā vṛṣṭimantam ||

10.098.09a त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।

10.098.09c सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥

10.098.09a tvām pūrva ṛṣayo gīrbhir āyan tvām adhvareṣu puruhūta viśve |
10.098.09c sahasrāṇy adhirathāny asme ā no yajñaṁ rohidaśvopa yāhi ||

10.098.10a एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।

10.098.10c तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥

10.098.10a etāny agne navatir nava tve āhutāny adhirathā sahasrā |
10.098.10c tebhir vardhasva tanvaḥ śūra pūrvīr divo no vṛṣṭim iṣito rirīhi ||

10.098.11a एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।

10.098.11c विद्वान्पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ॥

10.098.11a etāny agne navatiṁ sahasrā sam pra yaccha vṛṣṇa indrāya bhāgam |
10.098.11c vidvān patha ṛtuśo devayānān apy aulānaṁ divi deveṣu dhehi ||

10.098.12a अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।

10.098.12c अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥

10.098.12a agne bādhasva vi mṛdho vi durgahāpāmīvām apa rakṣāṁsi sedha |
10.098.12c asmāt samudrād bṛhato divo no 'pām bhūmānam upa naḥ sṛjeha ||

10.099.01a कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै ।

10.099.01c कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् ॥

10.099.01a kaṁ naś citram iṣaṇyasi cikitvān pṛthugmānaṁ vāśraṁ vāvṛdhadhyai |
10.099.01c kat tasya dātu śavaso vyuṣṭau takṣad vajraṁ vṛtraturam apinvat ||

10.099.02a स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद ।

10.099.02c स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः ॥

10.099.02a sa hi dyutā vidyutā veti sāma pṛthuṁ yonim asuratvā sasāda |
10.099.02c sa sanīḷebhiḥ prasahāno asya bhrātur na ṛte saptathasya māyāḥ ||

10.099.03a स वाजं यातापदुष्पदा यन्स्वर्षाता परि षदत्सनिष्यन् ।

10.099.03c अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ॥

10.099.03a sa vājaṁ yātāpaduṣpadā yan svarṣātā pari ṣadat saniṣyan |
10.099.03c anarvā yac chatadurasya vedo ghnañ chiśnadevām̐ abhi varpasā bhūt ||

10.099.04a स यह्व्यो३ऽवनीर्गोष्वर्वा जुहोति प्रधन्यासु सस्रिः ।

10.099.04c अपादो यत्र युज्यासोऽरथा द्रोण्यश्वास ईरते घृतं वाः ॥

10.099.04a sa yahvyo3 'vanīr goṣv arvā juhoti pradhanyāsu sasriḥ |
10.099.04c apādo yatra yujyāso 'rathā droṇyaśvāsa īrate ghṛtaṁ vāḥ ||

10.099.05a स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।

10.099.05c वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन् ॥

10.099.05a sa rudrebhir aśastavāra ṛbhvā hitvī gayam āreavadya āgāt |
10.099.05c vamrasya manye mithunā vivavrī annam abhītyārodayan muṣāyan ||

10.099.06a स इद्दासं तुवीरवं पतिर्दन्षळक्षं त्रिशीर्षाणं दमन्यत् ।

10.099.06c अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ॥

10.099.06a sa id dāsaṁ tuvīravam patir dan ṣaḷakṣaṁ triśīrṣāṇaṁ damanyat |
10.099.06c asya trito nv ojasā vṛdhāno vipā varāham ayoagrayā han ||

10.099.07a स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम् ।

10.099.07c स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन्दस्युहत्ये ॥

10.099.07a sa druhvaṇe manuṣa ūrdhvasāna ā sāviṣad arśasānāya śarum |
10.099.07c sa nṛtamo nahuṣo 'smat sujātaḥ puro 'bhinad arhan dasyuhatye ||

10.099.08a सो अभ्रियो न यवस उदन्यन्क्षयाय गातुं विदन्नो अस्मे ।

10.099.08c उप यत्सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ॥

10.099.08a so abhriyo na yavasa udanyan kṣayāya gātuṁ vidan no asme |

10.099.08c upa yat sīdad induṁ śarīraiḥ śyeno 'yopāṣṭir hanti dasyūn ||

10.099.09a स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात् ।

10.099.09c अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणाम् ॥

10.099.09a sa vrādhataḥ śavasānebhir asya kutsāya śuṣṇaṁ kṛpaṇe parādāt |
10.099.09c ayaṁ kavim anayac chasyamānam atkaṁ yo asya sanitota nṛṇām ||

10.099.10a अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी ।

10.099.10c अयं कनीन ऋतुपा अवेद्यमिमीताररुं यश्चतुष्पात् ॥

10.099.10a ayaṁ daśasyan naryebhir asya dasmo devebhir varuṇo na māyī |
10.099.10c ayaṁ kanīna ṛtupā avedy amimītārarum yaś catuṣpāt ||

10.099.11a अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः ।

10.099.11c सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ॥

10.099.11a asya stomebhir auśija ṛjiśvā vrajaṁ darayad vṛṣabheṇa piproḥ |
10.099.11c sutvā yad yajato dīdayad gīḥ pura iyāno abhi varpasā bhūt ||

10.099.12a एवा महो असुर वक्षथाय वम्रकः पड्भिरुप सर्पदिन्द्रम् ।

10.099.12c स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः ॥

10.099.12a evā maho asura vakṣathāya vamrakaḥ paḍbhir upa sarpad indram |
10.099.12c sa iyānaḥ karati svastim asmā iṣam ūrjaṁ sukṣitiṁ viśvam ābhāḥ ||

10.100.01a इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।

10.100.01c देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥

10.100.01a indra dṛhya maghavan tvāvad id bhuja iha stutaḥ sutapā bodhi no vṛdhe |
10.100.01c devebhir naḥ savitā prāvatu śrutam ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.02a भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।

10.100.02c गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ॥

10.100.02a bharāya su bharata bhāgam ṛtviyam pra vāyave śucipe krandadiṣṭaye |
10.100.02c gaurasya yaḥ payasaḥ pītim ānaśa ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.03a आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।

10.100.03c यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ॥

10.100.03a ā no devaḥ savitā sāviṣad vaya ṛjūyate yajamānāya sunvate |
10.100.03c yathā devān pratibhūṣema pākavad ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.04a इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।

10.100.04c यथायथा मित्रधितानि संदधुरा सर्वतातिमदितिं वृणीमहे ॥

10.100.04a indro asme sumanā astu viśvahā rājā somaḥ suvitasyādhy etu naḥ |
10.100.04c yathā-yathā mitradhitāni sandadhur ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.05a इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।

10.100.05c यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ॥

10.100.05a indra ukthena śavasā parur dadhe bṛhaspate pratarītāsy āyuṣaḥ |
10.100.05c yajño manuḥ pramatir naḥ pitā hi kam ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.06a इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।

10.100.06c यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ॥

10.100.06a indrasya nu sukṛtaṁ daivyaṁ saho 'gnir gṛhe jaritā medhiraḥ kaviḥ |
10.100.06c yajñaś ca bhūd vidathe cārur antama ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.07a न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।

10.100.07c माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥

10.100.07a na vo guhā cakṛma bhūri duṣkṛtaṁ nāviṣṭyaṁ vasavo devahelanam |
10.100.07c mākir no devā anṛtasya varpasa ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.08a अपामीवां सविता साविषन्न्यग्वरीय इदप सेधन्त्वद्रयः ।

10.100.08c ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥

10.100.08a apāmīvāṁ savitā sāviṣan nya1g varīya id apa sedhantv adrayaḥ |
10.100.08c grāvā yatra madhuṣud ucyate bṛhad ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.09a ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।

10.100.09c स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥

10.100.09a ūrdhvo grāvā vasavo 'stu sotari viśvā dveṣāṁsi sanutar yuyota |

10.100.09c sa no devaḥ savitā pāyur īḍya ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.10a ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे ।

10.100.10c तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥

10.100.10a ūrjaṁ gāvo yavase pīvo attana ṛtasya yāḥ sadane kośe aṅgdhve |

10.100.10c tanūr eva tanvo astu bheṣajam ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.11a क्रतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम् ।

10.100.11c पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥

10.100.11a kratuprāvā jaritā śaśvatām ava indra id bhadrā pramatiḥ sutāvatām |

10.100.11c pūrṇam ūdhar divyaṁ yasya siktaya ā sarvatātim aditiṁ vṛṇīmahe ||

10.100.12a चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।

10.100.12c रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ॥

10.100.12a citras te bhānuḥ kratuprā abhiṣṭiḥ santi spṛdho jaraṇiprā adhṛṣṭāḥ |

10.100.12c rajiṣṭhayā rajyā paśva ā gos tūtūrṣati pary agraṁ duvasyuḥ ||

10.101.01a उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।

10.101.01c दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ॥

10.101.01a ud budhyadhvaṁ samanasaḥ sakhāyaḥ sam agnim indhvam bahavaḥ sanīḷāḥ |

10.101.01c dadhikrām agnim uṣasaṁ ca devīm indrāvato 'vase ni hvaye vaḥ ||

10.101.02a मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।

10.101.02c इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ॥

10.101.02a mandrā kṛṇudhvaṁ dhiya ā tanudhvaṁ nāvam aritraparaṇīṁ kṛṇudhvam |

10.101.02c iṣkṛṇudhvam āyudhāraṁ kṛṇudhvam prāñcaṁ yajñam pra ṇayatā sakhāyaḥ ||

10.101.03a युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।

10.101.03c गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥

10.101.03a yunakta sīrā vi yugā tanudhvaṁ kṛte yonau vapateha bījam |
10.101.03c girā ca śruṣṭiḥ sabharā asan no nedīya it sṛṇyaḥ pakvam eyāt ||

10.101.04a सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् ।

10.101.04c धीरा देवेषु सुम्नया ॥

10.101.04a sīrā yuñjanti kavayo yugā vi tanvate pṛthak |
10.101.04c dhīrā deveṣu sumnayā ||

10.101.05a निराहावान्कृणोतन सं वरत्रा दधातन ।

10.101.05c सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ॥

10.101.05a nir āhāvān kṛṇotana saṁ varatrā dadhātana |
10.101.05c siñcāmahā avatam udriṇaṁ vayaṁ suṣekam anupakṣitam ||

10.101.06a इष्कृताहावमवतं सुवरत्रं सुषेचनम् ।

10.101.06c उद्रिणं सिञ्चे अक्षितम् ॥

10.101.06a iṣkṛtāhāvam avataṁ suvaratraṁ suṣecanam |
10.101.06c udriṇaṁ siñce akṣitam ||

10.101.07a प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम् ।

10.101.07c द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ॥

10.101.07a prīṇītāśvān hitaṁ jayātha svastivāhaṁ ratham it kṛṇudhvam |
10.101.07c droṇāhāvam avatam aśmacakram aṁsatrakośaṁ siñcatā nṛpāṇam ||

10.101.08a व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।

10.101.08c पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ॥

10.101.08a vrajaṁ kṛṇudhvaṁ sa hi vo nṛpāṇo varma sīvyadhvam bahulā pṛthūni |
10.101.08c puraḥ kṛṇudhvam āyasīr adhṛṣṭā mā vaḥ susroc camaso dṛṁhatā tam ||

10.101.09a आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।

10.101.09c सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥

10.101.09a ā vo dhiyaṁ yajñiyāṁ varta ūtaye devā devīṁ yajatāṁ yajñiyām iha |
10.101.09c sā no duhīyad yavaseva gatvī sahasradhārā payasā mahī gauḥ ||

10.101.10a आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।

10.101.10c परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ॥

10.101.10a ā tū ṣiñca harim īṁ dror upasthe vāśībhis takṣatāśmanmayībhiḥ ।
10.101.10c pari ṣvajadhvaṁ daśa kakṣyābhir ubhe dhurau prati vahniṁ yunakta ॥

10.101.11a उभे धुरौ वह्निरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः ।

10.101.11c वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ॥

10.101.11a ubhe dhurau vahnir āpibdamāno 'ntar yoneva carati dvijāniḥ ।
10.101.11c vanaspatiṁ vana āsthāpayadhvaṁ ni ṣū dadhidhvam akhananta utsam ॥

10.101.12a कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।

10.101.12c निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥

10.101.12a kapṛn naraḥ kapṛtham ud dadhātana codayata khudata vājasātaye ।
10.101.12c niṣṭigryaḥ putram ā cyāvayotaya indraṁ sabādha iha somapītaye ॥

10.102.01a प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया ।

10.102.01c अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव ॥

10.102.01a pra te ratham mithūkṛtam indro 'vatu dhṛṣṇuyā ।
10.102.01c asminn ājau puruhūta śravāyye dhanabhakṣeṣu no 'va ॥

10.102.02a उत्स्म वातो वहति वासोऽस्या अधिरथं यदजयत्सहस्रम् ।

10.102.02c रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना ॥

10.102.02a ut sma vāto vahati vāso 'syā adhirathaṁ yad ajayat sahasram ।
10.102.02c rathīr abhūn mudgalānī gaviṣṭau bhare kṛtaṁ vy aced indrasenā ॥

10.102.03a अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।

10.102.03c दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ॥

10.102.03a antar yaccha jighāṁsato vajram indrābhidāsataḥ ।
10.102.03c dāsasya vā maghavann āryasya vā sanutar yavayā vadham ॥

10.102.04a उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।

10.102.04c प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥

10.102.04a udno hradam apibaj jarhṛṣāṇaḥ kūṭaṁ sma tṛṁhad abhimātim eti |
10.102.04c pra muṣkabhāraḥ śrava icchamāno 'jiram bāhū abharat siṣāsan ||

10.102.05a न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।

10.102.05c तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥

10.102.05a ny akrandayann upayanta enam amehayan vṛṣabham madhya ājeḥ |
10.102.05c tena sūbharvaṁ śatavat sahasraṁ gavām mudgalaḥ pradhane jigāya ||

10.102.06a ककर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।

10.102.06c दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥

10.102.06a kakardave vṛṣabho yukta āsīd avāvacīt sārathir asya keśī |
10.102.06c dudher yuktasya dravataḥ sahānasa ṛcchanti ṣmā niṣpado mudgalānīm ||

10.102.07a उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।

10.102.07c इन्द्र उदावत्पतिमघ्न्यानामरंहत पद्याभिः ककुद्मान् ॥

10.102.07a uta pradhim ud ahann asya vidvān upāyunag vaṁsagam atra śikṣan |
10.102.07c indra ud āvat patim aghnyānām araṁhata padyābhiḥ kakudmān ||

10.102.08a शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः ।

10.102.08c नृम्णानि कृण्वन्बहवे जनाय गाः पस्पशानस्तविषीरधत्त ॥

10.102.08a śunam aṣṭrāvy acarat kapardī varatrāyāṁ dārv ānahyamānaḥ |
10.102.08c nṛmṇāni kṛṇvan bahave janāya gāḥ paspaśānas taviṣīr adhatta ||

10.102.09a इमं तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् ।

10.102.09c येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥

10.102.09a imaṁ tam paśya vṛṣabhasya yuñjaṁ kāṣṭhāyā madhye drughaṇaṁ śayānam |
10.102.09c yena jigāya śatavat sahasraṁ gavām mudgalaḥ pṛtanājyeṣu ||

10.102.10a आरे अघा को न्वित्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति ।

10.102.10c नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत् ॥

10.102.10a āre aghā ko nv i1tthā dadarśa yaṁ yuñjanti tam v ā sthāpayanti |

10.102.10c nāsmai tṛṇaṁ nodakam ā bharanty uttaro dhuro vahati pradediśat ||

10.102.11a परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिञ्चन् ।

10.102.11c एषैष्या चिद्रथ्या जयेम सुमङ्गलं सिनवदस्तु सातम् ॥

10.102.11a parivṛkteva patividyam ānaṭ pīpyānā kūcakreṇeva siñcan |
10.102.11c eṣaiṣyā cid rathyā jayema sumaṅgalaṁ sinavad astu sātam ||

10.102.12a त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।

10.102.12c वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा युजा ॥

10.102.12a tvaṁ viśvasya jagataś cakṣur indrāsi cakṣuṣaḥ |
10.102.12c vṛṣā yad ājiṁ vṛṣaṇā siṣāsasi codayan vadhriṇā yujā ||

10.103.01a आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।

10.103.01c संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥

10.103.01a āśuḥ śiśāno vṛṣabho na bhīmo ghanāghanaḥ kṣobhaṇaś carṣaṇīnām |
10.103.01c saṅkrandano 'nimiṣa ekavīraḥ śataṁ senā ajayat sākam indraḥ ||

10.103.02a संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।

10.103.02c तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥

10.103.02a saṅkrandanenānimiṣeṇa jiṣṇunā yutkāreṇa duścyavanena dhṛṣṇunā |
10.103.02c tad indreṇa jayata tat sahadhvaṁ yudho nara iṣuhastena vṛṣṇā ||

10.103.03a स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।

10.103.03c संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥

10.103.03a sa iṣuhastaiḥ sa niṣaṅgibhir vaśī saṁsraṣṭā sa yudha indro gaṇena |
10.103.03c saṁsṛṣṭajit somapā bāhuśardhy u1gradhanvā pratihitābhir astā ||

10.103.04a बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।

10.103.04c प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥

10.103.04a bṛhaspate pari dīyā rathena rakṣohāmitrām̐ apabādhamānaḥ |
10.103.04c prabhañjan senāḥ pramṛṇo yudhā jayann asmākam edhy avitā rathānām ||

10.103.05a बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।

10.103.05c अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥

10.103.05a balavijñāya sthaviraḥ pravīraḥ sahasvān vājī sahamāna ugraḥ |
10.103.05c abhivīro abhisatvā sahojā jaitram indra ratham ā tiṣṭha govit ||

10.103.06a गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।

10.103.06c इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥

10.103.06a gotrabhidaṁ govidaṁ vajrabāhuṁ jayantam ajma pramr̥ṇantam ojasā |
10.103.06c imaṁ sajātā anu vīrayadhvam indraṁ sakhāyo anu saṁ rabhadhvam ||

10.103.07a अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।

10.103.07c दुश्च्यवनः पृतनाषाळयुध्यो३ऽस्माकं सेना अवतु प्र युत्सु ॥

10.103.07a abhi gotrāṇi sahasā gāhamāno 'dayo vīraḥ śatamanyur indraḥ |
10.103.07c duścyavanaḥ pr̥tanāṣāḷ ayudhyo3 'smākaṁ senā avatu pra yutsu ||

10.103.08a इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।

10.103.08c देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

10.103.08a indra āsāṁ netā br̥haspatir dakṣiṇā yajñaḥ pura etu somaḥ |
10.103.08c devasenānām abhibhañjatīnāṁ jayantīnām maruto yantv agram ||

10.103.09a इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।

10.103.09c महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥

10.103.09a indrasya vr̥ṣṇo varuṇasya rājña ādityānām marutāṁ śardha ugram |
10.103.09c mahāmanasām bhuvanacyavānāṁ ghoṣo devānāṁ jayatām ud asthāt ||

10.103.10a उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।

10.103.10c उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥

10.103.10a ud dharṣaya maghavann āyudhāny ut satvanām māmakānām manāṁsi |
10.103.10c ud vr̥trahan vājināṁ vājināny ud rathānāṁ jayatāṁ yantu ghoṣāḥ ||

10.103.11a अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।

10.103.11c अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥

10.103.11a asmākam indraḥ samṛteṣu dhvajeṣv asmākaṁ yā iṣavas tā jayantu |
10.103.11c asmākaṁ vīrā uttare bhavantv asmām̐ u devā avatā haveṣu ||

10.103.12a अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।

10.103.12c अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥

10.103.12a amīṣāṁ cittam pratilobhayantī gṛhāṇāṅgāny apve parehi |
10.103.12c abhi prehi nir daha hṛtsu śokair andhenāmitrās tamasā sacantām ||

10.103.13a प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।

10.103.13c उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥

10.103.13a pretā jayatā nara indro vaḥ śarma yacchatu |
10.103.13c ugrā vaḥ santu bāhavo 'nādhṛṣyā yathāsatha ||

10.104.01a असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम् ।

10.104.01c तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य ॥

10.104.01a asāvi somaḥ puruhūta tubhyaṁ haribhyāṁ yajñam upa yāhi tūyam |
10.104.01c tubhyaṁ giro vipravīrā iyānā dadhanvira indra pibā sutasya ||

10.104.02a अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।

10.104.02c मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥

10.104.02a apsu dhūtasya harivaḥ pibeha nṛbhiḥ sutasya jaṭharam pṛṇasva |
10.104.02c mimikṣur yam adraya indra tubhyaṁ tebhir vardhasva madam ukthavāhaḥ ||

10.104.03a प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।

10.104.03c इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥

10.104.03a progrām pītiṁ vṛṣṇa iyarmi satyām prayai sutasya haryaśva tubhyam |
10.104.03c indra dhenābhir iha mādayasva dhībhir viśvābhiḥ śacyā gṛṇānaḥ ||

10.104.04a ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः ।

10.104.04c प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः ॥

10.104.04a ūtī śacīvas tava vīryeṇa vayo dadhānā uśija ṛtajñāḥ |
10.104.04c prajāvad indra manuṣo duroṇe tasthur gṛṇantaḥ sadhamādyāsaḥ ||

10.104.05a प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।

10.104.05c मंहिष्ठामूतिं वितिरे दधाना स्तोतार इन्द्र तव सूनृताभिः ॥

10.104.05a praṇītibhiṣ ṭe haryaśva suṣṭoḥ suṣumnasya pururuco janāsaḥ |
10.104.05c maṁhiṣṭhām ūtiṁ vitire dadhānā stotāra indra tava sūnṛtābhiḥ ||

10.104.06a उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।

10.104.06c इन्द्र त्वा यज्ञः क्षममाणमानड्दाश्वाँ अस्यध्वरस्य प्रकेतः ॥

10.104.06a upa brahmāṇi harivo haribhyāṁ somasya yāhi pītaye sutasya |
10.104.06c indra tvā yajñaḥ kṣamamāṇam ānaḍ dāśvām̐ asy adhvarasya praketaḥ ||

10.104.07a सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।

10.104.07c उप भूषन्ति गिरो अप्रतीतमिन्द्रं नमस्या जरितुः पनन्त ॥

10.104.07a sahasravājam abhimātiṣāhaṁ suteraṇam maghavānaṁ suvṛktim |
10.104.07c upa bhūṣanti giro apratītam indraṁ namasyā jarituḥ pananta ||

10.104.08a सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।

10.104.08c नवतिं स्रोत्या नव च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः ॥

10.104.08a saptāpo devīḥ suraṇā amṛktā yābhiḥ sindhum atara indra pūrbhit |
10.104.08c navatiṁ srotyā nava ca sravantīr devebhyo gātum manuṣe ca vindaḥ ||

10.104.09a अपो महीरभिशस्तेरमुञ्चोऽजागरास्वधि देव एकः ।

10.104.09c इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥

10.104.09a apo mahīr abhiśaster amuñco 'jāgar āsv adhi deva ekaḥ |
10.104.09c indra yās tvaṁ vṛtratūrye cakartha tābhir viśvāyus tanvam pupuṣyāḥ ||

10.104.10a वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।

10.104.10c आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥

10.104.10a vīreṇyaḥ kratur indraḥ suśastir utāpi dhenā puruhūtam īṭṭe |
10.104.10c ārdayad vṛtram akṛṇod u lokaṁ sasāhe śakraḥ pṛtanā abhiṣṭiḥ ||

10.104.11a शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।

10.104.11c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

10.104.11a śunaṁ huvema maghavānam indram asmin bhare nṛtamaṁ vājasātau |
10.104.11c śṛṇvantam ugram ūtaye samatsu ghnantaṁ vṛtrāṇi sañjitaṁ dhanānām ||

10.105.01a कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः ।

10.105.01c दीर्घं सुतं वाताप्याय ॥

10.105.01a kadā vaso stotraṁ haryata āva śmaśā rudhad vāḥ |
10.105.01c dīrghaṁ sutaṁ vātāpyāya ||

10.105.02a हरी यस्य सुयुजा विव्रता वेरर्वन्तानु शेपा ।

10.105.02c उभा रजी न केशिना पतिर्दन् ॥

10.105.02a harī yasya suyujā vivratā ver arvantānu śepā |
10.105.02c ubhā rajī na keśinā patir dan ||

10.105.03a अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान् ।

10.105.03c शुभे यद्युयुजे तविषीवान् ॥

10.105.03a apa yor indraḥ pāpaja ā marto na śaśramāṇo bibhīvān |
10.105.03c śubhe yad yuyuje taviṣīvān ||

10.105.04a सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन् ।

10.105.04c नदयोर्विव्रतयोः शूर इन्द्रः ॥

10.105.04a sacāyor indraś carkṛṣa ām̐ upānasaḥ saparyan |
10.105.04c nadayor vivratayoḥ śūra indraḥ ||

10.105.05a अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै ।

10.105.05c वनोति शिप्राभ्यां शिप्रिणीवान् ॥

10.105.05a adhi yas tasthau keśavantā vyacasvantā na puṣṭyai |
10.105.05c vanoti śiprābhyāṁ śipriṇīvān ||

10.105.06a प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा ।

10.105.06c ऋभुर्न क्रतुभिर्मातरिश्वा ॥

10.105.06a prāstaud ṛṣvaujā ṛṣvebhis tatakṣa śūraḥ śavasā |
10.105.06c ṛbhur na kratubhir mātariśvā ||

10.105.07a वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् ।

10.105.07c अरुतहनुरद्भुतं न रजः ॥

10.105.07a vajraṁ yaś cakre suhanāya dasyave hirīmaśo hirīmān |
10.105.07c arutahanur adbhutaṁ na rajaḥ ||

10.105.08a अव नो वृजिना शिशीह्यृचा वनेमानृचः ।

10.105.08c नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥

10.105.08a ava no vṛjinā śiśīhy ṛcā vanemānṛcaḥ |
10.105.08c nābrahmā yajña ṛdhag joṣati tve ||

10.105.09a ऊर्ध्वा यत्ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन् ।

10.105.09c सजूर्नावं स्वयशसं सचायोः ॥

10.105.09a ūrdhvā yat te tretinī bhūd yajñasya dhūrṣu sadman |
10.105.09c sajūr nāvaṁ svayaśasaṁ sacāyoḥ ||

10.105.10a श्रिये ते पृश्निरुपसेचनी भूच्छ्रिये दर्विररेपाः ।

10.105.10c यया स्वे पात्रे सिञ्चस उत् ॥

10.105.10a śriye te pṛśnir upasecanī bhūc chriye darvir arepāḥ |
10.105.10c yayā sve pātre siñcasa ut ||

10.105.11a शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत् ।

10.105.11c आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सम् ॥

10.105.11a śataṁ vā yad asurya prati tvā sumitra itthāstaud durmitra itthāstaut |
10.105.11c āvo yad dasyuhatye kutsaputram prāvo yad dasyuhatye kutsavatsam ||

10.106.01a उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव ।

10.106.01c सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥

10.106.01a ubhā u nūnaṁ tad id arthayethe vi tanvāthe dhiyo vastrāpaseva |
10.106.01c sadhrīcīnā yātave prem ajīgaḥ sudineva pṛkṣa ā taṁsayethe ||

10.106.02a उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुरेथः ।
10.106.02c दूतेव हि ष्ठो यशसा जनेषु माप स्थातं महिषेवावपानात् ॥

10.106.02a uṣṭāreva pharvareṣu śrayethe prāyogeva śvātryā śāsur ethaḥ |
10.106.02c dūteva hi ṣṭho yaśasā janeṣu māpa sthātam mahiṣevāvapānāt ||

10.106.03a साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरा गमिष्टम् ।
10.106.03c अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा ॥

10.106.03a sākaṁyujā śakunasyeva pakṣā paśveva citrā yajur ā gamiṣṭam |
10.106.03c agnir iva devayor dīdivāṁsā parijmāneva yajathaḥ purutrā ||

10.106.04a आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृपतीव तुर्यै ।
10.106.04c इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टम् ॥

10.106.04a āpī vo asme pitareva putrogreva rucā nṛpatīva turyai |
10.106.04c iryeva puṣṭyai kiraṇeva bhujyai śruṣṭīvāneva havam ā gamiṣṭam ||

10.106.05a वंसगेव पूषर्या शिम्बाता मित्रेव ऋता शतरा शातपन्ता ।
10.106.05c वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या३ पुरीषा ॥

10.106.05a vaṁsageva pūṣaryā śimbātā mitreva ṛtā śatarā śātapantā |
10.106.05c vājevoccā vayasā gharmyeṣṭhā meṣeveṣā saparyā3 purīṣā ||

10.106.06a सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
10.106.06c उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥

10.106.06a sṛṇyeva jarbharī turpharītū naitośeva turpharī parpharīkā |
10.106.06c udanyajeva jemanā maderū tā me jarāyv ajaram marāyu ||

10.106.07a पज्रेव चर्चरं जारं मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा ।
10.106.07c ऋभू नापत्खरमज्रा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयीणाम् ॥

10.106.07a pajreva carcaraṁ jāram marāyu kṣadmevārtheṣu tartarītha ugrā |
10.106.07c ṛbhū nāpat kharamajrā kharajrur vāyur na parpharat kṣayad rayīṇām ||

10.106.08a घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम् ।

10.106.08c पतरेव चचरा चन्द्रनिर्णिङ्मनऋङ्गा मनन्या३ न जग्मी ॥

10.106.08a gharmeva madhu jaṭhare sanerū bhagevitā turpharī phārivāram |
10.106.08c patareva cacarā candranirṇiṅ manaṙṅgā mananyā3 na jagmī ||

10.106.09a बृहन्तेव गम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।

10.106.09c कर्णेव शासुरनु हि स्मराथोऽंशेव नो भजतं चित्रमप्नः ॥

10.106.09a bṛhanteva gambhareṣu pratiṣṭhām pādeva gādhaṁ tarate vidāthaḥ |
10.106.09c karṇeva śāsur anu hi smarātho 'ṁśeva no bhajataṁ citram apnaḥ ||

10.106.10a आरङ्गरेव मध्वेरयेथे सारघेव गवि नीचीनबारे ।

10.106.10c कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे ॥

10.106.10a āraṅgareva madhv erayethe sāragheva gavi nīcīnabāre |
10.106.10c kīnāreva svedam āsiṣvidānā kṣāmevorjā sūyavasāt sacethe ||

10.106.11a ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोप यातम् ।

10.106.11c यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः ॥

10.106.11a ṛdhyāma stomaṁ sanuyāma vājam ā no mantraṁ sarathehopa yātam |
10.106.11c yaśo na pakvam madhu goṣv antar ā bhūtāṁśo aśvinoḥ kāmam aprāḥ ||

10.107.01a आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि ।

10.107.01c महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥

10.107.01a āvir abhūn mahi māghonam eṣāṁ viśvaṁ jīvaṁ tamaso nir amoci |
10.107.01c mahi jyotiḥ pitṛbhir dattam āgād uruḥ panthā dakṣiṇāyā adarśi ||

10.107.02a उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ।

10.107.02c हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥

10.107.02a uccā divi dakṣiṇāvanto asthur ye aśvadāḥ saha te sūryeṇa |
10.107.02c hiraṇyadā amṛtatvam bhajante vāsodāḥ soma pra tiranta āyuḥ ||

10.107.03a दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।

10.107.03c अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥

10.107.03a daivī pūrtir dakṣiṇā devayajyā na kavāribhyo nahi te pṛṇanti |
10.107.03c athā naraḥ prayatadakṣiṇāso 'vadyabhiyā bahavaḥ pṛṇanti ||

10.107.04a शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।

10.107.04c ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ॥

10.107.04a śatadhāraṁ vāyum arkaṁ svarvidaṁ nṛcakṣasas te abhi cakṣate haviḥ |
10.107.04c ye pṛṇanti pra ca yacchanti saṅgame te dakṣiṇāṁ duhate saptamātaram ||

10.107.05a दक्षिणावान्प्रथमो हूत एति दक्षिणावान्ग्रामणीरग्रमेति ।

10.107.05c तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥

10.107.05a dakṣiṇāvān prathamo hūta eti dakṣiṇāvān grāmaṇīr agram eti |
10.107.05c tam eva manye nṛpatiṁ janānāṁ yaḥ prathamo dakṣiṇām āvivāya ||

10.107.06a तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।

10.107.06c स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥

10.107.06a tam eva ṛṣiṁ tam u brahmāṇam āhur yajñanyaṁ sāmagām ukthaśāsam |
10.107.06c sa śukrasya tanvo veda tisro yaḥ prathamo dakṣiṇayā rarādha ||

10.107.07a दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् ।

10.107.07c दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥

10.107.07a dakṣiṇāśvaṁ dakṣiṇā gāṁ dadāti dakṣiṇā candram uta yad dhiraṇyam |
10.107.07c dakṣiṇānnaṁ vanute yo na ātmā dakṣiṇāṁ varma kṛṇute vijānan ||

10.107.08a न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः ।

10.107.08c इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥

10.107.08a na bhojā mamrur na nyartham īyur na riṣyanti na vyathante ha bhojāḥ |
10.107.08c idaṁ yad viśvaṁ bhuvanaṁ svaś caitat sarvaṁ dakṣiṇaibhyo dadāti ||

10.107.09a भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१ या सुवासाः ।

10.107.09c भोजा जिग्युरन्तःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति ॥

10.107.09a bhojā jigyuḥ surabhiṁ yonim agre bhojā jigyur vadhvaṁ1 yā suvāsāḥ |

10.107.09c bhojā jigyur antaḥpeyaṁ surāyā bhojā jigyur ye ahūtāḥ prayanti ||

10.107.10a भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना ।

10.107.10c भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥

10.107.10a bhojāyāśvaṁ sam mṛjanty āśum bhojāyāste kanyā3 śumbhamānā |
10.107.10c bhojasyedam puṣkariṇīva veśma pariṣkṛtaṁ devamāneva citram ||

10.107.11a भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः ।

10.107.11c भोजं देवासोऽवता भरेषु भोजः शत्रून्समनीकेषु जेता ॥

10.107.11a bhojam aśvāḥ suṣṭhuvāho vahanti suvṛd ratho vartate dakṣiṇāyāḥ |
10.107.11c bhojaṁ devāso 'vatā bhareṣu bhojaḥ śatrūn samanīkeṣu jetā ||

10.108.01a किमिच्छन्ती सरमा प्रेदमानड्दूरे ह्यध्वा जगुरिः पराचैः ।

10.108.01c कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥

10.108.01a kim icchantī saramā predam ānaḍ dūre hy adhvā jaguriḥ parācaiḥ |
10.108.01c kāsmehitiḥ kā paritakmyāsīt kathaṁ rasāyā ataraḥ payāṁsi ||

10.108.02a इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ।

10.108.02c अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥

10.108.02a indrasya dūtīr iṣitā carāmi maha icchantī paṇayo nidhīn vaḥ |
10.108.02c atiṣkado bhiyasā tan na āvat tathā rasāyā ataram payāṁsi ||

10.108.03a कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् ।

10.108.03c आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥

10.108.03a kīdṛṅṅ indraḥ sarame kā dṛśīkā yasyedaṁ dūtīr asaraḥ parākāt |
10.108.03c ā ca gacchān mitram enā dadhāmāthā gavāṁ gopatir no bhavāti ||

10.108.04a नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।

10.108.04c न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥

10.108.04a nāhaṁ taṁ veda dabhyaṁ dabhat sa yasyedaṁ dūtīr asaram parākāt |
10.108.04c na taṁ gūhanti sravato gabhīrā hatā indreṇa paṇayaḥ śayadhve ||

10.108.05a इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्सुभगे पतन्ती ।

10.108.05c कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ॥

10.108.05a imā gāvaḥ sarame yā aicchaḥ pari divo antān subhage patantī |
10.108.05c kas ta enā ava sṛjād ayudhvy utāsmākam āyudhā santi tigmā ||

10.108.06a असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।

10.108.06c अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात् ॥

10.108.06a asenyā vaḥ paṇayo vacāṁsy aniṣavyās tanvaḥ santu pāpīḥ |
10.108.06c adhṛṣṭo va etavā astu panthā bṛhaspatir va ubhayā na mṛḷāt ||

10.108.07a अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।

10.108.07c रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ ॥

10.108.07a ayaṁ nidhiḥ sarame adribudhno gobhir aśvebhir vasubhir nyṛṣṭaḥ |
10.108.07c rakṣanti tam paṇayo ye sugopā reku padam alakam ā jagantha ||

10.108.08a एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः ।

10.108.08c त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित् ॥

10.108.08a eha gamann ṛṣayaḥ somaśitā ayāsyo aṅgiraso navagvāḥ |
10.108.08c ta etam ūrvaṁ vi bhajanta gonām athaitad vacaḥ paṇayo vamann it ||

10.108.09a एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ।

10.108.09c स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥

10.108.09a evā ca tvaṁ sarama ājagantha prabādhitā sahasā daivyena |
10.108.09c svasāraṁ tvā kṛṇavai mā punar gā apa te gavāṁ subhage bhajāma ||

10.108.10a नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरङ्गिरसश्च घोराः ।

10.108.10c गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः ॥

10.108.10a nāhaṁ veda bhrātṛtvaṁ no svasṛtvam indro vidur aṅgirasaś ca ghorāḥ |
10.108.10c gokāmā me acchadayan yad āyam apāta ita paṇayo varīyaḥ ||

10.108.11a दूरमित पणयो वरीय उद्गावो यन्तु मिनतीरृतेन ।

10.108.11c बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥

10.108.11a dūram ita paṇayo varīya ud gāvo yantu minatīr ṛtena |
10.108.11c bṛhaspatir yā avindan nigūḷhāḥ somo grāvāṇa ṛṣayaś ca viprāḥ ||

10.109.01a तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।

10.109.01c वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥

10.109.01a te 'vadan prathamā brahmakilbiṣe 'kūpāraḥ salilo mātariśvā |
10.109.01c vīḷuharās tapa ugro mayobhūr āpo devīḥ prathamajā ṛtena ||

10.109.02a सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।

10.109.02c अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥

10.109.02a somo rājā prathamo brahmajāyām punaḥ prāyacchad ahṛṇīyamānaḥ |
10.109.02c anvartitā varuṇo mitra āsīd agnir hotā hastagṛhyā nināya ||

10.109.03a हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन् ।

10.109.03c न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥

10.109.03a hastenaiva grāhya ādhir asyā brahmajāyeyam iti ced avocan |
10.109.03c na dūtāya prahye tastha eṣā tathā rāṣṭraṁ gupitaṁ kṣatriyasya ||

10.109.04a देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः ।

10.109.04c भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥

10.109.04a devā etasyām avadanta pūrve saptarṣayas tapase ye niṣeduḥ |
10.109.04c bhīmā jāyā brāhmaṇasyopanītā durdhāṁ dadhāti parame vyoman ||

10.109.05a ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ।

10.109.05c तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं१ न देवाः ॥

10.109.05a brahmacārī carati veviṣad viṣaḥ sa devānām bhavaty ekam aṅgam |
10.109.05c tena jāyām anv avindad bṛhaspatiḥ somena nītāṁ juhvaṁ1 na devāḥ ||

10.109.06a पुनर्वै देवा अददुः पुनर्मनुष्या उत ।

10.109.06c राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥

10.109.06a punar vai devā adaduḥ punar manuṣyā uta |
10.109.06c rājānaḥ satyaṁ kṛṇvānā brahmajāyām punar daduḥ ||

10.109.07a पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।

10.109.07c ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ॥

10.109.07a punardāya brahmajāyāṁ kṛtvī devair nikilbiṣam |
10.109.07c ūrjam pṛthivyā bhaktvāyorugāyam upāsate ||

10.110.01a समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।

10.110.01c आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥

10.110.01a samiddho adya manuṣo duroṇe devo devān yajasi jātavedaḥ |
10.110.01c ā ca vaha mitramahaś cikitvān tvaṁ dūtaḥ kavir asi pracetāḥ ||

10.110.02a तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्स्वदया सुजिह्व ।

10.110.02c मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥

10.110.02a tanūnapāt patha ṛtasya yānān madhvā samañjan svadayā sujihva |
10.110.02c manmāni dhībhir uta yajñam ṛndhan devatrā ca kṛṇuhy adhvaraṁ naḥ ||

10.110.03a आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।

10.110.03c त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥

10.110.03a ājuhvāna īḍyo vandyaś cā yāhy agne vasubhiḥ sajoṣāḥ |
10.110.03c tvaṁ devānām asi yahva hotā sa enān yakṣīṣito yajīyān ||

10.110.04a प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।

10.110.04c व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥

10.110.04a prācīnam barhiḥ pradiśā pṛthivyā vastor asyā vṛjyate agre ahnām |
10.110.04c vy u prathate vitaraṁ varīyo devebhyo aditaye syonam ||

10.110.05a व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।

10.110.05c देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥

10.110.05a vyacasvatīr urviyā vi śrayantām patibhyo na janayaḥ śumbhamānāḥ |
10.110.05c devīr dvāro bṛhatīr viśvaminvā devebhyo bhavata suprāyaṇāḥ ||

10.110.06a आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।

10.110.06c दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥

10.110.06a ā suṣvayantī yajate upāke uṣāsānaktā sadatāṁ ni yonau |
10.110.06c divye yoṣaṇe bṛhatī surukme adhi śriyaṁ śukrapiśaṁ dadhāne ||

10.110.07a दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।

10.110.07c प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥

10.110.07a daivyā hotārā prathamā suvācā mimānā yajñam manuṣo yajadhyai |
10.110.07c pracodayantā vidatheṣu kārū prācīnaṁ jyotiḥ pradiśā diśantā ||

10.110.08a आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।

10.110.08c तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥

10.110.08a ā no yajñam bhāratī tūyam etv iḻā manuṣvad iha cetayantī |
10.110.08c tisro devīr barhir edaṁ syonaṁ sarasvatī svapasaḥ sadantu ||

10.110.09a य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।

10.110.09c तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥

10.110.09a ya ime dyāvāpṛthivī janitrī rūpair apiṁśad bhuvanāni viśvā |
10.110.09c tam adya hotar iṣito yajīyān devaṁ tvaṣṭāram iha yakṣi vidvān ||

10.110.10a उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।

10.110.10c वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥

10.110.10a upāvasṛja tmanyā samañjan devānām pātha ṛtuthā havīṁṣi |
10.110.10c vanaspatiḥ śamitā devo agniḥ svadantu havyam madhunā ghṛtena ||

10.110.11a सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।

10.110.11c अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥

10.110.11a sadyo jāto vy amimīta yajñam agnir devānām abhavat purogāḥ |
10.110.11c asya hotuḥ pradiśy ṛtasya vāci svāhākṛtaṁ havir adantu devāḥ ||

10.111.01a मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम् ।

10.111.01c इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥

10.111.01a manīṣiṇaḥ pra bharadhvam manīṣām yathā-yathā matayaḥ santi nṛṇām |
10.111.01c indraṁ satyair erayāmā kṛtebhiḥ sa hi vīro girvaṇasyur vidānaḥ ||

10.111.02a ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो गोभिरानट् ।

10.111.02c उदतिष्ठत्तविषेणा रवेण महान्ति चित्सं विव्याचा रजांसि ॥

10.111.02a ṛtasya hi sadaso dhītir adyaut saṁ gārṣṭeyo vṛṣabho gobhir ānaṭ |
10.111.02c ud atiṣṭhat taviṣeṇā raveṇa mahānti cit saṁ vivyācā rajāṁsi ||

10.111.03a इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय ।

10.111.03c आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः ॥

10.111.03a indraḥ kila śrutyā asya veda sa hi jiṣṇuḥ pathikṛt sūryāya |
10.111.03c ān menāṁ kṛṇvann acyuto bhuvad goḥ patir divaḥ sanajā apratītaḥ ||

10.111.04a इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादङ्गिरोभिर्गृणानः ।

10.111.04c पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता ॥

10.111.04a indro mahnā mahato arṇavasya vratāminād aṅgirobhir gṛṇānaḥ |
10.111.04c purūṇi cin ni tatānā rajāṁsi dādhāra yo dharuṇaṁ satyatātā ||

10.111.05a इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।

10.111.05c महीं चिद्द्यामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान् ॥

10.111.05a indro divaḥ pratimānam pṛthivyā viśvā veda savanā hanti śuṣṇam |
10.111.05c mahīṁ cid dyām ātanot sūryeṇa cāskambha cit kambhanena skabhīyān ||

10.111.06a वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः ।

10.111.06c वि धृष्णो अत्र धृषता जघन्थाथाभवो मघवन्बाह्वोजाः ॥

10.111.06a vajreṇa hi vṛtrahā vṛtram astar adevasya śūśuvānasya māyāḥ |
10.111.06c vi dhṛṣṇo atra dhṛṣatā jaghanthāthābhavo maghavan bāhvojāḥ ||

10.111.07a सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।

10.111.07c आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ॥

10.111.07a sacanta yad uṣasaḥ sūryeṇa citrām asya ketavo rām avindan |

10.111.07c ā yan nakṣatraṁ dadṛśe divo na punar yato nakir addhā nu veda ||

10.111.08a दूरं किल प्रथमा जग्मुरासामिन्द्रस्य याः प्रसवे सस्रुरापः ।

10.111.08c क्व स्विदग्रं क्व बुध्न आसामापो मध्यं क्व वो नूनमन्तः ॥

10.111.08a dūraṁ kila prathamā jagmur āsām indrasya yāḥ prasave sasrur āpaḥ |

10.111.08c kva svid agraṁ kva budhna āsām āpo madhyaṁ kva vo nūnam antaḥ ||

10.111.09a सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन ।

10.111.09c मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः ॥

10.111.09a sṛjaḥ sindhūm̐r ahinā jagrasānām̐ ād id etāḥ pra vivijre javena |

10.111.09c mumukṣamāṇā uta yā mumucre 'dhed etā na ramante nitiktāḥ ||

10.111.10a सध्रीचीः सिन्धुमुशतीरिवायन्सनाज्जार आरितः पूर्भिदासाम् ।

10.111.10c अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इन्द्र पूर्वीः ॥

10.111.10a sadhrīcīḥ sindhum uśatīr ivāyan sanāj jāra āritaḥ pūrbhid āsām |

10.111.10c astam ā te pārthivā vasūny asme jagmuḥ sūnṛtā indra pūrvīḥ ||

10.112.01a इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः ।

10.112.01c हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम ॥

10.112.01a indra piba pratikāmaṁ sutasya prātaḥsāvas tava hi pūrvapītiḥ |

10.112.01c harṣasva hantave śūra śatrūn ukthebhiṣ ṭe vīryā3 pra bravāma ||

10.112.02a यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि ।

10.112.02c तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः ॥

10.112.02a yas te ratho manaso javīyān endra tena somapeyāya yāhi |

10.112.02c tūyam ā te harayaḥ pra dravantu yebhir yāsi vṛṣabhir mandamānaḥ ||

10.112.03a हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।

10.112.03c अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ॥

10.112.03a haritvatā varcasā sūryasya śreṣṭhai rūpais tanvaṁ sparśayasva |

10.112.03c asmābhir indra sakhibhir huvānaḥ sadhrīcīno mādayasvā niṣadya ||

10.112.04a यस्य त्यत्ते महिमानं मदेष्विमे मही रोदसी नाविविक्ताम् ।

10.112.04c तदोक आ हरिभिरिन्द्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ॥

10.112.04a yasya tyat te mahimānam madeṣv ime mahī rodasī nāviviktām |
10.112.04c tad oka ā haribhir indra yuktaiḥ priyebhir yāhi priyam annam accha ||

10.112.05a यस्य शश्वत्पपिवाँ इन्द्र शत्रूननानुकृत्या रण्या चकर्थ ।

10.112.05c स ते पुरंधिं तविषीमियर्ति स ते मदाय सुत इन्द्र सोमः ॥

10.112.05a yasya śaśvat papivām̐ indra śatrūn anānukṛtyā raṇyā cakartha |
10.112.05c sa te purandhiṁ taviṣīm iyarti sa te madāya suta indra somaḥ ||

10.112.06a इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो ।

10.112.06c पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः ॥

10.112.06a idaṁ te pātraṁ sanavittam indra pibā somam enā śatakrato |
10.112.06c pūrṇa āhāvo madirasya madhvo yaṁ viśva id abhiharyanti devāḥ ||

10.112.07a वि हि त्वामिन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते ।

10.112.07c अस्माकं ते मधुमत्तमानीमा भुवन्सवना तेषु हर्य ॥

10.112.07a vi hi tvām indra purudhā janāso hitaprayaso vṛṣabha hvayante |
10.112.07c asmākaṁ te madhumattamānīmā bhuvan savanā teṣu harya ||

10.112.08a प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि ।

10.112.08c सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम् ॥

10.112.08a pra ta indra pūrvyāṇi pra nūnaṁ vīryā vocam prathamā kṛtāni |
10.112.08c satīnamanyur aśrathāyo adriṁ suvedanām akṛṇor brahmaṇe gām ||

10.112.09a नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।

10.112.09c न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥

10.112.09a ni ṣu sīda gaṇapate gaṇeṣu tvām āhur vipratamaṁ kavīnām |
10.112.09c na ṛte tvat kriyate kiṁ canāre mahām arkam maghavañ citram arca ||

10.112.10a अभिख्या नो मघवन्नाधमानान्सखे बोधि वसुपते सखीनाम् ।

10.112.10c रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥

10.112.10a abhikhyā no maghavan nādhamānān sakhe bodhi vasupate sakhīnām |
10.112.10c raṇaṁ kṛdhi raṇakṛt satyaśuṣmābhakte cid ā bhajā rāye asmān ||

10.113.01a तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम् ।

10.113.01c यदैत्कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥

10.113.01a tam asya dyāvāpṛthivī sacetasā viśvebhir devair anu śuṣmam āvatām |
10.113.01c yad ait kṛṇvāno mahimānam indriyam pītvī somasya kratumām̐ avardhata ||

10.113.02a तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते ।

10.113.02c देवेभिरिन्द्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥

10.113.02a tam asya viṣṇur mahimānam ojasāṁśuṁ dadhanvān madhuno vi rapśate |
10.113.02c devebhir indro maghavā sayāvabhir vṛtraṁ jaghanvām̐ abhavad vareṇyaḥ ||

10.113.03a वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।

10.113.03c विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिन्द्रियम् ॥

10.113.03a vṛtreṇa yad ahinā bibhrad āyudhā samasthithā yudhaye śaṁsam āvide |
10.113.03c viśve te atra marutaḥ saha tmanāvardhann ugra mahimānam indriyam ||

10.113.04a जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणम् ।

10.113.04c अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुम् ॥

10.113.04a jajñāna eva vy abādhata spṛdhaḥ prāpaśyad vīro abhi pauṁsyaṁ raṇam |
10.113.04c avṛścad adrim ava sasyadaḥ sṛjad astabhnān nākaṁ svapasyayā pṛthum ||

10.113.05a आदिन्द्रः सत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।

10.113.05c अवाभरद्धृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥

10.113.05a ād indraḥ satrā taviṣīr apatyata varīyo dyāvāpṛthivī abādhata |
10.113.05c avābharad dhṛṣito vajram āyasaṁ śevam mitrāya varuṇāya dāśuṣe ||

10.113.06a इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।

10.113.06c वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतम् ॥

10.113.06a indrasyātra taviṣībhyo virapśina ṛghāyato araṁhayanta manyave |
10.113.06c vṛtraṁ yad ugro vy avṛścad ojasāpo bibhrataṁ tamasā parīvṛtam ||

10.113.07a या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।

10.113.07c ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ॥

10.113.07a yā vīryāṇi prathamāni kartvā mahitvebhir yatamānau samīyatuḥ |
10.113.07c dhvāntaṁ tamo 'va dadhvase hata indro mahnā pūrvahūtāv apatyata ||

10.113.08a विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्सोमवत्या वचस्यया ।

10.113.08c रद्धं वृत्रमहिमिन्द्रस्य हन्मनाग्निर्न जम्भैस्तृष्वन्नमावयत् ॥

10.113.08a viśve devāso adha vṛṣṇyāni te 'vardhayan somavatyā vacasyayā |
10.113.08c raddhaṁ vṛtram ahim indrasya hanmanāgnir na jambhais tṛṣv annam āvayat ||

10.113.09a भूरि दक्षेभिर्वचनेभिरृक्वभिः सख्येभिः सख्यानि प्र वोचत ।

10.113.09c इन्द्रो धुनिं च चुमुरिं च दम्भयञ्छ्रद्धामनस्या शृणुते दभीतये ॥

10.113.09a bhūri dakṣebhir vacanebhir ṛkvabhiḥ sakhyebhiḥ sakhyāni pra vocata |
10.113.09c indro dhuniṁ ca cumuriṁ ca dambhayañ chraddhāmanasyā śṛṇute dabhītaye ||

10.113.10a त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।

10.113.10c सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥

10.113.10a tvam purūṇy ā bharā svaśvyā yebhir maṁsai nivacanāni śaṁsan |
10.113.10c sugebhir viśvā duritā tarema vido ṣu ṇa urviyā gādham adya ||

10.114.01a घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।

10.114.01c दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥

10.114.01a gharmā samantā trivṛtaṁ vy āpatus tayor juṣṭim mātariśvā jagāma |
10.114.01c divas payo didhiṣāṇā aveṣan vidur devāḥ sahasāmānam arkam ||

10.114.02a तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।

10.114.02c तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥

10.114.02a tisro deṣṭrāya nirṛtīr upāsate dīrghaśruto vi hi jānanti vahnayaḥ |
10.114.02c tāsāṁ ni cikyuḥ kavayo nidānam pareṣu yā guhyeṣu vrateṣu ||

10.114.03a चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।

10.114.03c तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ॥

10.114.03a catuṣkapardā yuvatiḥ supeśā ghṛtapratīkā vayunāni vaste |
10.114.03c tasyāṁ suparṇā vṛṣaṇā ni ṣedatur yatra devā dadhire bhāgadheyam ||

10.114.04a एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।

10.114.04c तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ॥

10.114.04a ekaḥ suparṇaḥ sa samudram ā viveśa sa idaṁ viśvam bhuvanaṁ vi caṣṭe |
10.114.04c tam pākena manasāpaśyam antitas tam mātā reḷhi sa u reḷhi mātaram ||

10.114.05a सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।

10.114.05c छन्दांसि च दधतो अध्वरेषु ग्रहान्सोमस्य मिमते द्वादश ॥

10.114.05a suparṇaṁ viprāḥ kavayo vacobhir ekaṁ santam bahudhā kalpayanti |
10.114.05c chandāṁsi ca dadhato adhvareṣu grahān somasya mimate dvādaśa ||

10.114.06a षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।

10.114.06c यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ॥

10.114.06a ṣaṭtriṁśāṁ̐ś ca caturaḥ kalpayantaś chandāṁsi ca dadhata ādvādaśam |
10.114.06c yajñaṁ vimāya kavayo manīṣa ṛksāmābhyām pra rathaṁ vartayanti ||

10.114.07a चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।

10.114.07c आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ॥

10.114.07a caturdaśānye mahimāno asya taṁ dhīrā vācā pra ṇayanti sapta |
10.114.07c āpnānaṁ tīrthaṁ ka iha pra vocad yena pathā prapibante sutasya ||

10.114.08a सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् ।

10.114.08c सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥

10.114.08a sahasradhā pañcadaśāny ukthā yāvad dyāvāpṛthivī tāvad it tat |
10.114.08c sahasradhā mahimānaḥ sahasraṁ yāvad brahma viṣṭhitaṁ tāvatī vāk ||

10.114.09a कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।

10.114.09c कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ॥

10.114.09a kaś chandasāṁ yogam ā veda dhīraḥ ko dhiṣṇyām prati vācam papāda |
10.114.09c kam ṛtvijām aṣṭamaṁ śūram āhur harī indrasya ni cikāya kaḥ svit ||

10.114.10a भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।

10.114.10c श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ॥

10.114.10a bhūmyā antam pary eke caranti rathasya dhūrṣu yuktāso asthuḥ |
10.114.10c śramasya dāyaṁ vi bhajanty ebhyo yadā yamo bhavati harmye hitaḥ ||

10.115.01a चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे ।

10.115.01c अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं१ चरन् ॥

10.115.01a citra ic chiśos taruṇasya vakṣatho na yo mātarāv apyeti dhātave |
10.115.01c anūdhā yadi jījanad adhā ca nu vavakṣa sadyo mahi dūtyaṁ1 caran ||

10.115.02a अग्निर्ह नाम धायि दन्नपस्तमः सं यो वना युवते भस्मना दता ।

10.115.02c अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥

10.115.02a agnir ha nāma dhāyi dann apastamaḥ saṁ yo vanā yuvate bhasmanā datā |
10.115.02c abhipramurā juhvā svadhvara ino na prothamāno yavase vṛṣā ||

10.115.03a तं वो विं न द्रुषदं देवमन्धस इन्दुं प्रोथन्तं प्रवपन्तमर्णवम् ।

10.115.03c आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजन्तमध्वनः ॥

10.115.03a taṁ vo viṁ na druṣadaṁ devam andhasa indum prothantam pravapantam arṇavam |
10.115.03c āsā vahniṁ na śociṣā virapśinam mahivrataṁ na sarajantam adhvanaḥ ||

10.115.04a वि यस्य ते ज्रयसानस्याजर धक्षोर्न वाताः परि सन्त्यच्युताः ।

10.115.04c आ रण्वासो युयुधयो न सत्वनं त्रितं नशन्त प्र शिषन्त इष्टये ॥

10.115.04a vi yasya te jrayasānasyājara dhakṣor na vātāḥ pari santy acyutāḥ |
10.115.04c ā raṇvāso yuyudhayo na satvanaṁ tritaṁ naśanta pra śiṣanta iṣṭaye ||

10.115.05a स इदग्निः कण्वतमः कण्वसखार्यः परस्यान्तरस्य तरुषः ।

10.115.05c अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥

10.115.05a sa id agniḥ kaṇvatamaḥ kaṇvasakhāryaḥ parasyāntarasya taruṣaḥ |
10.115.05c agniḥ pātu gṛṇato agniḥ sūrīn agnir dadātu teṣām avo naḥ ||

10.115.06a वाजिन्तमाय सह्यसे सुपित्र्य तृषु च्यवानो अनु जातवेदसे ।

10.115.06c अनुद्रे चिद्यो धृषता वरं सते महिन्तमाय धन्वनेदविष्यते ॥

10.115.06a vājintamāya sahyase supitrya tṛṣu cyavāno anu jātavedase |
10.115.06c anudre cid yo dhṛṣatā varaṁ sate mahintamāya dhanvaned aviṣyate ||

10.115.07a एवाग्निर्मर्तैः सह सूरिभिर्वसु ष्टवे सहसः सूनरो नृभिः ।

10.115.07c मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि सन्ति मानुषान् ॥

10.115.07a evāgnir martaiḥ saha sūribhir vasu ṣṭave sahasaḥ sūnaro nṛbhiḥ |
10.115.07c mitrāso na ye sudhitā ṛtāyavo dyāvo na dyumnair abhi santi mānuṣān ||

10.115.08a ऊर्जो नपात्सहसावन्निति त्वोपस्तुतस्य वन्दते वृषा वाक् ।

10.115.08c त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥

10.115.08a ūrjo napāt sahasāvann iti tvopastutasya vandate vṛṣā vāk |
10.115.08c tvāṁ stoṣāma tvayā suvīrā drāghīya āyuḥ prataraṁ dadhānāḥ ||

10.115.09a इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास ऋषयोऽवोचन् ।

10.115.09c ताँश्च पाहि गृणतश्च सूरीन्वषड्वषळित्यूर्ध्वासो अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥

10.115.09a iti tvāgne vṛṣṭihavyasya putrā upastutāsa ṛṣayo 'vocan |
10.115.09c tām̐ś ca pāhi gṛṇataś ca sūrīn vaṣaḍ vaṣaḷ ity ūrdhvāso anakṣan namo nama ity ūrdhvāso anakṣan ||

10.116.01a पिबा सोमं महत इन्द्रियाय पिबा वृत्राय हन्तवे शविष्ठ ।

10.116.01c पिब राये शवसे हूयमानः पिब मध्वस्तृपदिन्द्रा वृषस्व ॥

10.116.01a pibā somam mahata indriyāya pibā vṛtrāya hantave śaviṣṭha |
10.116.01c piba rāye śavase hūyamānaḥ piba madhvas tṛpad indrā vṛṣasva ||

10.116.02a अस्य पिब क्षुमतः प्रस्थितस्येन्द्र सोमस्य वरमा सुतस्य ।

10.116.02c स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥

10.116.02a asya piba kṣumataḥ prasthitasyendra somasya varam ā sutasya |

10.116.02c svastidā manasā mādayasvārvācīno revate saubhagāya ||

10.116.03a ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सूयते पार्थिवेषु ।

10.116.03c ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥

10.116.03a mamattu tvā divyaḥ soma indra mamattu yaḥ sūyate pārthiveṣu |
10.116.03c mamattu yena varivaś cakartha mamattu yena niriṇāsi śatrūn ||

10.116.04a आ द्विबर्हा अमिनो यात्विन्द्रो वृषा हरिभ्यां परिषिक्तमन्धः ।

10.116.04c गव्या सुतस्य प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ॥

10.116.04a ā dvibarhā amino yātv indro vṛṣā haribhyām pariṣiktam andhaḥ |
10.116.04c gavy ā sutasya prabhṛtasya madhvaḥ satrā khedām aruśahā vṛṣasva ||

10.116.05a नि तिग्मानि भ्राशयन्भ्राश्यान्यव स्थिरा तनुहि यातुजूनाम् ।

10.116.05c उग्राय ते सहो बलं ददामि प्रतीत्या शत्रून्विगदेषु वृश्च ॥

10.116.05a ni tigmāni bhrāśayan bhrāśyāny ava sthirā tanuhi yātujūnām |
10.116.05c ugrāya te saho balaṁ dadāmi pratītyā śatrūn vigadeṣu vṛśca ||

10.116.06a व्यर्१्य इन्द्र तनुहि श्रवांस्योज स्थिरेव धन्वनोऽभिमातीः ।

10.116.06c अस्मद्र्यग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥

10.116.06a vy a1rya indra tanuhi śravāṁsy oja sthireva dhanvano 'bhimātīḥ |
10.116.06c asmadryag vāvṛdhānaḥ sahobhir anibhṛṣṭas tanvaṁ vāvṛdhasva ||

10.116.07a इदं हविर्मघवन्तुभ्यं रातं प्रति सम्राळहृणानो गृभाय ।

10.116.07c तुभ्यं सुतो मघवन्तुभ्यं पक्वो३ऽद्धीन्द्र पिब च प्रस्थितस्य ॥

10.116.07a idaṁ havir maghavan tubhyaṁ rātam prati samrāḷ ahṛṇāno gṛbhāya |
10.116.07c tubhyaṁ suto maghavan tubhyam pakvo3 'ddhīndra piba ca prasthitasya ||

10.116.08a अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम् ।

10.116.08c प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः ॥

10.116.08a addhīd indra prasthitemā havīṁṣi cano dadhiṣva pacatota somam |
10.116.08c prayasvantaḥ prati haryāmasi tvā satyāḥ santu yajamānasya kāmāḥ ||

10.116.09a प्रेन्द्राग्निभ्यां सुवचस्यामियर्मि सिन्धाविव प्रेरयं नावमर्कैः ।

10.116.09c अया इव परि चरन्ति देवा ये अस्मभ्यं धनदा उद्भिदश्च ॥

10.116.09a prendrāgnibhyāṁ suvacasyām iyarmi sindhāv iva prerayaṁ nāvam arkaiḥ |
10.116.09c ayā iva pari caranti devā ye asmabhyaṁ dhanadā udbhidaś ca ||

10.117.01a न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छन्ति मृत्यवः ।

10.117.01c उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितारं न विन्दते ॥

10.117.01a na vā u devāḥ kṣudham id vadhaṁ dadur utāśitam upa gacchanti mṛtyavaḥ |
10.117.01c uto rayiḥ pṛṇato nopa dasyaty utāpṛṇan marḍitāraṁ na vindate ||

10.117.02a य आध्राय चकमानाय पित्वोऽन्नवान्सन्रफितायोपजग्मुषे ।

10.117.02c स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विन्दते ॥

10.117.02a ya ādhrāya cakamānāya pitvo 'nnavān san raphitāyopajagmuṣe |
10.117.02c sthiram manaḥ kṛṇute sevate puroto cit sa marḍitāraṁ na vindate ||

10.117.03a स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।

10.117.03c अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥

10.117.03a sa id bhojo yo gṛhave dadāty annakāmāya carate kṛśāya |
10.117.03c aram asmai bhavati yāmahūtā utāparīṣu kṛṇute sakhāyam ||

10.117.04a न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।

10.117.04c अपास्मात्प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ॥

10.117.04a na sa sakhā yo na dadāti sakhye sacābhuve sacamānāya pitvaḥ |
10.117.04c apāsmāt preyān na tad oko asti pṛṇantam anyam araṇaṁ cid icchet ||

10.117.05a पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पन्थाम् ।

10.117.05c ओ हि वर्तन्ते रथ्येव चक्रान्यमन्यमुप तिष्ठन्त रायः ॥

10.117.05a pṛṇīyād in nādhamānāya tavyān drāghīyāṁsam anu paśyeta panthām |
10.117.05c o hi vartante rathyeva cakrānyam-anyam upa tiṣṭhanta rāyaḥ ||

10.117.06a मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।

10.117.06c नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥

10.117.06a mogham annaṁ vindate apracetāḥ satyam bravīmi vadha it sa tasya |
10.117.06c nāryamaṇam puṣyati no sakhāyaṁ kevalāgho bhavati kevalādī ||

10.117.07a कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः ।

10.117.07c वदन्ब्रह्मावदतो वनीयान्पृणन्नापिरपृणन्तमभि ष्यात् ॥

10.117.07a kṛṣann it phāla āśitaṁ kṛṇoti yann adhvānam apa vṛṅkte caritraiḥ |
10.117.07c vadan brahmāvadato vanīyān pṛṇann āpir apṛṇantam abhi ṣyāt ||

10.117.08a एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।

10.117.08c चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन्पङ्क्तीरुपतिष्ठमानः ॥

10.117.08a ekapād bhūyo dvipado vi cakrame dvipāt tripādam abhy eti paścāt |
10.117.08c catuṣpād eti dvipadām abhisvare sampaśyan paṅktīr upatiṣṭhamānaḥ ||

10.117.09a समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते ।

10.117.09c यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं पृणीतः ॥

10.117.09a samau cid dhastau na samaṁ viviṣṭaḥ sammātarā cin na samaṁ duhāte |
10.117.09c yamayoś cin na samā vīryāṇi jñātī cit santau na samam pṛṇītaḥ ||

10.118.01a अग्ने हंसि न्यत्रिणं दीद्यन्मर्त्येष्वा ।

10.118.01c स्वे क्षये शुचिव्रत ॥

10.118.01a agne haṁsi ny a1triṇaṁ dīdyan martyeṣv ā |
10.118.01c sve kṣaye śucivrata ||

10.118.02a उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे ।

10.118.02c यत्त्वा स्रुचः समस्थिरन् ॥

10.118.02a ut tiṣṭhasi svāhuto ghṛtāni prati modase |
10.118.02c yat tvā srucaḥ samasthiran ||

10.118.03a स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा ।

10.118.03c स्रुचा प्रतीकमज्यते ॥

10.118.03a sa āhuto vi rocate 'gnir īḻenyo girā |
10.118.03c srucā pratīkam ajyate ||

10.118.04a घृतेनाग्निः समज्यते मधुप्रतीक आहुतः ।

10.118.04c रोचमानो विभावसुः ॥

10.118.04a ghṛtenāgniḥ sam ajyate madhupratīka āhutaḥ |
10.118.04c rocamāno vibhāvasuḥ ||

10.118.05a जरमाणः समिध्यसे देवेभ्यो हव्यवाहन ।

10.118.05c तं त्वा हवन्त मर्त्याः ॥

10.118.05a jaramāṇaḥ sam idhyase devebhyo havyavāhana |
10.118.05c taṁ tvā havanta martyāḥ ||

10.118.06a तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत ।

10.118.06c अदाभ्यं गृहपतिम् ॥

10.118.06a tam martā amartyaṁ ghṛtenāgniṁ saparyata |
10.118.06c adābhyaṁ gṛhapatim ||

10.118.07a अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह ।

10.118.07c गोपा ऋतस्य दीदिहि ॥

10.118.07a adābhyena śociṣāgne rakṣas tvaṁ daha |
10.118.07c gopā ṛtasya dīdihi ||

10.118.08a स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः ।

10.118.08c उरुक्षयेषु दीद्यत् ॥

10.118.08a sa tvam agne pratīkena praty oṣa yātudhānyaḥ |
10.118.08c urukṣayeṣu dīdyat ||

10.118.09a तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे ।

10.118.09c यजिष्ठं मानुषे जने ॥

10.118.09a taṁ tvā gīrbhir urukṣayā havyavāhaṁ sam īdhire |
10.118.09c yajiṣṭham mānuṣe jane ||

10.119.01a इति वा इति मे मनो गामश्वं सनुयामिति ।

10.119.01c कुवित्सोमस्यापामिति ॥

10.119.01a iti vā iti me mano gām aśvaṁ sanuyām iti |
10.119.01c kuvit somasyāpām iti ||

10.119.02a प्र वाता इव दोधत उन्मा पीता अयंसत ।

10.119.02c कुवित्सोमस्यापामिति ॥

10.119.02a pra vātā iva dodhata un mā pītā ayaṁsata |
10.119.02c kuvit somasyāpām iti ||

10.119.03a उन्मा पीता अयंसत रथमश्वा इवाशवः ।

10.119.03c कुवित्सोमस्यापामिति ॥

10.119.03a un mā pītā ayaṁsata ratham aśvā ivāśavaḥ |
10.119.03c kuvit somasyāpām iti ||

10.119.04a उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम् ।

10.119.04c कुवित्सोमस्यापामिति ॥

10.119.04a upa mā matir asthita vāśrā putram iva priyam |
10.119.04c kuvit somasyāpām iti ||

10.119.05a अहं तष्टेव वन्धुरं पर्यचामि हृदा मतिम् ।

10.119.05c कुवित्सोमस्यापामिति ॥

10.119.05a ahaṁ taṣṭeva vandhuram pary acāmi hṛdā matim |
10.119.05c kuvit somasyāpām iti ||

10.119.06a नहि मे अक्षिपच्चनाच्छान्त्सुः पञ्च कृष्टयः ।

10.119.06c कुवित्सोमस्यापामिति ॥

10.119.06a nahi me akṣipac canācchāntsuḥ pañca kṛṣṭayaḥ |
10.119.06c kuvit somasyāpām iti ||

10.119.07a नहि मे रोदसी उभे अन्यं पक्षं चन प्रति ।

10.119.07c कुवित्सोमस्यापामिति ॥

10.119.07a nahi me rodasī ubhe anyam pakṣaṁ cana prati |

10.119.07c kuvit somasyāpām iti ||

10.119.08a अभि द्यां महिना भुवमभी३मां पृथिवीं महीम् ।

10.119.08c कुवित्सोमस्यापामिति ॥

10.119.08a abhi dyām mahinā bhuvam abhī3mām pṛthivīm mahīm |
10.119.08c kuvit somasyāpām iti ||

10.119.09a हन्ताहं पृथिवीमिमां नि दधानीह वेह वा ।

10.119.09c कुवित्सोमस्यापामिति ॥

10.119.09a hantāham pṛthivīm imāṁ ni dadhānīha veha vā |
10.119.09c kuvit somasyāpām iti ||

10.119.10a ओषमित्पृथिवीमहं जङ्घनानीह वेह वा ।

10.119.10c कुवित्सोमस्यापामिति ॥

10.119.10a oṣam it pṛthivīm ahaṁ jaṅghanānīha veha vā |
10.119.10c kuvit somasyāpām iti ||

10.119.11a दिवि मे अन्यः पक्षो३ऽधो अन्यमचीकृषम् ।

10.119.11c कुवित्सोमस्यापामिति ॥

10.119.11a divi me anyaḥ pakṣo3 'dho anyam acīkṛṣam |
10.119.11c kuvit somasyāpām iti ||

10.119.12a अहमस्मि महामहोऽभिनभ्यमुदीषितः ।

10.119.12c कुवित्सोमस्यापामिति ॥

10.119.12a aham asmi mahāmaho 'bhinabhyam udīṣitaḥ |
10.119.12c kuvit somasyāpām iti ||

10.119.13a गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः ।

10.119.13c कुवित्सोमस्यापामिति ॥

10.119.13a gṛho yāmy araṅkṛto devebhyo havyavāhanaḥ |
10.119.13c kuvit somasyāpām iti ||

10.120.01a तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।

10.120.01c सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥

10.120.01a tad id āsa bhuvaneṣu jyeṣṭhaṁ yato jajña ugras tveṣanṛmṇaḥ |
10.120.01c sadyo jajñāno ni riṇāti śatrūn anu yaṁ viśve madanty ūmāḥ ||

10.120.02a वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।

10.120.02c अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥

10.120.02a vāvṛdhānaḥ śavasā bhūryojāḥ śatrur dāsāya bhiyasaṁ dadhāti |
10.120.02c avyanac ca vyanac ca sasni saṁ te navanta prabhṛtā madeṣu ||

10.120.03a त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।

10.120.03c स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥

10.120.03a tve kratum api vṛñjanti viśve dvir yad ete trir bhavanty ūmāḥ |
10.120.03c svādoḥ svādīyaḥ svādunā sṛjā sam adaḥ su madhu madhunābhi yodhīḥ ||

10.120.04a इति चिद्धि त्वा धना जयन्तं मदेमदे अनुमदन्ति विप्राः ।

10.120.04c ओजीयो धृष्णो स्थिरमा तनुष्व मा त्वा दभन्यातुधाना दुरेवाः ॥

10.120.04a iti cid dhi tvā dhanā jayantam made-made anumadanti viprāḥ |
10.120.04c ojīyo dhṛṣṇo sthiram ā tanuṣva mā tvā dabhan yātudhānā durevāḥ ||

10.120.05a त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।

10.120.05c चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥

10.120.05a tvayā vayaṁ śāśadmahe raṇeṣu prapaśyanto yudhenyāni bhūri |
10.120.05c codayāmi ta āyudhā vacobhiḥ saṁ te śiśāmi brahmaṇā vayāṁsi ||

10.120.06a स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम् ।

10.120.06c आ दर्षते शवसा सप्त दानून्प्र साक्षते प्रतिमानानि भूरि ॥

10.120.06a stuṣeyyam puruvarpasam ṛbhvam inatamam āptyam āptyānām |
10.120.06c ā darṣate śavasā sapta dānūn pra sākṣate pratimānāni bhūri ||

10.120.07a नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे ।

10.120.07c आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि ॥

10.120.07a ni tad dadhiṣe 'varam paraṁ ca yasminn āvithāvasā duroṇe |
10.120.07c ā mātarā sthāpayase jigatnū ata inoṣi karvarā purūṇi ||

10.120.08a इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषमग्रियः स्वर्षाः ।

10.120.08c महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः ॥

10.120.08a imā brahma bṛhaddivo vivaktīndrāya śūṣam agriyaḥ svarṣāḥ |
10.120.08c maho gotrasya kṣayati svarājo duraś ca viśvā avṛṇod apa svāḥ ||

10.120.09a एवा महान्बृहद्दिवो अथर्वावोचत्स्वां तन्व१मिन्द्रमेव ।

10.120.09c स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च ॥

10.120.09a evā mahān bṛhaddivo atharvāvocat svāṁ tanva1m indram eva |
10.120.09c svasāro mātaribhvarīr ariprā hinvanti ca śavasā vardhayanti ca ||

10.121.01a हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

10.121.01c स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

10.121.01a hiraṇyagarbhaḥ sam avartatāgre bhūtasya jātaḥ patir eka āsīt |
10.121.01c sa dādhāra pṛthivīṁ dyām utemāṁ kasmai devāya haviṣā vidhema ||

10.121.02a य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।

10.121.02c यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥

10.121.02a ya ātmadā baladā yasya viśva upāsate praśiṣaṁ yasya devāḥ |
10.121.02c yasya chāyāmṛtaṁ yasya mṛtyuḥ kasmai devāya haviṣā vidhema ||

10.121.03a यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।

10.121.03c य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

10.121.03a yaḥ prāṇato nimiṣato mahitvaika id rājā jagato babhūva |
10.121.03c ya īśe asya dvipadaś catuṣpadaḥ kasmai devāya haviṣā vidhema ||

10.121.04a यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।

10.121.04c यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥

10.121.04a yasyeme himavanto mahitvā yasya samudraṁ rasayā sahāhuḥ |

10.121.04c yasyemāḥ pradiśo yasya bāhū kasmai devāya haviṣā vidhema ||

10.121.05a येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्व स्तभितं येन नाकः ।

10.121.05c यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥

10.121.05a yena dyaur ugrā pṛthivī ca dṛḻhā yena sva stabhitaṁ yena nākaḥ |

10.121.05c yo antarikṣe rajaso vimānaḥ kasmai devāya haviṣā vidhema ||

10.121.06a यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।

10.121.06c यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥

10.121.06a yaṁ krandasī avasā tastabhāne abhy aikṣetām manasā rejamāne |

10.121.06c yatrādhi sūra udito vibhāti kasmai devāya haviṣā vidhema ||

10.121.07a आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।

10.121.07c ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥

10.121.07a āpo ha yad bṛhatīr viśvam āyan garbhaṁ dadhānā janayantīr agnim |

10.121.07c tato devānāṁ sam avartatāsur ekaḥ kasmai devāya haviṣā vidhema ||

10.121.08a यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।

10.121.08c यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥

10.121.08a yaś cid āpo mahinā paryapaśyad dakṣaṁ dadhānā janayantīr yajñam |

10.121.08c yo deveṣv adhi deva eka āsīt kasmai devāya haviṣā vidhema ||

10.121.09a मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।

10.121.09c यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥

10.121.09a mā no hiṁsīj janitā yaḥ pṛthivyā yo vā divaṁ satyadharmā jajāna |

10.121.09c yaś cāpaś candrā bṛhatīr jajāna kasmai devāya haviṣā vidhema ||

10.121.10a प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।

10.121.10c यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥

10.121.10a prajāpate na tvad etāny anyo viśvā jātāni pari tā babhūva |

10.121.10c yatkāmās te juhumas tan no astu vayaṁ syāma patayo rayīṇām ||

10.122.01a वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्विषेण्यम् ।

10.122.01c स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः सुवीर्यम् ॥

10.122.01a vasuṁ na citramahasaṁ gṛṇīṣe vāmaṁ śevam atithim adviṣeṇyam |
10.122.01c sa rāsate śurudho viśvadhāyaso 'gnir hotā gṛhapatiḥ suvīryam ||

10.122.02a जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान्वयुनानि सुक्रतो ।

10.122.02c घृतनिर्णिग्ब्रह्मणे गातुमेरय तव देवा अजनयन्ननु व्रतम् ॥

10.122.02a juṣāṇo agne prati harya me vaco viśvāni vidvān vayunāni sukrato |
10.122.02c ghṛtanirṇig brahmaṇe gātum eraya tava devā ajanayann anu vratam ||

10.122.03a सप्त धामानि परियन्नमर्त्यो दाशद्दाशुषे सुकृते मामहस्व ।

10.122.03c सुवीरेण रयिणाग्ने स्वाभुवा यस्त आनट् समिधा तं जुषस्व ॥

10.122.03a sapta dhāmāni pariyann amartyo dāśad dāśuṣe sukṛte māmahasva |
10.122.03c suvīreṇa rayiṇāgne svābhuvā yas ta ānaṭ samidhā taṁ juṣasva ||

10.122.04a यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मन्त ईळते सप्त वाजिनम् ।

10.122.04c शृण्वन्तमग्निं घृतपृष्ठमुक्षणं पृणन्तं देवं पृणते सुवीर्यम् ॥

10.122.04a yajñasya ketum prathamam purohitaṁ haviṣmanta īḻate sapta vājinam |
10.122.04c śṛṇvantam agniṁ ghṛtapṛṣṭham ukṣaṇam pṛṇantaṁ devam pṛṇate suvīryam ||

10.122.05a त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।

10.122.05c त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥

10.122.05a tvaṁ dūtaḥ prathamo vareṇyaḥ sa hūyamāno amṛtāya matsva |
10.122.05c tvām marjayan maruto dāśuṣo gṛhe tvāṁ stomebhir bhṛgavo vi rurucuḥ ||

10.122.06a इषं दुहन्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।

10.122.06c अग्ने घृतस्नुस्त्रिरृतानि दीद्यद्वर्तिर्यज्ञं परियन्सुक्रतूयसे ॥

10.122.06a iṣaṁ duhan sudughāṁ viśvadhāyasaṁ yajñapriye yajamānāya sukrato |
10.122.06c agne ghṛtasnus trir ṛtāni dīdyad vartir yajñam pariyan sukratūyase ||

10.122.07a त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः ।

10.122.07c त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे ॥

10.122.07a tvām id asyā uṣaso vyuṣṭiṣu dūtaṁ kṛṇvānā ayajanta mānuṣāḥ |
10.122.07c tvāṁ devā mahayāyyāya vāvṛdhur ājyam agne nimṛjanto adhvare ||

10.122.08a नि त्वा वसिष्ठा अह्वन्त वाजिनं गृणन्तो अग्ने विदथेषु वेधसः ।

10.122.08c रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥

10.122.08a ni tvā vasiṣṭhā ahvanta vājinaṁ gṛṇanto agne vidatheṣu vedhasaḥ |
10.122.08c rāyas poṣaṁ yajamāneṣu dhāraya yūyam pāta svastibhiḥ sadā naḥ ||

10.123.01a अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।

10.123.01c इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥

10.123.01a ayaṁ venaś codayat pṛśnigarbhā jyotirjarāyū rajaso vimāne |
10.123.01c imam apāṁ saṅgame sūryasya śiśuṁ na viprā matibhī rihanti ||

10.123.02a समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि ।

10.123.02c ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ॥

10.123.02a samudrād ūrmim ud iyarti veno nabhojāḥ pṛṣṭhaṁ haryatasya darśi |
10.123.02c ṛtasya sānāv adhi viṣṭapi bhrāṭ samānaṁ yonim abhy anūṣata vrāḥ ||

10.123.03a समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीळाः ।

10.123.03c ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः ॥

10.123.03a samānam pūrvīr abhi vāvaśānās tiṣṭhan vatsasya mātaraḥ sanīḷāḥ |
10.123.03c ṛtasya sānāv adhi cakramāṇā rihanti madhvo amṛtasya vāṇīḥ ||

10.123.04a जानन्तो रूपमकृपन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।

10.123.04c ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नाम ॥

10.123.04a jānanto rūpam akṛpanta viprā mṛgasya ghoṣam mahiṣasya hi gman |
10.123.04c ṛtena yanto adhi sindhum asthur vidad gandharvo amṛtāni nāma ||

10.123.05a अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।

10.123.05c चरत्प्रियस्य योनिषु प्रियः सन्सीदत्पक्षे हिरण्यये स वेनः ॥

10.123.05a apsarā jāram upasiṣmiyāṇā yoṣā bibharti parame vyoman |
10.123.05c carat priyasya yoniṣu priyaḥ san sīdat pakṣe hiraṇyaye sa venaḥ ||

10.123.06a नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
10.123.06c हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥

10.123.06a nāke suparṇam upa yat patantaṁ hṛdā venanto abhy acakṣata tvā |
10.123.06c hiraṇyapakṣaṁ varuṇasya dūtaṁ yamasya yonau śakunam bhuraṇyum ||

10.123.07a ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।
10.123.07c वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नाम जनत प्रियाणि ॥

10.123.07a ūrdhvo gandharvo adhi nāke asthāt pratyaṅ citrā bibhrad asyāyudhāni |
10.123.07c vasāno atkaṁ surabhiṁ dṛśe kaṁ sva1r ṇa nāma janata priyāṇi ||

10.123.08a द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।
10.123.08c भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥

10.123.08a drapsaḥ samudram abhi yaj jigāti paśyan gṛdhrasya cakṣasā vidharman |
10.123.08c bhānuḥ śukreṇa śociṣā cakānas tṛtīye cakre rajasi priyāṇi ||

10.124.01a इमं नो अग्न उप यज्ञमेहि पञ्चयामं त्रिवृतं सप्ततन्तुम् ।
10.124.01c असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम आशयिष्ठाः ॥

10.124.01a imaṁ no agna upa yajñam ehi pañcayāmaṁ trivṛtaṁ saptatantum |
10.124.01c aso havyavāḷ uta naḥ purogā jyog eva dīrghaṁ tama āśayiṣṭhāḥ ||

10.124.02a अदेवाद्देवः प्रचता गुहा यन्प्रपश्यमानो अमृतत्वमेमि ।
10.124.02c शिवं यत्सन्तमशिवो जहामि स्वात्सख्यादरणीं नाभिमेमि ॥

10.124.02a adevād devaḥ pracatā guhā yan prapaśyamāno amṛtatvam emi |
10.124.02c śivaṁ yat santam aśivo jahāmi svāt sakhyād araṇīṁ nābhim emi ||

10.124.03a पश्यन्नन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि ।
10.124.03c शंसामि पित्रे असुराय शेवमयज्ञियाद्यज्ञियं भागमेमि ॥

10.124.03a paśyann anyasyā atithiṁ vayāyā ṛtasya dhāma vi mime purūṇi |
10.124.03c śaṁsāmi pitre asurāya śevam ayajñiyād yajñiyam bhāgam emi ||

10.124.04a बह्वीः समा अकरमन्तरस्मिन्निन्द्रं वृणानः पितरं जहामि ।

10.124.04c अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥

10.124.04a bahvīḥ samā akaram antar asminn indraṁ vṛṇānaḥ pitaraṁ jahāmi |
10.124.04c agniḥ somo varuṇas te cyavante paryāvard rāṣṭraṁ tad avāmy āyan ||

10.124.05a निर्माया उ त्ये असुरा अभूवन्त्वं च मा वरुण कामयासे ।

10.124.05c ऋतेन राजन्ननृतं विविञ्चन्मम राष्ट्रस्याधिपत्यमेहि ॥

10.124.05a nirmāyā u tye asurā abhūvan tvaṁ ca mā varuṇa kāmayāse |
10.124.05c ṛtena rājann anṛtaṁ viviñcan mama rāṣṭrasyādhipatyam ehi ||

10.124.06a इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम् ।

10.124.06c हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम ॥

10.124.06a idaṁ svar idam id āsa vāmam ayam prakāśa urv a1ntarikṣam |
10.124.06c hanāva vṛtraṁ nirehi soma haviṣ ṭvā santaṁ haviṣā yajāma ||

10.124.07a कविः कवित्वा दिवि रूपमासजदप्रभूती वरुणो निरपः सृजत् ।

10.124.07c क्षेमं कृण्वाना जनयो न सिन्धवस्ता अस्य वर्णं शुचयो भरिभ्रति ॥

10.124.07a kaviḥ kavitvā divi rūpam āsajad aprabhūtī varuṇo nir apaḥ sṛjat |
10.124.07c kṣemaṁ kṛṇvānā janayo na sindhavas tā asya varṇaṁ śucayo bharibhrati ||

10.124.08a ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमा क्षेति स्वधया मदन्तीः ।

10.124.08c ता ईं विशो न राजानं वृणाना बीभत्सुवो अप वृत्रादतिष्ठन् ॥

10.124.08a tā asya jyeṣṭham indriyaṁ sacante tā īm ā kṣeti svadhayā madantīḥ |
10.124.08c tā īṁ viśo na rājānaṁ vṛṇānā bībhatsuvo apa vṛtrād atiṣṭhan ||

10.124.09a बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ।

10.124.09c अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं नि चिक्युः कवयो मनीषा ॥

10.124.09a bībhatsūnāṁ sayujaṁ haṁsam āhur apāṁ divyānāṁ sakhye carantam |
10.124.09c anuṣṭubham anu carcūryamāṇam indraṁ ni cikyuḥ kavayo manīṣā ||

10.125.01a अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।

10.125.01c अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

10.125.01a aham rudrebhir vasubhiś carāmy aham ādityair uta viśvadevaiḥ |
10.125.01c aham mitrāvaruṇobhā bibharmy aham indrāgnī aham aśvinobhā ||

10.125.02a अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।

10.125.02c अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते ॥

10.125.02a aham somam āhanasam bibharmy aham tvaṣṭāram uta pūṣaṇam bhagam |
10.125.02c aham dadhāmi draviṇam haviṣmate suprāvye3 yajamānāya sunvate ||

10.125.03a अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।

10.125.03c तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥

10.125.03a aham rāṣṭrī saṅgamanī vasūnām cikituṣī prathamā yajñiyānām |
10.125.03c tām mā devā vy adadhuḥ purutrā bhūristhātrām bhūry āveśayantīm ||

10.125.04a मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।

10.125.04c अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥

10.125.04a mayā so annam atti yo vipaśyati yaḥ prāṇiti ya īm śṛṇoty uktam |
10.125.04c amantavo mām ta upa kṣiyanti śrudhi śruta śraddhivam te vadāmi ||

10.125.05a अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।

10.125.05c यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥

10.125.05a aham eva svayam idam vadāmi juṣṭam devebhir uta mānuṣebhiḥ |
10.125.05c yam kāmaye tam-tam ugram kṛṇomi tam brahmāṇam tam ṛṣim tam sumedhām ||

10.125.06a अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।

10.125.06c अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥

10.125.06a aham rudrāya dhanur ā tanomi brahmadviṣe śarave hantavā u |
10.125.06c aham janāya samadam kṛṇomy aham dyāvāpṛthivī ā viveśa ||

10.125.07a अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे ।

10.125.07c ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥

10.125.07a aham suve pitaram asya mūrdhan mama yonir apsv a1ntaḥ samudre |

10.125.07c tato vi tiṣṭhe bhuvanānu viśvotāmūṁ dyāṁ varṣmaṇopa spṛśāmi ||

10.125.08a अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।

10.125.08c परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥

10.125.08a aham eva vāta iva pra vāmy ārabhamāṇā bhuvanāni viśvā |

10.125.08c paro divā para enā pṛthivyaitāvatī mahinā sam babhūva ||

10.126.01a न तमंहो न दुरितं देवासो अष्ट मर्त्यम् ।

10.126.01c सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥

10.126.01a na tam aṁho na duritaṁ devāso aṣṭa martyam |

10.126.01c sajoṣaso yam aryamā mitro nayanti varuṇo ati dviṣaḥ ||

10.126.02a तद्धि वयं वृणीमहे वरुण मित्रार्यमन् ।

10.126.02c येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ॥

10.126.02a tad dhi vayaṁ vṛṇīmahe varuṇa mitrāryaman |

10.126.02c yenā nir aṁhaso yūyam pātha nethā ca martyam ati dviṣaḥ ||

10.126.03a ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।

10.126.03c नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ॥

10.126.03a te nūnaṁ no 'yam ūtaye varuṇo mitro aryamā |

10.126.03c nayiṣṭhā u no neṣaṇi parṣiṣṭhā u naḥ parṣaṇy ati dviṣaḥ ||

10.126.04a यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।

10.126.04c युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥

10.126.04a yūyaṁ viśvam pari pātha varuṇo mitro aryamā |

10.126.04c yuṣmākaṁ śarmaṇi priye syāma supraṇītayo 'ti dviṣaḥ ||

10.126.05a आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।

10.126.05c उग्रं मरुद्भी रुद्रं हुवेमेन्द्रमग्निं स्वस्तयेऽति द्विषः ॥

10.126.05a ādityāso ati sridho varuṇo mitro aryamā |

10.126.05c ugram marudbhī rudraṁ huvemendram agniṁ svastaye 'ti dviṣaḥ ||

10.126.06a नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा ।

10.126.06c अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥

10.126.06a netāra ū ṣu ṇas tiro varuṇo mitro aryamā |
10.126.06c ati viśvāni duritā rājānaś carṣaṇīnām ati dviṣaḥ ||

10.126.07a शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।

10.126.07c शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥

10.126.07a śunam asmabhyam ūtaye varuṇo mitro aryamā |
10.126.07c śarma yacchantu sapratha ādityāso yad īmahe ati dviṣaḥ ||

10.126.08a यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।

10.126.08c एवो ष्व१स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥

10.126.08a yathā ha tyad vasavo gauryaṁ cit padi ṣitām amuñcatā yajatrāḥ |
10.126.08c evo ṣv a1sman muñcatā vy aṁhaḥ pra tāry agne prataraṁ na āyuḥ ||

10.127.01a रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।

10.127.01c विश्वा अधि श्रियोऽधित ॥

10.127.01a rātrī vy akhyad āyatī purutrā devy a1kṣabhiḥ |
10.127.01c viśvā adhi śriyo 'dhita ||

10.127.02a ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।

10.127.02c ज्योतिषा बाधते तमः ॥

10.127.02a orv aprā amartyā nivato devy u1dvataḥ |
10.127.02c jyotiṣā bādhate tamaḥ ||

10.127.03a निरु स्वसारमस्कृतोषसं देव्यायती ।

10.127.03c अपेदु हासते तमः ॥

10.127.03a nir u svasāram askṛtoṣasaṁ devy āyatī |
10.127.03c aped u hāsate tamaḥ ||

10.127.04a सा नो अद्य यस्या वयं नि ते यामन्नविद्महि ।

10.127.04c वृक्षे न वसतिं वयः ॥

10.127.04a sā no adya yasyā vayaṁ ni te yāmann avikṣmahi |
10.127.04c vṛkṣe na vasatiṁ vayaḥ ||

10.127.05a नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।

10.127.05c नि श्येनासश्चिदर्थिनः ॥

10.127.05a ni grāmāso avikṣata ni padvanto ni pakṣiṇaḥ |
10.127.05c ni śyenāsaś cid arthinaḥ ||

10.127.06a यावया वृक्यं१ वृकं यवय स्तेनमूर्म्ये ।

10.127.06c अथा नः सुतरा भव ॥

10.127.06a yāvayā vṛkyaṁ1 vṛkaṁ yavaya stenam ūrmye |
10.127.06c athā naḥ sutarā bhava ||

10.127.07a उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ।

10.127.07c उष ऋणेव यातय ॥

10.127.07a upa mā pepiśat tamaḥ kṛṣṇaṁ vyaktam asthita |
10.127.07c uṣa ṛṇeva yātaya ||

10.127.08a उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ।

10.127.08c रात्रि स्तोमं न जिग्युषे ॥

10.127.08a upa te gā ivākaraṁ vṛṇīṣva duhitar divaḥ |
10.127.08c rātri stomaṁ na jigyuṣe ||

10.128.01a ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।

10.128.01c मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥

10.128.01a mamāgne varco vihaveṣv astu vayaṁ tvendhānās tanvam puṣema |
10.128.01c mahyaṁ namantām pradiśaś catasras tvayādhyakṣeṇa pṛtanā jayema ||

10.128.02a मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।

10.128.02c ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥

10.128.02a mama devā vihave santu sarva indravanto maruto viṣṇur agniḥ |
10.128.02c mamāntarikṣam urulokam astu mahyaṁ vātaḥ pavatāṁ kāme asmin ||

10.128.03a मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः ।

10.128.03c दैव्या होतारो वनुषन्त पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः ॥

10.128.03a mayi devā draviṇam ā yajantām mayy āśīr astu mayi devahūtiḥ |
10.128.03c daivyā hotāro vanuṣanta pūrve 'riṣṭāḥ syāma tanvā suvīrāḥ ||

10.128.04a मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।

10.128.04c एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ॥

10.128.04a mahyaṁ yajantu mama yāni havyākūtiḥ satyā manaso me astu |
10.128.04c eno mā ni gāṁ katamac canāhaṁ viśve devāso adhi vocatā naḥ ||

10.128.05a देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।

10.128.05c मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥

10.128.05a devīḥ ṣaḷ urvīr uru naḥ kṛṇota viśve devāsa iha vīrayadhvam |
10.128.05c mā hāsmahi prajayā mā tanūbhir mā radhāma dviṣate soma rājan ||

10.128.06a अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वम् ।

10.128.06c प्रत्यञ्चो यन्तु निगुतः पुनस्ते३ऽमैषां चित्तं प्रबुधां वि नेशत् ॥

10.128.06a agne manyum pratinudan pareṣām adabdho gopāḥ pari pāhi nas tvam |
10.128.06c pratyañco yantu nigutaḥ punas te3 'maiṣāṁ cittam prabudhāṁ vi neśat ||

10.128.07a धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।

10.128.07c इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ॥

10.128.07a dhātā dhātṝṇām bhuvanasya yas patir devaṁ trātāram abhimātiṣāham |
10.128.07c imaṁ yajñam aśvinobhā bṛhaspatir devāḥ pāntu yajamānaṁ nyarthāt ||

10.128.08a उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ।

10.128.08c स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ॥

10.128.08a uruvyacā no mahiṣaḥ śarma yaṁsad asmin have puruhūtaḥ purukṣuḥ |
10.128.08c sa naḥ prajāyai haryaśva mṛḷayendra mā no rīriṣo mā parā dāḥ ||

10.128.09a ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।

10.128.09c वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥

10.128.09a ye naḥ sapatnā apa te bhavantv indrāgnibhyām ava bādhāmahe tān |
10.128.09c vasavo rudrā ādityā uparispṛśam mograṁ cettāram adhirājam akran ||

10.129.01a नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।

10.129.01c किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥

10.129.01a nāsad āsīn no sad āsīt tadānīṁ nāsīd rajo no vyomā paro yat |
10.129.01c kim āvarīvaḥ kuha kasya śarmann ambhaḥ kim āsīd gahanaṁ gabhīram ||

10.129.02a न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।

10.129.02c आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥

10.129.02a na mṛtyur āsīd amṛtaṁ na tarhi na rātryā ahna āsīt praketaḥ |
10.129.02c ānīd avātaṁ svadhayā tad ekaṁ tasmād dhānyan na paraḥ kiṁ canāsa ||

10.129.03a तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।

10.129.03c तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥

10.129.03a tama āsīt tamasā gūḷham agre 'praketaṁ salilaṁ sarvam ā idam |
10.129.03c tucchyenābhv apihitaṁ yad āsīt tapasas tan mahinājāyataikam ||

10.129.04a कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।

10.129.04c सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ॥

10.129.04a kāmas tad agre sam avartatādhi manaso retaḥ prathamaṁ yad āsīt |
10.129.04c sato bandhum asati nir avindan hṛdi pratīṣyā kavayo manīṣā ||

10.129.05a तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।

10.129.05c रेतोधा आसन्महिमान आसन्स्वधा अवस्तात्प्रयतिः परस्तात् ॥

10.129.05a tiraścīno vitato raśmir eṣām adhaḥ svid āsī3d upari svid āsī3t |
10.129.05c retodhā āsan mahimāna āsan svadhā avastāt prayatiḥ parastāt ||

10.129.06a को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।

10.129.06c अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥

10.129.06a ko addhā veda ka iha pra vocat kuta ājātā kuta iyaṁ visṛṣṭiḥ |
10.129.06c arvāg devā asya visarjanenāthā ko veda yata ābabhūva ||

10.129.07a इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।

10.129.07c यो अस्याध्यक्षः परमे व्योमन्सो अङ्ग वेद यदि वा न वेद ॥

10.129.07a iyaṁ visṛṣṭir yata ābabhūva yadi vā dadhe yadi vā na |
10.129.07c yo asyādhyakṣaḥ parame vyoman so aṅga veda yadi vā na veda ||

10.130.01a यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः ।

10.130.01c इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते तते ॥

10.130.01a yo yajño viśvatas tantubhis tata ekaśataṁ devakarmebhir āyataḥ |
10.130.01c ime vayanti pitaro ya āyayuḥ pra vayāpa vayety āsate tate ||

10.130.02a पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन् ।

10.130.02c इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥

10.130.02a pumāṁ enaṁ tanuta ut kṛṇatti pumān vi tatne adhi nāke asmin |
10.130.02c ime mayūkhā upa sedur ū sadaḥ sāmāni cakrus tasarāṇy otave ||

10.130.03a कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत् ।

10.130.03c छन्दः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥

10.130.03a kāsīt pramā pratimā kiṁ nidānam ājyaṁ kim āsīt paridhiḥ ka āsīt |
10.130.03c chandaḥ kim āsīt praügaṁ kim ukthaṁ yad devā devam ayajanta viśve ||

10.130.04a अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव ।

10.130.04c अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥

10.130.04a agner gāyatry abhavat sayugvoṣṇihayā savitā sam babhūva |
10.130.04c anuṣṭubhā soma ukthair mahasvān bṛhaspater bṛhatī vācam āvat ||

10.130.05a विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः ।

10.130.05c विश्वान्देवाञ्जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥

10.130.05a virāṇ mitrāvaruṇayor abhiśrīr indrasya triṣṭub iha bhāgo ahnaḥ |
10.130.05c viśvān devāñ jagaty ā viveśa tena cākḷpra ṛṣayo manuṣyāḥ ||

10.130.06a चाक्लृप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ।

10.130.06c पश्यन्मन्ये मनसा चक्षसा तान्य इमं यज्ञमयजन्त पूर्वे ॥

10.130.06a cākḷpre tena ṛṣayo manuṣyā yajñe jāte pitaro naḥ purāṇe |
10.130.06c paśyan manye manasā cakṣasā tān ya imaṁ yajñam ayajanta pūrve ||

10.130.07a सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।

10.130.07c पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो३ न रश्मीन् ॥

10.130.07a sahastomāḥ sahachandasa āvṛtaḥ sahapramā ṛṣayaḥ sapta daivyāḥ |
10.130.07c pūrveṣām panthām anudṛśya dhīrā anvālebhire rathyo3 na raśmīn ||

10.131.01a अप प्राच इन्द्र विश्वाँ अमित्रानपापाचो अभिभूते नुदस्व ।

10.131.01c अपोदीचो अप शूराधराच उरौ यथा तव शर्मन्मदेम ॥

10.131.01a apa prāca indra viśvāṁ̐ amitrān apāpāco abhibhūte nudasva |
10.131.01c apodīco apa śūrādharāca urau yathā tava śarman madema ||

10.131.02a कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।

10.131.02c इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥

10.131.02a kuvid aṅga yavamanto yavaṁ cid yathā dānty anupūrvaṁ viyūya |
10.131.02c ihehaiṣāṁ kṛṇuhi bhojanāni ye barhiṣo namovṛktiṁ na jagmuḥ ||

10.131.03a नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।

10.131.03c गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ॥

10.131.03a nahi sthūry ṛtuthā yātam asti nota śravo vivide saṅgameṣu |
10.131.03c gavyanta indraṁ sakhyāya viprā aśvāyanto vṛṣaṇaṁ vājayantaḥ ||

10.131.04a युवं सुराममश्विना नमुचावासुरे सचा ।

10.131.04c विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥

10.131.04a yuvaṁ surāmam aśvinā namucāv āsure sacā |
10.131.04c vipipānā śubhas patī indraṁ karmasv āvatam ||

10.131.05a पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।

10.131.05c यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥

10.131.05a putram iva pitarāv aśvinobhendrāvathuḥ kāvyair daṁsanābhiḥ |
10.131.05c yat surāmaṁ vy apibaḥ śacībhiḥ sarasvatī tvā maghavann abhiṣṇak ||

10.131.06a इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।

10.131.06c बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥

10.131.06a indraḥ sutrāmā svavām̐ avobhiḥ sumṛḷīko bhavatu viśvavedāḥ |
10.131.06c bādhatāṁ dveṣo abhayaṁ kṛṇotu suvīryasya patayaḥ syāma ||

10.131.07a तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।

10.131.07c स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥

10.131.07a tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma |
10.131.07c sa sutrāmā svavām̐ indro asme ārāc cid dveṣaḥ sanutar yuyotu ||

10.132.01a ईजानमिद्द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूषणि ।

10.132.01c ईजानं देवावश्विनावभि सुम्नैरवर्धताम् ॥

10.132.01a ījānam id dyaur gūrtāvasur ījānam bhūmir abhi prabhūṣaṇi |
10.132.01c ījānaṁ devāv aśvināv abhi sumnair avardhatām ||

10.132.02a ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि ।

10.132.02c युवोः क्राणाय सख्यैरभि ष्याम रक्षसः ॥

10.132.02a tā vām mitrāvaruṇā dhārayatkṣitī suṣumneṣitatvatā yajāmasi |
10.132.02c yuvoḥ krāṇāya sakhyair abhi ṣyāma rakṣasaḥ ||

10.132.03a अधा चिन्नु यद्दिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः ।

10.132.03c दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि ॥

10.132.03a adhā cin nu yad didhiṣāmahe vām abhi priyaṁ rekṇaḥ patyamānāḥ |
10.132.03c dadvām̐ vā yat puṣyati rekṇaḥ sam v āran nakir asya maghāni ||

10.132.04a असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा ।

10.132.04c मूर्धा रथस्य चाकन्नैतावतैनसान्तकध्रुक् ॥

10.132.04a asāv anyo asura sūyata dyaus tvaṁ viśveṣāṁ varuṇāsi rājā |
10.132.04c mūrdhā rathasya cākan naitāvatainasāntakadhruk ||

10.132.05a अस्मिन्स्वे३तच्छकपूत एनो हिते मित्रे निगतान्हन्ति वीरान् ।

10.132.05c अवोर्वा यद्धात्तनूष्ववः प्रियासु यज्ञियास्वर्वा ॥

10.132.05a asmin sv e3tac chakapūta eno hite mitre nigatān hanti vīrān |
10.132.05c avor vā yad dhāt tanūṣv avaḥ priyāsu yajñiyāsv arvā ||

10.132.06a युवोर्हि मातादितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि ।

10.132.06c अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ॥

10.132.06a yuvor hi mātāditir vicetasā dyaur na bhūmiḥ payasā pupūtani |
10.132.06c ava priyā didiṣṭana sūro ninikta raśmibhiḥ ||

10.132.07a युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम् ।

10.132.07c ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः ॥

10.132.07a yuvaṁ hy apnarājāv asīdataṁ tiṣṭhad rathaṁ na dhūrṣadaṁ vanarṣadam |
10.132.07c tā naḥ kaṇūkayantīr nṛmedhas tatre aṁhasaḥ sumedhas tatre aṁhasaḥ ||

10.133.01a प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।

10.133.01c अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि
धन्वसु ॥

10.133.01a pro ṣv asmai purorathaṁ indrāya śūṣam arcata |
10.133.01c abhīke cid u lokakṛt saṅge samatsu vṛtrahāsmākam bodhi coditā nabhantām anyakeṣāṁ
jyākā adhi dhanvasu ||

10.133.02a त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।

10.133.02c अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि
धन्वसु ॥

10.133.02a tvaṁ sindhūm̐r avāsṛjo 'dharāco ahann ahim |

10.133.02c aśatrur indra jajñiṣe viśvam puṣyasi vāryaṁ taṁ tvā pari ṣvajāmahe nabhantām anyakeṣāṁ jyākā adhi dhanvasu ||

10.133.03a वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः ।

10.133.03c अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥

10.133.03a vi ṣu viśvā arātayo 'ryo naśanta no dhiyaḥ |
10.133.03c astāsi śatrave vadhaṁ yo na indra jighāṁsati yā te rātir dadir vasu nabhantām anyakeṣāṁ jyākā adhi dhanvasu ||

10.133.04a यो न इन्द्राभितो जनो वृकायुरादिदेशति ।

10.133.04c अधस्पदं तमीं कृधि विबाधो असि सासहिर्नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥

10.133.04a yo na indrābhito jano vṛkāyur ādideśati |
10.133.04c adhaspadaṁ tam īṁ kṛdhi vibādho asi sāsahir nabhantām anyakeṣāṁ jyākā adhi dhanvasu ||

10.133.05a यो न इन्द्राभिदासति सनाभिर्यश्च निष्ट्यः ।

10.133.05c अव तस्य बलं तिर महीव द्यौरध त्मना नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥

10.133.05a yo na indrābhidāsati sanābhir yaś ca niṣṭyaḥ |
10.133.05c ava tasya balaṁ tira mahīva dyaur adha tmanā nabhantām anyakeṣāṁ jyākā adhi dhanvasu ||

10.133.06a वयमिन्द्र त्वायवः सखित्वमा रभामहे ।

10.133.06c ऋतस्य नः पथा नयाति विश्वानि दुरिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥

10.133.06a vayam indra tvāyavaḥ sakhitvam ā rabhāmahe |
10.133.06c ṛtasya naḥ pathā nayāti viśvāni duritā nabhantām anyakeṣāṁ jyākā adhi dhanvasu ||

10.133.07a अस्मभ्यं सु त्वमिन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे ।

10.133.07c अच्छिद्रोध्नी पीपयद्यथा नः सहस्रधारा पयसा मही गौः ॥

10.133.07a asmabhyaṁ su tvam indra tāṁ śikṣa yā dohate prati varaṁ jaritre |
10.133.07c acchidrodhnī pīpayad yathā naḥ sahasradhārā payasā mahī gauḥ ||

10.134.01a उभे यदिन्द्र रोदसी आपप्राथोषा इव ।

10.134.01c महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.01a ubhe yad indra rodasī āpaprāthoṣā iva |
10.134.01c mahāntaṁ tvā mahīnāṁ samrājaṁ carṣaṇīnāṁ devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.02a अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।

10.134.02c अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.02a ava sma durhaṇāyato martasya tanuhi sthiram |
10.134.02c adhaspadaṁ tam īṁ kṛdhi yo asmām̐ ādideśati devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.03a अव त्या बृहतीरिषो विश्वश्चन्द्रा अमित्रहन् ।

10.134.03c शचीभिः शक्र धूनुहीन्द्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.03a ava tyā bṛhatīr iṣo viśvaścandrā amitrahan |
10.134.03c śacībhiḥ śakra dhūnuhīndra viśvābhir ūtibhir devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.04a अव यत्त्वं शतक्रतविन्द्र विश्वानि धूनुषे ।

10.134.04c रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.04a ava yat tvaṁ śatakratav indra viśvāni dhūnuṣe |
10.134.04c rayiṁ na sunvate sacā sahasriṇībhir ūtibhir devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.05a अव स्वेदा इवाभितो विष्वक्पतन्तु दिद्यवः ।

10.134.05c दूर्वाया इव तन्तवो व्य१स्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.05a ava svedā ivābhito viṣvak patantu didyavaḥ |
10.134.05c dūrvāyā iva tantavo vy a1smad etu durmatir devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.06a दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।

10.134.06c पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

10.134.06a dīrghaṁ hy aṅkuśaṁ yathā śaktim bibharṣi mantumaḥ |

10.134.06c pūrveṇa maghavan padājo vayāṁ yathā yamo devī janitry ajījanad bhadrā janitry ajījanat ||

10.134.07a नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि ।

10.134.07c पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥

10.134.07a nakir devā minīmasi nakir ā yopayāmasi mantraśrutyaṁ carāmasi |
10.134.07c pakṣebhir apikakṣebhir atrābhi saṁ rabhāmahe ||

10.135.01a यस्मिन्वृक्षे सुपलाशे देवैः सम्पिबते यमः ।

10.135.01c अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥

10.135.01a yasmin vṛkṣe supalāśe devaiḥ sampibate yamaḥ |
10.135.01c atrā no viśpatiḥ pitā purāṇām̐ anu venati ||

10.135.02a पुराणाँ अनुवेनन्तं चरन्तं पापयामुया ।

10.135.02c असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ॥

10.135.02a purāṇām̐ anuvenantaṁ carantam pāpayāmuyā |
10.135.02c asūyann abhy acākaśaṁ tasmā aspṛhayam punaḥ ||

10.135.03a यं कुमार नवं रथमचक्रं मनसाकृणोः ।

10.135.03c एकेषं विश्वतः प्राञ्चमपश्यन्नधि तिष्ठसि ॥

10.135.03a yaṁ kumāra navaṁ ratham acakram manasākṛṇoḥ |
10.135.03c ekeṣaṁ viśvataḥ prāñcam apaśyann adhi tiṣṭhasi ||

10.135.04a यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि ।

10.135.04c तं सामानु प्रावर्तत समितो नाव्याहितम् ॥

10.135.04a yaṁ kumāra prāvartayo rathaṁ viprebhyas pari |
10.135.04c taṁ sāmānu prāvartata sam ito nāvy āhitam ||

10.135.05a कः कुमारमजनयद्रथं को निरवर्तयत् ।

10.135.05c कः स्वित्तदद्य नो ब्रूयादनुदेयी यथाभवत् ॥

10.135.05a kaḥ kumāram ajanayad rathaṁ ko nir avartayat |
10.135.05c kaḥ svit tad adya no brūyād anudeyī yathābhavat ||

10.135.06a यथाभवदनुदेयी ततो अग्रमजायत ।

10.135.06c पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतम् ॥

10.135.06a yathābhavad anudeyī tato agram ajāyata |
10.135.06c purastād budhna ātataḥ paścān nirayaṇaṁ kṛtam ||

10.135.07a इदं यमस्य सादनं देवमानं यदुच्यते ।

10.135.07c इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः ॥

10.135.07a idaṁ yamasya sādanaṁ devamānaṁ yad ucyate |
10.135.07c iyam asya dhamyate nāḷīr ayaṁ gīrbhiḥ pariṣkṛtaḥ ||

10.136.01a केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी ।

10.136.01c केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥

10.136.01a keśy a1gniṁ keśī viṣaṁ keśī bibharti rodasī |
10.136.01c keśī viśvaṁ svar dṛśe keśīdaṁ jyotir ucyate ||

10.136.02a मुनयो वातरशनाः पिशङ्गा वसते मला ।

10.136.02c वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥

10.136.02a munayo vātaraśanāḥ piśaṅgā vasate malā |
10.136.02c vātasyānu dhrājiṁ yanti yad devāso avikṣata ||

10.136.03a उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम् ।

10.136.03c शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥

10.136.03a unmaditā mauneyena vātām̐ ā tasthimā vayam |
10.136.03c śarīred asmākaṁ yūyam martāso abhi paśyatha ||

10.136.04a अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।

10.136.04c मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥

10.136.04a antarikṣeṇa patati viśvā rūpāvacākaśat |
10.136.04c munir devasya-devasya saukṛtyāya sakhā hitaḥ ||

10.136.05a वातस्याश्वो वायोः सखाथो देवेषितो मुनिः ।

10.136.05c उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ॥

10.136.05a vātasyāśvo vāyoḥ sakhātho deveṣito muniḥ |
10.136.05c ubhau samudrāv ā kṣeti yaś ca pūrva utāparaḥ ||

10.136.06a अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन् ।

10.136.06c केशी केतस्य विद्वान्सखा स्वादुर्मदिन्तमः ॥

10.136.06a apsarasāṁ gandharvāṇām mṛgāṇāṁ caraṇe caran |
10.136.06c keśī ketasya vidvān sakhā svādur madintamaḥ ||

10.136.07a वायुरस्मा उपामन्थत्पिनष्टि स्मा कुनन्नमा ।

10.136.07c केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह ॥

10.136.07a vāyur asmā upāmanthat pinaṣṭi smā kunannamā |
10.136.07c keśī viṣasya pātreṇa yad rudreṇāpibat saha ||

10.137.01a उत देवा अवहितं देवा उन्नयथा पुनः ।

10.137.01c उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥

10.137.01a uta devā avahitaṁ devā un nayathā punaḥ |
10.137.01c utāgaś cakruṣaṁ devā devā jīvayathā punaḥ ||

10.137.02a द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।

10.137.02c दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ॥

10.137.02a dvāv imau vātau vāta ā sindhor ā parāvataḥ |
10.137.02c dakṣaṁ te anya ā vātu parānyo vātu yad rapaḥ ||

10.137.03a आ वात वाहि भेषजं वि वात वाहि यद्रपः ।

10.137.03c त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥

10.137.03a ā vāta vāhi bheṣajaṁ vi vāta vāhi yad rapaḥ |
10.137.03c tvaṁ hi viśvabheṣajo devānāṁ dūta īyase ||

10.137.04a आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः ।

10.137.04c दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ॥

10.137.04a ā tvāgamaṁ śantātibhir atho ariṣṭatātibhiḥ |
10.137.04c dakṣaṁ te bhadram ābhārṣam parā yakṣmaṁ suvāmi te ||

10.137.05a त्रायन्तामिह देवास्त्रायतां मरुतां गणः ।

10.137.05c त्रायन्तां विश्वा भूतानि यथायमरपा असत् ॥

10.137.05a trāyantām iha devās trāyatām marutāṁ gaṇaḥ |
10.137.05c trāyantāṁ viśvā bhūtāni yathāyam arapā asat ||

10.137.06a आप इद्वा उ भेषजीरापो अमीवचातनीः ।

10.137.06c आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥

10.137.06a āpa id vā u bheṣajīr āpo amīvacātanīḥ |
10.137.06c āpaḥ sarvasya bheṣajīs tās te kṛṇvantu bheṣajam ||

10.137.07a हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।

10.137.07c अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥

10.137.07a hastābhyāṁ daśaśākhābhyāṁ jihvā vācaḥ purogavī |
10.137.07c anāmayitnubhyāṁ tvā tābhyāṁ tvopa spṛśāmasi ||

10.138.01a तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम् ।

10.138.01c यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः ॥

10.138.01a tava tya indra sakhyeṣu vahnaya ṛtam manvānā vy adardirur valam |
10.138.01c yatrā daśasyann uṣaso riṇann apaḥ kutsāya manmann ahyaś ca daṁsayaḥ ||

10.138.02a अवासृजः प्रस्वः श्वञ्चयो गिरीनुदाज उस्रा अपिबो मधु प्रियम् ।

10.138.02c अवर्धयो वनिनो अस्य दंससा शुशोच सूर्य ऋतजातया गिरा ॥

10.138.02a avāsṛjaḥ prasvaḥ śvañcayo girīn ud āja usrā apibo madhu priyam |
10.138.02c avardhayo vanino asya daṁsasā śuśoca sūrya ṛtajātayā girā ||

10.138.03a वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः ।

10.138.03c दृळ्हानि पिप्रोरसुरस्य मायिन इन्द्रो व्यास्यच्चकृवाँ ऋजिश्वना ॥

10.138.03a vi sūryo madhye amucad rathaṁ divo vidad dāsāya pratimānam āryaḥ |
10.138.03c dṛlhāni pipror asurasya māyina indro vy āsyac cakṛvām̐ ṛjiśvanā ||

10.138.04a अनाधृष्टानि धृषितो व्यास्यन्निधीँरदेवाँ अमृणदयास्यः ।

10.138.04c मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरशृणाद्विरुक्मता ॥

10.138.04a anādhṛṣṭāni dhṛṣito vy āsyan nidhīm̐r adevām̐ amṛṇad ayāsyaḥ |
10.138.04c māseva sūryo vasu puryam ā dade gṛṇānaḥ śatrūm̐r aśṛṇād virukmatā ||

10.138.05a अयुद्धसेनो विभ्वा विभिन्दता दाशद्वृत्रहा तुज्यानि तेजते ।

10.138.05c इन्द्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुषा अनः ॥

10.138.05a ayuddhaseno vibhvā vibhindatā dāśad vṛtrahā tujyāni tejate |
10.138.05c indrasya vajrād abibhed abhiśnathaḥ prākrāmac chundhyūr ajahād uṣā anaḥ ||

10.138.06a एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञम् ।

10.138.06c मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता ॥

10.138.06a etā tyā te śrutyāni kevalā yad eka ekam akṛṇor ayajñam |
10.138.06c māsāṁ vidhānam adadhā adhi dyavi tvayā vibhinnam bharati pradhim pitā ||

10.139.01a सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रम् ।

10.139.01c तस्य पूषा प्रसवे याति विद्वान्सम्पश्यन्विश्वा भुवनानि गोपाः ॥

10.139.01a sūryaraśmir harikeśaḥ purastāt savitā jyotir ud ayām̐ ajasram |
10.139.01c tasya pūṣā prasave yāti vidvān sampaśyan viśvā bhuvanāni gopāḥ ||

10.139.02a नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् ।

10.139.02c स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥

10.139.02a nṛcakṣā eṣa divo madhya āsta āpaprivān rodasī antarikṣam |
10.139.02c sa viśvācīr abhi caṣṭe ghṛtācīr antarā pūrvam aparaṁ ca ketum ||

10.139.03a रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।

10.139.03c देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम् ॥

10.139.03a rāyo budhnaḥ saṅgamano vasūnāṁ viśvā rūpābhi caṣṭe śacībhiḥ |
10.139.03c deva iva savitā satyadharmendro na tasthau samare dhanānām ||

10.139.04a विश्वावसुं सोम गन्धर्वमापो ददृशुषीस्तदृतेना व्यायन् ।

10.139.04c तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधीँरपश्यत् ॥

10.139.04a viśvāvasuṁ soma gandharvam āpo dadṛśuṣīs tad ṛtenā vy āyan |
10.139.04c tad anvavaid indro rārahāṇa āsām pari sūryasya paridhīm̐r apaśyat ||

10.139.05a विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः ।

10.139.05c यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥

10.139.05a viśvāvasur abhi tan no gṛṇātu divyo gandharvo rajaso vimānaḥ |
10.139.05c yad vā ghā satyam uta yan na vidma dhiyo hinvāno dhiya in no avyāḥ ||

10.139.06a सस्निमविन्दच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानाम् ।

10.139.06c प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम् ॥

10.139.06a sasnim avindac caraṇe nadīnām apāvṛṇod duro aśmavrajānām |
10.139.06c prāsāṁ gandharvo amṛtāni vocad indro dakṣam pari jānād ahīnām ||

10.140.01a अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।

10.140.01c बृहद्भानो शवसा वाजमुक्थ्यं१ दधासि दाशुषे कवे ॥

10.140.01a agne tava śravo vayo mahi bhrājante arcayo vibhāvaso |
10.140.01c bṛhadbhāno śavasā vājam ukthyaṁ1 dadhāsi dāśuṣe kave ||

10.140.02a पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।

10.140.02c पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥

10.140.02a pāvakavarcāḥ śukravarcā anūnavarcā ud iyarṣi bhānunā |
10.140.02c putro mātarā vicarann upāvasi pṛṇakṣi rodasī ubhe ||

10.140.03a ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।

10.140.03c त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥

10.140.03a ūrjo napāj jātavedaḥ suśastibhir mandasva dhītibhir hitaḥ |
10.140.03c tve iṣaḥ saṁ dadhur bhūrivarpasaś citrotayo vāmajātāḥ ||

10.140.04a इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।

10.140.04c स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ॥

10.140.04a irajyann agne prathayasva jantubhir asme rāyo amartya |
10.140.04c sa darśatasya vapuṣo vi rājasi pṛṇakṣi sānasiṁ kratum ||

10.140.05a इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।

10.140.05c रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ॥

10.140.05a iṣkartāram adhvarasya pracetasaṁ kṣayantaṁ rādhaso mahaḥ |
10.140.05c rātiṁ vāmasya subhagām mahīm iṣaṁ dadhāsi sānasiṁ rayim ||

10.140.06a ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ।

10.140.06c श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥

10.140.06a ṛtāvānam mahiṣaṁ viśvadarśatam agniṁ sumnāya dadhire puro janāḥ |
10.140.06c śrutkarṇaṁ saprathastamaṁ tvā girā daivyam mānuṣā yugā ||

10.141.01a अग्ने अच्छा वदेह नः प्रत्यङ्नः सुमना भव ।

10.141.01c प्र नो यच्छ विशस्पते धनदा असि नस्त्वम् ॥

10.141.01a agne acchā vadeha naḥ pratyaṅ naḥ sumanā bhava |
10.141.01c pra no yaccha viśas pate dhanadā asi nas tvam ||

10.141.02a प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः ।

10.141.02c प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ॥

10.141.02a pra no yacchatv aryamā pra bhagaḥ pra bṛhaspatiḥ |
10.141.02c pra devāḥ prota sūnṛtā rāyo devī dadātu naḥ ||

10.141.03a सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे ।

10.141.03c आदित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥

10.141.03a somaṁ rājānam avase 'gniṁ gīrbhir havāmahe |
10.141.03c ādityān viṣṇuṁ sūryam brahmāṇaṁ ca bṛhaspatim ||

10.141.04a इन्द्रवायू बृहस्पतिं सुहवेह हवामहे ।

10.141.04c यथा नः सर्व इज्जनः संगत्यां सुमना असत् ॥

10.141.04a indravāyū bṛhaspatiṁ suhaveha havāmahe |
10.141.04c yathā naḥ sarva ij janaḥ saṅgatyāṁ sumanā asat ||

10.141.05a अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।

10.141.05c वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥

10.141.05a aryamaṇam bṛhaspatim indraṁ dānāya codaya |
10.141.05c vātaṁ viṣṇuṁ sarasvatīṁ savitāraṁ ca vājinam ||

10.141.06a त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।

10.141.06c त्वं नो देवतातये रायो दानाय चोदय ॥

10.141.06a tvaṁ no agne agnibhir brahma yajñaṁ ca vardhaya |
10.141.06c tvaṁ no devatātaye rāyo dānāya codaya ||

10.142.01a अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्य१न्यदस्त्याप्यम् ।

10.142.01c भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि ॥

10.142.01a ayam agne jaritā tve abhūd api sahasaḥ sūno nahy a1nyad asty āpyam |
10.142.01c bhadraṁ hi śarma trivarūtham asti ta āre hiṁsānām apa didyum ā kṛdhi ||

10.142.02a प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्यृञ्जसे ।

10.142.02c प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपा इव त्मना ॥

10.142.02a pravat te agne janimā pitūyataḥ sācīva viśvā bhuvanā ny ṛñjase |
10.142.02c pra saptayaḥ pra saniṣanta no dhiyaḥ puraś caranti paśupā iva tmanā ||

10.142.03a उत वा उ परि वृणक्षि बप्सद्बहोरग्न उलपस्य स्वधावः ।

10.142.03c उत खिल्या उर्वराणां भवन्ति मा ते हेतिं तविषीं चुक्रुधाम ॥

10.142.03a uta vā u pari vṛṇakṣi bapsad bahor agna ulapasya svadhāvaḥ |
10.142.03c uta khilyā urvarāṇām bhavanti mā te hetiṁ taviṣīṁ cukrudhāma ||

10.142.04a यदुद्वतो निवतो यासि बप्सत्पृथगेषि प्रगर्धिनीव सेना ।

10.142.04c यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम ॥

10.142.04a yad udvato nivato yāsi bapsat pṛthag eṣi pragardhinīva senā |
10.142.04c yadā te vāto anuvāti śocir vapteva śmaśru vapasi pra bhūma ||

10.142.05a प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः ।

10.142.05c बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम् ॥

10.142.05a praty asya śreṇayo dadṛśra ekaṁ niyānam bahavo rathāsaḥ |
10.142.05c bāhū yad agne anumarmṛjāno nyaṅṅ uttānām anveṣi bhūmim ||

10.142.06a उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः ।

10.142.06c उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु ॥

10.142.06a ut te śuṣmā jihatām ut te arcir ut te agne śaśamānasya vājāḥ |
10.142.06c uc chvañcasva ni nama vardhamāna ā tvādya viśve vasavaḥ sadantu ||

10.142.07a अपामिदं न्ययनं समुद्रस्य निवेशनम् ।

10.142.07c अन्यं कृणुष्वेतः पन्थां तेन याहि वशाँ अनु ॥

10.142.07a apām idaṁ nyayanaṁ samudrasya niveśanam |
10.142.07c anyaṁ kṛṇuṣvetaḥ panthāṁ tena yāhi vaśām̐ anu ||

10.142.08a आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।

10.142.08c ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥

10.142.08a āyane te parāyaṇe dūrvā rohantu puṣpiṇīḥ |
10.142.08c hradāś ca puṇḍarīkāṇi samudrasya gṛhā ime ||

10.143.01a त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे ।

10.143.01c कक्षीवन्तं यदी पुना रथं न कृणुथो नवम् ॥

10.143.01a tyaṁ cid atrim ṛtajuram artham aśvaṁ na yātave |
10.143.01c kakṣīvantaṁ yadī punā rathaṁ na kṛṇutho navam ||

10.143.02a त्यं चिदश्वं न वाजिनमरेणवो यमत्नत ।

10.143.02c दृळ्हं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः ॥

10.143.02a tyaṁ cid aśvaṁ na vājinam areṇavo yam atnata |
10.143.02c dṛḷhaṁ granthiṁ na vi ṣyatam atriṁ yaviṣṭham ā rajaḥ ||

10.143.03a नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः ।

10.143.03c अथा हि वां दिवो नरा पुन स्तोमो न विशसे ॥

10.143.03a narā daṁsiṣṭhāv atraye śubhrā siṣāsataṁ dhiyaḥ |

10.143.03c athā hi vāṁ divo narā puna stomo na viśase ||

10.143.04a चिते तद्वां सुराधसा रातिः सुमतिरश्विना ।

10.143.04c आ यन्नः सदने पृथौ समने पर्षथो नरा ॥

10.143.04a cite tad vāṁ surādhasā rātiḥ sumatir aśvinā |

10.143.04c ā yan naḥ sadane pṛthau samane parṣatho narā ||

10.143.05a युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम् ।

10.143.05c यातमच्छा पतत्रिभिर्नासत्या सातये कृतम् ॥

10.143.05a yuvam bhujyuṁ samudra ā rajasaḥ pāra īṅkhitam |

10.143.05c yātam acchā patatribhir nāsatyā sātaye kṛtam ||

10.143.06a आ वां सुम्नैः शंयू इव मंहिष्ठा विश्ववेदसा ।

10.143.06c समस्मे भूषतं नरोत्सं न पिप्युषीरिषः ॥

10.143.06a ā vāṁ sumnaiḥ śaṁyū iva maṁhiṣṭhā viśvavedasā |

10.143.06c sam asme bhūṣataṁ narotsaṁ na pipyuṣīr iṣaḥ ||

10.144.01a अयं हि ते अमर्त्य इन्दुरत्यो न पत्यते ।

10.144.01c दक्षो विश्वायुर्वेधसे ॥

10.144.01a ayaṁ hi te amartya indur atyo na patyate |

10.144.01c dakṣo viśvāyur vedhase ||

10.144.02a अयमस्मासु काव्य ऋभुर्वज्रो दास्वते ।

10.144.02c अयं बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदम् ॥

10.144.02a ayam asmāsu kāvya ṛbhur vajro dāsvate |

10.144.02c ayam bibharty ūrdhvakṛśanam madam ṛbhur na kṛtvyam madam ||

10.144.03a घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः ।

10.144.03c अव दीधेदहीशुवः ॥

10.144.03a ghṛṣuḥ śyenāya kṛtvana āsu svāsu vaṁsagaḥ |

10.144.03c ava dīdhed ahīśuvaḥ ||

10.144.04a यं सुपर्णः परावतः श्येनस्य पुत्र आभरत् ।

10.144.04c शतचक्रं यो३ऽह्यो वर्तनिः ॥

10.144.04a yaṁ suparṇaḥ parāvataḥ śyenasya putra ābharat |
10.144.04c śatacakraṁ yo3 'hyo vartaniḥ ||

10.144.05a यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमन्धसः ।

10.144.05c एना वयो वि तार्यायुर्जीवस एना जागार बन्धुता ॥

10.144.05a yaṁ te śyenaś cārum avṛkam padābharad aruṇam mānam andhasaḥ |
10.144.05c enā vayo vi tāry āyur jīvasa enā jāgāra bandhutā ||

10.144.06a एवा तदिन्द्र इन्दुना देवेषु चिद्धारयाते महि त्यजः ।

10.144.06c क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः ॥

10.144.06a evā tad indra indunā deveṣu cid dhārayāte mahi tyajaḥ |
10.144.06c kratvā vayo vi tāry āyuḥ sukrato kratvāyam asmad ā sutaḥ ||

10.145.01a इमां खनाम्योषधिं वीरुधं बलवत्तमाम् ।

10.145.01c यया सपत्नीं बाधते यया संविन्दते पतिम् ॥

10.145.01a imāṁ khanāmy oṣadhiṁ vīrudham balavattamām |
10.145.01c yayā sapatnīm bādhate yayā saṁvindate patim ||

10.145.02a उत्तानपर्णे सुभगे देवजूते सहस्वति ।

10.145.02c सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥

10.145.02a uttānaparṇe subhage devajūte sahasvati |
10.145.02c sapatnīm me parā dhama patim me kevalaṁ kuru ||

10.145.03a उत्तराहमुत्तर उत्तरेदुत्तराभ्यः ।

10.145.03c अथा सपत्नी या ममाधरा साधराभ्यः ॥

10.145.03a uttarāham uttara uttared uttarābhyaḥ |
10.145.03c athā sapatnī yā mamādharā sādharābhyaḥ ||

10.145.04a नह्यस्या नाम गृभ्णामि नो अस्मिन्रमते जने ।

10.145.04c परामेव परावतं सपत्नीं गमयामसि ॥

10.145.04a nahy asyā nāma gṛbhṇāmi no asmin ramate jane |

10.145.04c parām eva parāvataṁ sapatnīṁ gamayāmasi ||

10.145.05a अहमस्मि सहमानाथ त्वमसि सासहिः ।

10.145.05c उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥

10.145.05a aham asmi sahamānātha tvam asi sāsahiḥ |

10.145.05c ubhe sahasvatī bhūtvī sapatnīm me sahāvahai ||

10.145.06a उप तेऽधां सहमानामभि त्वाधां सहीयसा ।

10.145.06c मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥

10.145.06a upa te 'dhāṁ sahamānām abhi tvādhāṁ sahīyasā |

10.145.06c mām anu pra te mano vatsaṁ gaur iva dhāvatu pathā vār iva dhāvatu ||

10.146.01a अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि ।

10.146.01c कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दती३ँ ॥

10.146.01a araṇyāny araṇyāny asau yā preva naśyasi |

10.146.01c kathā grāmaṁ na pṛcchasi na tvā bhīr iva vindatī3m̐ ||

10.146.02a वृषारवाय वदते यदुपावति चिच्चिकः ।

10.146.02c आघाटिभिरिव धावयन्नरण्यानिर्महीयते ॥

10.146.02a vṛṣāravāya vadate yad upāvati ciccikaḥ |

10.146.02c āghāṭibhir iva dhāvayann araṇyānir mahīyate ||

10.146.03a उत गाव इवादन्त्युत वेश्मेव दृश्यते ।

10.146.03c उतो अरण्यानिः सायं शकटीरिव सर्जति ॥

10.146.03a uta gāva ivādanty uta veśmeva dṛśyate |

10.146.03c uto araṇyāniḥ sāyaṁ śakaṭīr iva sarjati ||

10.146.04a गामङ्गैष आ ह्वयति दार्वङ्गैषो अपावधीत् ।

10.146.04c वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ॥

10.146.04a gām aṅgaiṣa ā hvayati dārv aṅgaiṣo apāvadhīt |
10.146.04c vasann araṇyānyāṁ sāyam akrukṣad iti manyate ||

10.146.05a न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति ।

10.146.05c स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते ॥

10.146.05a na vā araṇyānir hanty anyaś cen nābhigacchati |
10.146.05c svādoḥ phalasya jagdhvāya yathākāmaṁ ni padyate ||

10.146.06a आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम् ।

10.146.06c प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ॥

10.146.06a āñjanagandhiṁ surabhiṁ bahvannām akṛṣīvalām |
10.146.06c prāham mṛgāṇām mātaram araṇyānim aśaṁsiṣam ||

10.147.01a श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवेरपः ।

10.147.01c उभे यत्त्वा भवतो रोदसी अनु रेजते शुष्मात्पृथिवी चिदद्रिवः ॥

10.147.01a śrat te dadhāmi prathamāya manyave 'han yad vṛtraṁ naryaṁ viver apaḥ |
10.147.01c ubhe yat tvā bhavato rodasī anu rejate śuṣmāt pṛthivī cid adrivaḥ ||

10.147.02a त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः ।

10.147.02c त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु ॥

10.147.02a tvam māyābhir anavadya māyinaṁ śravasyatā manasā vṛtram ardayaḥ |
10.147.02c tvām in naro vṛṇate gaviṣṭiṣu tvāṁ viśvāsu havyāsv iṣṭiṣu ||

10.147.03a ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघम् ।

10.147.03c अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनमह्रये धने ॥

10.147.03a aiṣu cākandhi puruhūta sūriṣu vṛdhāso ye maghavann ānaśur magham |
10.147.03c arcanti toke tanaye pariṣṭiṣu medhasātā vājinam ahraye dhane ||

10.147.04a स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति ।

10.147.04c त्वावृधो मघवन्दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः ॥

10.147.04a sa in nu rāyaḥ subhṛtasya cākanan madaṁ yo asya raṁhyaṁ ciketati |
10.147.04c tvāvṛdho maghavan dāśvadhvaro makṣū sa vājam bharate dhanā nṛbhiḥ ||

10.147.05a त्वं शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः ।

10.147.05c त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥

10.147.05a tvaṁ śardhāya mahinā gṛṇāna uru kṛdhi maghavañ chagdhi rāyaḥ |
10.147.05c tvaṁ no mitro varuṇo na māyī pitvo na dasma dayase vibhaktā ||

10.148.01a सुष्वाणास इन्द्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजम् ।

10.148.01c आ नो भर सुवितं यस्य चाकन्त्मना तना सनुयाम त्वोताः ॥

10.148.01a suṣvāṇāsa indra stumasi tvā sasavāṁsaś ca tuvinṛmṇa vājam |
10.148.01c ā no bhara suvitaṁ yasya cākan tmanā tanā sanuyāma tvotāḥ ||

10.148.02a ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः ।

10.148.02c गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमम् ॥

10.148.02a ṛṣvas tvam indra śūra jāto dāsīr viśaḥ sūryeṇa sahyāḥ |
10.148.02c guhā hitaṁ guhyaṁ gūḻham apsu bibhṛmasi prasravaṇe na somam ||

10.148.03a अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः ।

10.148.03c ते स्याम ये रणयन्त सोमैरेनोत तुभ्यं रथोळ्ह भक्षैः ॥

10.148.03a aryo vā giro abhy arca vidvān ṛṣīṇāṁ vipraḥ sumatiṁ cakānaḥ |
10.148.03c te syāma ye raṇayanta somair enota tubhyaṁ rathoḻha bhakṣaiḥ ||

10.148.04a इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।

10.148.04c तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥

10.148.04a imā brahmendra tubhyaṁ śaṁsi dā nṛbhyo nṛṇāṁ śūra śavaḥ |
10.148.04c tebhir bhava sakratur yeṣu cākann uta trāyasva gṛṇata uta stīn ||

10.148.05a श्रुधी हवमिन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।

10.148.05c आ यस्ते योनिं घृतवन्तमस्वारूर्मिर्न निम्नैर्द्रवयन्त वक्वाः ॥

10.148.05a śrudhī havam indra śūra pṛthyā uta stavase venyasyārkaiḥ |
10.148.05c ā yas te yoniṁ ghṛtavantam asvār ūrmir na nimnair dravayanta vakvāḥ ||

10.149.01a सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् ।

10.149.01c अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम् ॥

10.149.01a savitā yantraiḥ pṛthivīm aramṇād askambhane savitā dyām adṛṁhat |
10.149.01c aśvam ivādhukṣad dhunim antarikṣam atūrte baddhaṁ savitā samudram ||

10.149.02a यत्रा समुद्र स्कभितो व्यौनदपां नपात्सविता तस्य वेद ।

10.149.02c अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेताम् ॥

10.149.02a yatrā samudra skabhito vy aunad apāṁ napāt savitā tasya veda |
10.149.02c ato bhūr ata ā utthitaṁ rajo 'to dyāvāpṛthivī aprathetām ||

10.149.03a पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना ।

10.149.03c सुपर्णो अङ्ग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्म ॥

10.149.03a paścedam anyad abhavad yajatram amartyasya bhuvanasya bhūnā |
10.149.03c suparṇo aṅga savitur garutmān pūrvo jātaḥ sa u asyānu dharma ||

10.149.04a गाव इव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना ।

10.149.04c पतिरिव जायामभि नो न्येतु धर्ता दिवः सविता विश्ववारः ॥

10.149.04a gāva iva grāmaṁ yūyudhir ivāśvān vāśreva vatsaṁ sumanā duhānā |
10.149.04c patir iva jāyām abhi no ny etu dhartā divaḥ savitā viśvavāraḥ ||

10.149.05a हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन् ।

10.149.05c एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम् ॥

10.149.05a hiraṇyastūpaḥ savitar yathā tvāṅgiraso juhve vāje asmin |
10.149.05c evā tvārcann avase vandamānaḥ somasyevāṁśum prati jāgarāham ||

10.150.01a समिद्धश्चित्समिध्यसे देवेभ्यो हव्यवाहन ।

10.150.01c आदित्यै रुद्रैर्वसुभिर्न आ गहि मृळीकाय न आ गहि ॥

10.150.01a samiddhaś cit sam idhyase devebhyo havyavāhana |
10.150.01c ādityai rudrair vasubhir na ā gahi mṛḷīkāya na ā gahi ||

10.150.02a इमं यज्ञमिदं वचो जुजुषाण उपागहि ।

10.150.02c मर्तासस्त्वा समिधान हवामहे मृळीकाय हवामहे ॥

10.150.02a imaṁ yajñam idaṁ vaco jujuṣāṇa upāgahi |

10.150.02c martāsas tvā samidhāna havāmahe mṛḷīkāya havāmahe ||

10.150.03a त्वामु जातवेदसं विश्ववारं गृणे धिया ।

10.150.03c अग्ने देवाँ आ वह नः प्रियव्रतान्मृळीकाय प्रियव्रतान् ॥

10.150.03a tvām u jātavedasaṁ viśvavāraṁ gṛṇe dhiyā |

10.150.03c agne devām̐ ā vaha naḥ priyavratān mṛḷīkāya priyavratān ||

10.150.04a अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनुष्या३ ऋषयः समीधिरे ।

10.150.04c अग्निं महो धनसातावहं हुवे मृळीकं धनसातये ॥

10.150.04a agnir devo devānām abhavat purohito 'gnim manuṣyā3 ṛṣayaḥ sam idhire |

10.150.04c agnim maho dhanasātāv ahaṁ huve mṛḷīkaṁ dhanasātaye ||

10.150.05a अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः कण्वं त्रसदस्युमाहवे ।

10.150.05c अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः ॥

10.150.05a agnir atrim bharadvājaṁ gaviṣṭhiram prāvan naḥ kaṇvaṁ trasadasyum āhave |

10.150.05c agniṁ vasiṣṭho havate purohito mṛḷīkāya purohitaḥ ||

10.151.01a श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ।

10.151.01c श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥

10.151.01a śraddhayāgniḥ sam idhyate śraddhayā hūyate haviḥ |

10.151.01c śraddhām bhagasya mūrdhani vacasā vedayāmasi ||

10.151.02a प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ।

10.151.02c प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ॥

10.151.02a priyaṁ śraddhe dadataḥ priyaṁ śraddhe didāsataḥ |

10.151.02c priyam bhojeṣu yajvasv idam ma uditaṁ kṛdhi ||

10.151.03a यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ।

10.151.03c एवं भोजेषु यज्वस्वस्माकमुदितं कृधि ॥

10.151.03a  yathā devā asureṣu śraddhām ugreṣu cakrire |
10.151.03c  evam bhojeṣu yajvasv asmākam uditaṁ kṛdhi ||

10.151.04a श्रद्धां देवा यजमाना वायुगोपा उपासते ।

10.151.04c श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु ॥

10.151.04a  śraddhāṁ devā yajamānā vāyugopā upāsate |
10.151.04c  śraddhāṁ hṛdayya1yākūtyā śraddhayā vindate vasu ||

10.151.05a श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।

10.151.05c श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥

10.151.05a  śraddhām prātar havāmahe śraddhām madhyandinam pari |
10.151.05c  śraddhāṁ sūryasya nimruci śraddhe śrad dhāpayeha naḥ ||

10.152.01a शास इत्था महाँ अस्यमित्रखादो अद्भुतः ।

10.152.01c न यस्य हन्यते सखा न जीयते कदा चन ॥

10.152.01a  śāsa itthā mahāṁ asy amitrakhādo adbhutaḥ |
10.152.01c  na yasya hanyate sakhā na jīyate kadā cana ||

10.152.02a स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।

10.152.02c वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥

10.152.02a  svastidā viśas patir vṛtrahā vimṛdho vaśī |
10.152.02c  vṛṣendraḥ pura etu naḥ somapā abhayaṅkaraḥ ||

10.152.03a वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।

10.152.03c वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥

10.152.03a  vi rakṣo vi mṛdho jahi vi vṛtrasya hanū ruja |
10.152.03c  vi manyum indra vṛtrahann amitrasyābhidāsataḥ ||

10.152.04a वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।

10.152.04c यो अस्माँ अभिदासत्यधरं गमया तमः ॥

10.152.04a  vi na indra mṛdho jahi nīcā yaccha pṛtanyataḥ |
10.152.04c  yo asmāṁ abhidāsaty adharaṁ gamayā tamaḥ ||

10.152.05a अपेन्द्र द्विषतो मनोऽप जिज्यासतो वधम् ।

10.152.05c वि मन्योः शर्म यच्छ वरीयो यवया वधम् ॥

10.152.05a apendra dviṣato mano 'pa jijyāsato vadham |
10.152.05c vi manyoḥ śarma yaccha varīyo yavayā vadham ||

10.153.01a ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते ।

10.153.01c भेजानासः सुवीर्यम् ॥

10.153.01a īṅkhayantīr apasyuva indraṁ jātam upāsate |
10.153.01c bhejānāsaḥ suvīryam ||

10.153.02a त्वमिन्द्र बलादधि सहसो जात ओजसः ।

10.153.02c त्वं वृषन्वृषेदसि ॥

10.153.02a tvam indra balād adhi sahaso jāta ojasaḥ |
10.153.02c tvaṁ vṛṣan vṛṣed asi ||

10.153.03a त्वमिन्द्रासि वृत्रहा व्य१न्तरिक्षमतिरः ।

10.153.03c उद्द्यामस्तभ्ना ओजसा ॥

10.153.03a tvam indrāsi vṛtrahā vy a1ntarikṣam atiraḥ |
10.153.03c ud dyām astabhnā ojasā ||

10.153.04a त्वमिन्द्र सजोषसमर्कं बिभर्षि बाह्वोः ।

10.153.04c वज्रं शिशान ओजसा ॥

10.153.04a tvam indra sajoṣasam arkam bibharṣi bāhvoḥ |
10.153.04c vajraṁ śiśāna ojasā ||

10.153.05a त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा ।

10.153.05c स विश्वा भुव आभवः ॥

10.153.05a tvam indrābhibhūr asi viśvā jātāny ojasā |
10.153.05c sa viśvā bhuva ābhavaḥ ||

10.154.01a सोम एकेभ्यः पवते घृतमेक उपासते ।

10.154.01c येभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छतात् ॥

10.154.01a soma ekebhyaḥ pavate ghṛtam eka upāsate |
10.154.01c yebhyo madhu pradhāvati tām̐ś cid evāpi gacchatāt ||

10.154.02a तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।

10.154.02c तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ॥

10.154.02a tapasā ye anādhṛṣyās tapasā ye svar yayuḥ |
10.154.02c tapo ye cakrire mahas tām̐ś cid evāpi gacchatāt ||

10.154.03a ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ।

10.154.03c ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ॥

10.154.03a ye yudhyante pradhaneṣu śūrāso ye tanūtyajaḥ |
10.154.03c ye vā sahasradakṣiṇās tām̐ś cid evāpi gacchatāt ||

10.154.04a ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः ।

10.154.04c पितॄन्तपस्वतो यम ताँश्चिदेवापि गच्छतात् ॥

10.154.04a ye cit pūrva ṛtasāpa ṛtāvāna ṛtāvṛdhaḥ |
10.154.04c pitṝn tapasvato yama tām̐ś cid evāpi gacchatāt ||

10.154.05a सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् ।

10.154.05c ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥

10.154.05a sahasraṇīthāḥ kavayo ye gopāyanti sūryam |
10.154.05c ṛṣīn tapasvato yama tapojām̐ api gacchatāt ||

10.155.01a अरायि काणे विकटे गिरिं गच्छ सदान्वे ।

10.155.01c शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥

10.155.01a arāyi kāṇe vikaṭe giriṁ gaccha sadānve |
10.155.01c śirimbiṭhasya satvabhis tebhiṣ ṭvā cātayāmasi ||

10.155.02a चत्तो इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी ।

10.155.02c अराय्यं ब्रह्मणस्पते तीक्ष्णशृङ्गोदृषन्निहि ॥

10.155.02a catto itaś cattāmutaḥ sarvā bhrūṇāny āruṣī |
10.155.02c arāyyam brahmaṇas pate tīkṣṇaśṛṅgodṛṣann ihi ||

10.155.03a अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम् ।

10.155.03c तदा रभस्व दुर्हणो तेन गच्छ परस्तरम् ॥

10.155.03a ado yad dāru plavate sindhoḥ pāre apūruṣam |
10.155.03c tad ā rabhasva durhaṇo tena gaccha parastaram ||

10.155.04a यद्ध प्राचीरजगन्तोरो मण्डूरधाणिकीः ।

10.155.04c हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥

10.155.04a yad dha prācīr ajagantoro maṇḍūradhāṇikīḥ |
10.155.04c hatā indrasya śatravaḥ sarve budbudayāśavaḥ ||

10.155.05a परीमे गामनेषत पर्यग्निमहृषत ।

10.155.05c देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥

10.155.05a parīme gām aneṣata pary agnim ahṛṣata |
10.155.05c deveṣv akrata śravaḥ ka imām̐ ā dadharṣati ||

10.156.01a अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु ।

10.156.01c तेन जेष्म धनंधनम् ॥

10.156.01a agniṁ hinvantu no dhiyaḥ saptim āśum ivājiṣu |
10.156.01c tena jeṣma dhanaṁ-dhanam ||

10.156.02a यया गा आकरामहे सेनयाग्ने तवोत्या ।

10.156.02c तां नो हिन्व मघत्तये ॥

10.156.02a yayā gā ākarāmahe senayāgne tavotyā |
10.156.02c tāṁ no hinva maghattaye ||

10.156.03a अग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम् ।

10.156.03c अङ्धि खं वर्तया पणिम् ॥

10.156.03a āgne sthūraṁ rayim bhara pṛthuṁ gomantam aśvinam |
10.156.03c aṅdhi khaṁ vartayā paṇim ||

10.156.04a अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि ।

10.156.04c दधज्ज्योतिर्जनेभ्यः ॥

10.156.04a agne nakṣatram ajaram ā sūryaṁ rohayo divi |
10.156.04c dadhaj jyotir janebhyaḥ ||

10.156.05a अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् ।

10.156.05c बोधा स्तोत्रे वयो दधत् ॥

10.156.05a agne ketur viśām asi preṣṭhaḥ śreṣṭha upasthasat |
10.156.05c bodhā stotre vayo dadhat ||

10.157.01a इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ॥

10.157.01a imā nu kam bhuvanā sīṣadhāmendraś ca viśve ca devāḥ ||

10.157.02a यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥

10.157.02a yajñaṁ ca nas tanvaṁ ca prajāṁ cādityair indraḥ saha cīkḷpāti ||

10.157.03a आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ॥

10.157.03a ādityair indraḥ sagaṇo marudbhir asmākam bhūtv avitā tanūnām ||

10.157.04a हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ॥

10.157.04a hatvāya devā asurān yad āyan devā devatvam abhirakṣamāṇāḥ ||

10.157.05a प्रत्यञ्चमर्कमनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥

10.157.05a pratyañcam arkam anayañ chacībhir ād it svadhām iṣirām pary apaśyan ||

10.158.01a सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् ।

10.158.01c अग्निर्नः पार्थिवेभ्यः ॥

10.158.01a sūryo no divas pātu vāto antarikṣāt |
10.158.01c agnir naḥ pārthivebhyaḥ ||

10.158.02a जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति ।

10.158.02c पाहि नो दिद्युतः पतन्त्याः ॥

10.158.02a joṣā savitar yasya te haraḥ śatam savām̐ arhati |
10.158.02c pāhi no didyutaḥ patantyāḥ ||

10.158.03a चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः ।

10.158.03c चक्षुर्धाता दधातु नः ॥

10.158.03a cakṣur no devaḥ savitā cakṣur na uta parvataḥ |
10.158.03c cakṣur dhātā dadhātu naḥ ||

10.158.04a चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः ।

10.158.04c सं चेदं वि च पश्येम ॥

10.158.04a cakṣur no dhehi cakṣuṣe cakṣur vikhyai tanūbhyaḥ |
10.158.04c saṁ cedaṁ vi ca paśyema ||

10.158.05a सुसंदृशं त्वा वयं प्रति पश्येम सूर्य ।

10.158.05c वि पश्येम नृचक्षसः ॥

10.158.05a susandṛśaṁ tvā vayam prati paśyema sūrya |
10.158.05c vi paśyema nṛcakṣasaḥ ||

10.159.01a उदसौ सूर्यो अगादुदयं मामको भगः ।

10.159.01c अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥

10.159.01a ud asau sūryo agād ud ayam māmako bhagaḥ |
10.159.01c ahaṁ tad vidvalā patim abhy asākṣi viṣāsahiḥ ||

10.159.02a अहं केतुरहं मूर्धाहमुग्रा विवाचनी ।

10.159.02c ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ॥

10.159.02a ahaṁ ketur aham mūrdhāham ugrā vivācanī |
10.159.02c mamed anu kratum patiḥ sehānāyā upācaret ||

10.159.03a मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ।

10.159.03c उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ॥

10.159.03a mama putrāḥ śatruhaṇo 'tho me duhitā virāṭ |
10.159.03c utāham asmi sañjayā patyau me śloka uttamaḥ ||

10.159.04a येनेन्द्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः ।

10.159.04c इदं तदक्रि देवा असपत्ना किलाभुवम् ॥

10.159.04a yenendro haviṣā kṛtvy abhavad dyumny uttamaḥ |
10.159.04c idaṁ tad akri devā asapatnā kilābhuvam ||

10.159.05a असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी ।

10.159.05c आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव ॥

10.159.05a asapatnā sapatnaghnī jayanty abhibhūvarī |
10.159.05c āvṛkṣam anyāsāṁ varco rādho astheyasām iva ||

10.159.06a समजैषमिमा अहं सपत्नीरभिभूवरी ।

10.159.06c यथाहमस्य वीरस्य विराजानि जनस्य च ॥

10.159.06a sam ajaiṣam imā ahaṁ sapatnīr abhibhūvarī |
10.159.06c yathāham asya vīrasya virājāni janasya ca ||

10.160.01a तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुञ्च ।

10.160.01c इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन्तुभ्यमिमे सुतासः ॥

10.160.01a tīvrasyābhivayaso asya pāhi sarvarathā vi harī iha muñca |
10.160.01c indra mā tvā yajamānāso anye ni rīraman tubhyam ime sutāsaḥ ||

10.160.02a तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।

10.160.02c इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् ॥

10.160.02a tubhyaṁ sutās tubhyam u sotvāsas tvāṁ giraḥ śvātryā ā hvayanti |
10.160.02c indredam adya savanaṁ juṣāṇo viśvasya vidvām̐ iha pāhi somam ||

10.160.03a य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति ।

10.160.03c न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ॥

10.160.03a ya uśatā manasā somam asmai sarvahṛdā devakāmaḥ sunoti |
10.160.03c na gā indras tasya parā dadāti praśastam ic cārum asmai kṛṇoti ||

10.160.04a अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमम् ।

10.160.04c निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः ॥

10.160.04a anuspaṣṭo bhavaty eṣo asya yo asmai revān na sunoti somam |
10.160.04c nir aratnau maghavā taṁ dadhāti brahmadviṣo hanty anānudiṣṭaḥ ||

10.160.05a अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ ।

10.160.05c आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम ॥

10.160.05a aśvāyanto gavyanto vājayanto havāmahe tvopagantavā u |
10.160.05c ābhūṣantas te sumatau navāyāṁ vayam indra tvā śunaṁ huvema ||

10.161.01a मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।

10.161.01c ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥

10.161.01a muñcāmi tvā haviṣā jīvanāya kam ajñātayakṣmād uta rājayakṣmāt |
10.161.01c grāhir jagrāha yadi vaitad enaṁ tasyā indrāgnī pra mumuktam enam ||

10.161.02a यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।

10.161.02c तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ॥

10.161.02a yadi kṣitāyur yadi vā pareto yadi mṛtyor antikaṁ nīta eva |
10.161.02c tam ā harāmi nirṛter upasthād aspārṣam enaṁ śataśāradāya ||

10.161.03a सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।

10.161.03c शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ॥

10.161.03a sahasrākṣeṇa śataśāradena śatāyuṣā haviṣāhārṣam enam |
10.161.03c śataṁ yathemaṁ śarado nayātīndro viśvasya duritasya pāram ||

10.161.04a शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् ।

10.161.04c शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥

10.161.04a śataṁ jīva śarado vardhamānaḥ śataṁ hemantāñ chatam u vasantān |
10.161.04c śatam indrāgnī savitā bṛhaspatiḥ śatāyuṣā haviṣemam punar duḥ ||

10.161.05a आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव ।

10.161.05c सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥

10.161.05a āhā̍rṣa̱ṁ tvāvi̍daṁ tvā̱ puna̱r āgā̍ḥ punarnava |
10.161.05c sarvā̍ṅga̱ sarva̍ṁ te̱ cakṣu̱ḥ sarva̱m āyu̍ś ca te 'vidam ||

10.162.01a ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।

10.162.01c अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥

10.162.01a bra̍hmaṇā̱gniḥ sa̍ṁvidā̱no ra̍kṣo̱hā bā̍dhatām i̱taḥ |
10.162.01c amī̍vā̱ yas te̱ garbha̍ṁ du̱rṇāmā̱ yoni̍m ā̱śaye̍ ||

10.162.02a यस्ते गर्भममीवा दुर्णामा योनिमाशये ।

10.162.02c अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥

10.162.02a yas te̱ garbha̱m amī̍vā du̱rṇāmā̱ yoni̍m ā̱śaye̍ |
10.162.02c a̱gniṣ ṭaṁ brahma̍ṇā sa̱ha niṣ kra̱vyāda̍m anīnaśat ||

10.162.03a यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम् ।

10.162.03c जातं यस्ते जिघांसति तमितो नाशयामसि ॥

10.162.03a yas te̱ hanti̍ pa̱taya̍ntaṁ niṣa̱tsnuṁ yaḥ sarī̍sṛ̱pam |
10.162.03c jā̱taṁ yas te̱ jighā̍ṁsati̱ tam i̱to nā̍śayāmasi ||

10.162.04a यस्त ऊरू विहरत्यन्तरा दम्पती शये ।

10.162.04c योनिं यो अन्तरारेळ्हि तमितो नाशयामसि ॥

10.162.04a yas ta̍ ū̱rū vi̱hara̍ty anta̱rā dampa̍tī̱ śaye̍ |
10.162.04c yo̱niṁ yo a̱ntar ā̱re̱lhi̱ tam i̱to nā̍śayāmasi ||

10.162.05a यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।

10.162.05c प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥

10.162.05a yas tvā̱ bhrātā̱ pati̍r bhū̱tvā jā̱ro bhū̱tvā ni̱padya̍te |
10.162.05c pra̱jāṁ yas te̱ jighā̍ṁsati̱ tam i̱to nā̍śayāmasi ||

10.162.06a यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।

10.162.06c प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥

10.162.06a yas tvā svapnena tamasā mohayitvā nipadyate |
10.162.06c prajāṁ yas te jighāṁsati tam ito nāśayāmasi ||

10.163.01a अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।

10.163.01c यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥

10.163.01a akṣībhyāṁ te nāsikābhyāṁ karṇābhyāṁ chubukād adhi |
10.163.01c yakṣmaṁ śīrṣaṇyam mastiṣkāj jihvāyā vi vṛhāmi te ||

10.163.02a ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।

10.163.02c यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥

10.163.02a grīvābhyas ta uṣṇihābhyaḥ kīkasābhyo anūkyāt |
10.163.02c yakṣmaṁ doṣaṇya1m aṁsābhyām bāhubhyāṁ vi vṛhāmi te ||

10.163.03a आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ।

10.163.03c यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ॥

10.163.03a āntrebhyas te gudābhyo vaniṣṭhor hṛdayād adhi |
10.163.03c yakṣmam matasnābhyāṁ yaknaḥ plāśibhyo vi vṛhāmi te ||

10.163.04a ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।

10.163.04c यक्ष्मं श्रोणिभ्यां भासदाद्भंससो वि वृहामि ते ॥

10.163.04a ūrubhyāṁ te aṣṭhīvadbhyām pārṣṇibhyām prapadābhyām |
10.163.04c yakṣmaṁ śroṇibhyām bhāsadād bhaṁsaso vi vṛhāmi te ||

10.163.05a मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः ।

10.163.05c यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥

10.163.05a mehanād vanaṅkaraṇāl lomabhyas te nakhebhyaḥ |
10.163.05c yakṣmaṁ sarvasmād ātmanas tam idaṁ vi vṛhāmi te ||

10.163.06a अङ्गादङ्गाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।

10.163.06c यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥

10.163.06a aṅgād-aṅgāl lomno-lomno jātam parvaṇi-parvaṇi |
10.163.06c yakṣmaṁ sarvasmād ātmanas tam idaṁ vi vṛhāmi te ||

10.164.01a अपेहि मनसस्पतेऽप क्राम परश्चर ।

10.164.01c परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥

10.164.01a apehi manasas pate 'pa krāma paraś cara |
10.164.01c paro nirṛtyā ā cakṣva bahudhā jīvato manaḥ ||

10.164.02a भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।

10.164.02c भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ॥

10.164.02a bhadraṁ vai varaṁ vṛṇate bhadraṁ yuñjanti dakṣiṇam |
10.164.02c bhadraṁ vaivasvate cakṣur bahutrā jīvato manaḥ ||

10.164.03a यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपन्तः ।

10.164.03c अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु ॥

10.164.03a yad āśasā niḥśasābhiśasopārima jāgrato yat svapantaḥ |
10.164.03c agnir viśvāny apa duṣkṛtāny ajuṣṭāny āre asmad dadhātu ||

10.164.04a यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि ।

10.164.04c प्रचेता न आङ्गिरसो द्विषतां पात्वंहसः ॥

10.164.04a yad indra brahmaṇas pate 'bhidrohaṁ carāmasi |
10.164.04c pracetā na āṅgiraso dviṣatām pātv aṁhasaḥ ||

10.164.05a अजैष्माद्यासनाम चाभूमानागसो वयम् ।

10.164.05c जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ॥

10.164.05a ajaiṣmādyāsanāma cābhūmānāgaso vayam |
10.164.05c jāgratsvapnaḥ saṅkalpaḥ pāpo yaṁ dviṣmas taṁ sa ṛcchatu yo no dveṣṭi tam ṛcchatu ||

10.165.01a देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।

10.165.01c तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

10.165.01a devāḥ kapota iṣito yad icchan dūto nirṛtyā idam ājagāma |

10.165.01c tasmā arcāma kṛṇavāma niṣkṛtiṁ śaṁ no astu dvipade śaṁ catuṣpade ||

10.165.02a शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।

10.165.02c अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥

10.165.02a śivaḥ kapota iṣito no astv anāgā devāḥ śakuno gṛheṣu |

10.165.02c agnir hi vipro juṣatāṁ havir naḥ pari hetiḥ pakṣiṇī no vṛṇaktu ||

10.165.03a हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने ।

10.165.03c शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥

10.165.03a hetiḥ pakṣiṇī na dabhāty asmān āṣṭryām padaṁ kṛṇute agnidhāne |

10.165.03c śaṁ no gobhyaś ca puruṣebhyaś cāstu mā no hiṁsīd iha devāḥ kapotaḥ ||

10.165.04a यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।

10.165.04c यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥

10.165.04a yad ulūko vadati mogham etad yat kapotaḥ padam agnau kṛṇoti |

10.165.04c yasya dūtaḥ prahita eṣa etat tasmai yamāya namo astu mṛtyave ||

10.165.05a ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम् ।

10.165.05c संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्पतिष्ठः ॥

10.165.05a ṛcā kapotaṁ nudata praṇodam iṣam madantaḥ pari gāṁ nayadhvam |

10.165.05c saṁyopayanto duritāni viśvā hitvā na ūrjam pra patāt patiṣṭhaḥ ||

10.166.01a ऋषभं मा समानानां सपत्नानां विषासहिम् ।

10.166.01c हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥

10.166.01a ṛṣabham mā samānānāṁ sapatnānāṁ viṣāsahim |

10.166.01c hantāraṁ śatrūṇāṁ kṛdhi virājaṁ gopatiṁ gavām ||

10.166.02a अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः ।

10.166.02c अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥

10.166.02a aham asmi sapatnahendra ivāriṣṭo akṣataḥ |

10.166.02c adhaḥ sapatnā me pador ime sarve abhiṣṭhitāḥ ||

10.166.03a अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया ।

10.166.03c वाचस्पते नि षेधेमान्यथा मदधरं वदान् ॥

10.166.03a atraiva vo 'pi nahyāmy ubhe ārtnī iva jyayā |
10.166.03c vācas pate ni ṣedhemān yathā mad adharaṁ vadān ||

10.166.04a अभिभूरहमागमं विश्वकर्मेण धाम्ना ।

10.166.04c आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥

10.166.04a abhibhūr aham āgamaṁ viśvakarmeṇa dhāmnā |
10.166.04c ā vaś cittam ā vo vratam ā vo 'haṁ samitiṁ dade ||

10.166.05a योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम् ।

10.166.05d अधस्पदान्म उद्वदत मण्डूका इवोदकान्मण्डूका उदकादिव ॥

10.166.05a yogakṣemaṁ va ādāyāham bhūyāsam uttama ā vo mūrdhānam akramīm |
10.166.05d adhaspadān ma ud vadata maṇḍūkā ivodakān maṇḍūkā udakād iva ||

10.167.01a तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि ।

10.167.01c त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः ॥

10.167.01a tubhyedam indra pari ṣicyate madhu tvaṁ sutasya kalaśasya rājasi |
10.167.01c tvaṁ rayim puruvīrām u nas kṛdhi tvaṁ tapaḥ paritapyājayaḥ svaḥ ||

10.167.02a स्वर्जितं महि मन्दानमन्धसो हवामहे परि शक्रं सुताँ उप ।

10.167.02c इमं नो यज्ञमिह बोध्या गहि स्पृधो जयन्तं मघवानमीमहे ॥

10.167.02a svarjitam mahi mandānam andhaso havāmahe pari śakraṁ sutām̐ upa |
10.167.02c imaṁ no yajñam iha bodhy ā gahi spṛdho jayantam maghavānam īmahe ||

10.167.03a सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि ।

10.167.03c तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम् ॥

10.167.03a somasya rājño varuṇasya dharmaṇi bṛhaspater anumatyā u śarmaṇi |
10.167.03c tavāham adya maghavann upastutau dhātar vidhātaḥ kalaśām̐ abhakṣayam ||

10.167.04a प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे ।

10.167.04c सुते सातेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ॥

10.167.04a  prasūto bhakṣam akaraṁ carāv api stomaṁ cemam prathamaḥ sūrir un mṛje |
10.167.04c  sute sātena yady āgamaṁ vām prati viśvāmitrajamadagnī dame ||

10.168.01a वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।

10.168.01c दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥

10.168.01a  vātasya nu mahimānaṁ rathasya rujann eti stanayann asya ghoṣaḥ |
10.168.01c  divispṛg yāty aruṇāni kṛṇvann uto eti pṛthivyā reṇum asyan ||

10.168.02a सं प्रेरते अनु वातस्य विष्ठा ऐनं गच्छन्ति समनं न योषाः ।

10.168.02c ताभिः सयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ॥

10.168.02a  sam prerate anu vātasya viṣṭhā ainaṁ gacchanti samanaṁ na yoṣāḥ |
10.168.02c  tābhiḥ sayuk sarathaṁ deva īyate 'sya viśvasya bhuvanasya rājā ||

10.168.03a अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः ।

10.168.03c अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥

10.168.03a  antarikṣe pathibhir īyamāno na ni viśate katamac canāhaḥ |
10.168.03c  apāṁ sakhā prathamajā ṛtāvā kva svij jātaḥ kuta ā babhūva ||

10.168.04a आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।

10.168.04c घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥

10.168.04a  ātmā devānām bhuvanasya garbho yathāvaśaṁ carati deva eṣaḥ |
10.168.04c  ghoṣā id asya śṛṇvire na rūpaṁ tasmai vātāya haviṣā vidhema ||

10.169.01a मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।

10.169.01c पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ ॥

10.169.01a  mayobhūr vāto abhi vātūsrā ūrjasvatīr oṣadhīr ā riśantām |
10.169.01c  pīvasvatīr jīvadhanyāḥ pibantv avasāya padvate rudra mṛḷa ||

10.169.02a याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।

10.169.02c या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥

10.169.02a yāḥ sarūpā virūpā ekarūpā yāsām agnir iṣṭyā nāmāni veda |
10.169.02c yā aṅgirasas tapaseha cakrus tābhyaḥ parjanya mahi śarma yaccha ||

10.169.03a या देवेषु तन्व१मैरयन्त यासां सोमो विश्वा रूपाणि वेद ।

10.169.03c ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ॥

10.169.03a yā deveṣu tanva1m airayanta yāsāṁ somo viśvā rūpāṇi veda |
10.169.03c tā asmabhyam payasā pinvamānāḥ prajāvatīr indra goṣṭhe rirīhi ||

10.169.04a प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।

10.169.04c शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥

10.169.04a prajāpatir mahyam etā rarāṇo viśvair devaiḥ pitṛbhiḥ saṁvidānaḥ |
10.169.04c śivāḥ satīr upa no goṣṭham ākas tāsāṁ vayam prajayā saṁ sadema ||

10.170.01a विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।

10.170.01c वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥

10.170.01a vibhrāḍ bṛhat pibatu somyam madhv āyur dadhad yajñapatāv avihrutam |
10.170.01c vātajūto yo abhirakṣati tmanā prajāḥ pupoṣa purudhā vi rājati ||

10.170.02a विभ्राड्बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितम् ।

10.170.02c अमित्रहा वृत्रहा दस्युहंतमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥

10.170.02a vibhrāḍ bṛhat subhṛtaṁ vājasātamaṁ dharman divo dharuṇe satyam arpitam |
10.170.02c amitrahā vṛtrahā dasyuhaṁtamaṁ jyotir jajñe asurahā sapatnahā ||

10.170.03a इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।

10.170.03c विश्वभ्राड्भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥

10.170.03a idaṁ śreṣṭhaṁ jyotiṣāṁ jyotir uttamaṁ viśvajid dhanajid ucyate bṛhat |
10.170.03c viśvabhrāḍ bhrājo mahi sūryo dṛśa uru paprathe saha ojo acyutam ||

10.170.04a विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः ।

10.170.04c येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥

10.170.04a  vibhrājañ jyotiṣā sva1r agaccho rocanaṁ divaḥ |
10.170.04c  yenemā viśvā bhuvanāny ābhṛtā viśvakarmaṇā viśvadevyāvatā ||

10.171.01a त्वं त्यमिटतो रथमिन्द्र प्रावः सुतावतः ।

10.171.01c अशृणोः सोमिनो हवम् ॥

10.171.01a  tvaṁ tyam iṭato ratham indra prāvaḥ sutāvataḥ |
10.171.01c  aśṛṇoḥ somino havam ||

10.171.02a त्वं मखस्य दोधतः शिरोऽव त्वचो भरः ।

10.171.02c अगच्छः सोमिनो गृहम् ॥

10.171.02a  tvam makhasya dodhataḥ śiro 'va tvaco bharaḥ |
10.171.02c  agacchaḥ somino gṛham ||

10.171.03a त्वं त्यमिन्द्र मर्त्यमास्त्रबुध्नाय वेन्यम् ।

10.171.03c मुहुः श्रथ्ना मनस्यवे ॥

10.171.03a  tvaṁ tyam indra martyam āstrabudhnāya venyam |
10.171.03c  muhuḥ śrathnā manasyave ||

10.171.04a त्वं त्यमिन्द्र सूर्यं पश्चा सन्तं पुरस्कृधि ।

10.171.04c देवानां चित्तिरो वशम् ॥

10.171.04a  tvaṁ tyam indra sūryam paścā santam puras kṛdhi |
10.171.04c  devānāṁ cit tiro vaśam ||

10.172.01a आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥

10.172.01a  ā yāhi vanasā saha gāvaḥ sacanta vartaniṁ yad ūdhabhiḥ ||

10.172.02a आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥

10.172.02a  ā yāhi vasvyā dhiyā maṁhiṣṭho jārayanmakhaḥ sudānubhiḥ ||

10.172.03a पितुभृतो न तन्तुमित्सुदानवः प्रति दध्मो यजामसि ॥

10.172.03a  pitubhṛto na tantum it sudānavaḥ prati dadhmo yajāmasi ||

10.172.04a उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ॥

10.172.04a uṣā apa svasus tamaḥ saṁ vartayati vartanim sujātatā ||

10.173.01a आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः ।

10.173.01c विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥

10.173.01a ā tvāhārṣam antar edhi dhruvas tiṣṭhāvicācaliḥ |
10.173.01c viśas tvā sarvā vāñchantu mā tvad rāṣṭram adhi bhraśat ||

10.173.02a इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः ।

10.173.02c इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥

10.173.02a ihaivaidhi māpa cyoṣṭhāḥ parvata ivāvicācaliḥ |
10.173.02c indra iveha dhruvas tiṣṭheha rāṣṭram u dhāraya ||

10.173.03a इममिन्द्रो अदीधरद्ध्रुवं ध्रुवेण हविषा ।

10.173.03c तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥

10.173.03a imam indro adīdharad dhruvaṁ dhruveṇa haviṣā |
10.173.03c tasmai somo adhi bravat tasmā u brahmaṇas patiḥ ||

10.173.04a ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।

10.173.04c ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयम् ॥

10.173.04a dhruvā dyaur dhruvā pṛthivī dhruvāsaḥ parvatā ime |
10.173.04c dhruvaṁ viśvam idaṁ jagad dhruvo rājā viśām ayam ||

10.173.05a ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।

10.173.05c ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥

10.173.05a dhruvaṁ te rājā varuṇo dhruvaṁ devo bṛhaspatiḥ |
10.173.05c dhruvaṁ ta indraś cāgniś ca rāṣṭraṁ dhārayatāṁ dhruvam ||

10.173.06a ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि ।

10.173.06c अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥

10.173.06a dhruvaṁ dhruveṇa haviṣābhi somam mṛśāmasi |
10.173.06c atho ta indraḥ kevalīr viśo balihṛtas karat ||

10.174.01a अभीवर्तेन हविषा येनेन्द्रो अभिवावृते ।

10.174.01c तेनास्मान्ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ॥

10.174.01a abhīvartena haviṣā yenendro abhivāvṛte |
10.174.01c tenāsmān brahmaṇas pate 'bhi rāṣṭrāya vartaya ||

10.174.02a अभिवृत्य सपत्नानभि या नो अरातयः ।

10.174.02c अभि पृतन्यन्तं तिष्ठाभि यो न इरस्यति ॥

10.174.02a abhivṛtya sapatnān abhi yā no arātayaḥ |
10.174.02c abhi pṛtanyantaṁ tiṣṭhābhi yo na irasyati ||

10.174.03a अभि त्वा देवः सविताभि सोमो अवीवृतत् ।

10.174.03c अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥

10.174.03a abhi tvā devaḥ savitābhi somo avīvṛtat |
10.174.03c abhi tvā viśvā bhūtāny abhīvarto yathāsasi ||

10.174.04a येनेन्द्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः ।

10.174.04c इदं तदक्रि देवा असपत्नः किलाभुवम् ॥

10.174.04a yenendro haviṣā kṛtvy abhavad dyumny uttamaḥ |
10.174.04c idaṁ tad akri devā asapatnaḥ kilābhuvam ||

10.174.05a असपत्नः सपत्नहाभिराष्ट्रो विषासहिः ।

10.174.05c यथाहमेषां भूतानां विराजानि जनस्य च ॥

10.174.05a asapatnaḥ sapatnahābhirāṣṭro viṣāsahiḥ |
10.174.05c yathāham eṣām bhūtānām virājāni janasya ca ||

10.175.01a प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा ।

10.175.01c धूर्षु युज्यध्वं सुनुत ॥

10.175.01a pra vo grāvāṇaḥ savitā devaḥ suvatu dharmaṇā |
10.175.01c dhūrṣu yujyadhvaṁ sunuta ||

10.175.02a ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम् ।

10.175.02c उस्राः कर्तन भेषजम् ॥

10.175.02a grāvāṇo apa ducchunām apa sedhata durmatim |
10.175.02c usrāḥ kartana bheṣajam ||

10.175.03a ग्रावाण उपरेष्वा महीयन्ते सजोषसः ।

10.175.03c वृष्णे दधतो वृष्ण्यम् ॥

10.175.03a grāvāṇa upareṣv ā mahīyante sajoṣasaḥ |
10.175.03c vṛṣṇe dadhato vṛṣṇyam ||

10.175.04a ग्रावाणः सविता नु वो देवः सुवतु धर्मणा ।

10.175.04c यजमानाय सुन्वते ॥

10.175.04a grāvāṇaḥ savitā nu vo devaḥ suvatu dharmaṇā |
10.175.04c yajamānāya sunvate ||

10.176.01a प्र सूनव ऋभूणां बृहन्नवन्त वृजना ।

10.176.01c क्षामा ये विश्वधायसोऽश्नन्धेनुं न मातरम् ॥

10.176.01a pra sūnava ṛbhūṇām bṛhan navanta vṛjanā |
10.176.01c kṣāmā ye viśvadhāyaso 'śnan dhenuṁ na mātaram ||

10.176.02a प्र देवं देव्या धिया भरता जातवेदसम् ।

10.176.02c हव्या नो वक्षदानुषक् ॥

10.176.02a pra devaṁ devyā dhiyā bharatā jātavedasam |
10.176.02c havyā no vakṣad ānuṣak ||

10.176.03a अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते ।

10.176.03c रथो न योरभीवृतो घृणीवाञ्चेतति त्मना ॥

10.176.03a ayam u ṣya pra devayur hotā yajñāya nīyate |
10.176.03c ratho na yor abhīvṛto ghṛṇīvāñ cetati tmanā ||

10.176.04a अयमग्निरुरुष्यत्यमृतादिव जन्मनः ।

10.176.04c सहसश्चित्सहीयान्देवो जीवातवे कृतः ॥

10.176.04a  ayam agnir uruṣyaty amṛtād iva janmanaḥ |
10.176.04c  sahasaś cit sahīyān devo jīvātave kṛtaḥ ||

10.177.01a पतंगमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।

10.177.01c समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः ॥

10.177.01a  pataṅgam aktam asurasya māyayā hṛdā paśyanti manasā vipaścitaḥ |
10.177.01c  samudre antaḥ kavayo vi cakṣate marīcīnām padam icchanti vedhasaḥ ||

10.177.02a पतंगो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे अन्तः ।

10.177.02c तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥

10.177.02a  pataṅgo vācam manasā bibharti tāṁ gandharvo 'vadad garbhe antaḥ |
10.177.02c  tāṁ dyotamānāṁ svaryam manīṣām ṛtasya pade kavayo ni pānti ||

10.177.03a अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।

10.177.03c स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥

10.177.03a  apaśyaṁ gopām anipadyamānam ā ca parā ca pathibhiś carantam |
10.177.03c  sa sadhrīcīḥ sa viṣūcīr vasāna ā varīvarti bhuvaneṣv antaḥ ||

10.178.01a त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।

10.178.01c अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥

10.178.01a  tyam ū ṣu vājinaṁ devajūtaṁ sahāvānaṁ tarutāraṁ rathānām |
10.178.01c  ariṣṭanemim pṛtanājam āśuṁ svastaye tārkṣyam ihā huvema ||

10.178.02a इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम ।

10.178.02c उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ॥

10.178.02a  indrasyeva rātim ājohuvānāḥ svastaye nāvam ivā ruhema |
10.178.02c  urvī na pṛthvī bahule gabhīre mā vām etau mā paretau riṣāma ||

10.178.03a सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।

10.178.03c सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम् ॥

10.178.03a  sadyaś cid yaḥ śavasā pañca kṛṣṭīḥ sūrya iva jyotiṣāpas tatāna |

10.178.03c sahasrasāḥ śatasā asya raṁhir na smā varante yuvatiṁ na śaryām ||

10.179.01a उत्तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम्।

10.179.01c यदि श्रातो जुहोतन यद्यश्रातो ममत्तन॥

10.179.01a ut tiṣṭhatāva paśyatendrasya bhāgam ṛtviyam |
10.179.01c yadi śrāto juhotana yady aśrāto mamattana ||

10.179.02a श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो विमध्यम्।

10.179.02c परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम्॥

10.179.02a śrātaṁ havir o ṣv indra pra yāhi jagāma sūro adhvano vimadhyam |
10.179.02c pari tvāsate nidhibhiḥ sakhāyaḥ kulapā na vrājapatiṁ carantam ||

10.179.03a श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रातं मन्ये तदृतं नवीयः।

10.179.03c माध्यंदिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन्पुरुकृज्जुषाणः॥

10.179.03a śrātam manya ūdhani śrātam agnau suśrātam manye tad ṛtaṁ navīyaḥ |
10.179.03c mādhyandinasya savanasya dadhnaḥ pibendra vajrin purukṛj juṣāṇaḥ ||

10.180.01a प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु।

10.180.01c इन्द्रा भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम्॥

10.180.01a pra sasāhiṣe puruhūta śatrūñ jyeṣṭhas te śuṣma iha rātir astu |
10.180.01c indrā bhara dakṣiṇenā vasūni patiḥ sindhūnām asi revatīnām ||

10.180.02a मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः।

10.180.02c सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून्ताळ्हि वि मृधो नुदस्व॥

10.180.02a mṛgo na bhīmaḥ kucaro giriṣṭhāḥ parāvata ā jaganthā parasyāḥ |
10.180.02c sṛkaṁ saṁśāya pavim indra tigmaṁ vi śatrūn tāḻhi vi mṛdho nudasva ||

10.180.03a इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम्।

10.180.03c अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम्॥

10.180.03a indra kṣatram abhi vāmam ojo 'jāyathā vṛṣabha carṣaṇīnām |
10.180.03c apānudo janam amitrayantam uruṁ devebhyo akṛṇor u lokam ||

10.181.01a प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।

10.181.01c धातुर्द्युतानात्सवितुश्च विष्णो रथंतरमा जभारा वसिष्ठः ॥

10.181.01a prathaś ca yasya saprathaś ca nāmānuṣṭubhasya haviṣo havir yat |
10.181.01c dhātur dyutānāt savituś ca viṣṇo rathantaram ā jabhārā vasiṣṭhaḥ ||

10.181.02a अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।

10.181.02c धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥

10.181.02a avindan te atihitaṁ yad āsīd yajñasya dhāma paramaṁ guhā yat |
10.181.02c dhātur dyutānāt savituś ca viṣṇor bharadvājo bṛhad ā cakre agneḥ ||

10.181.03a तेऽविन्दन्मनसा दीध्याना यजु ष्कन्नं प्रथमं देवयानम् ।

10.181.03c धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्घर्ममेते ॥

10.181.03a te 'vindan manasā dīdhyānā yaju ṣkannam prathamaṁ devayānam |
10.181.03c dhātur dyutānāt savituś ca viṣṇor ā sūryād abharan gharmam ete ||

10.182.01a बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषदघशंसाय मन्म ।

10.182.01c क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥

10.182.01a bṛhaspatir nayatu durgahā tiraḥ punar neṣad aghaśaṁsāya manma |
10.182.01c kṣipad aśastim apa durmatiṁ hann athā karad yajamānāya śaṁ yoḥ ||

10.182.02a नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु ।

10.182.02c क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥

10.182.02a narāśaṁso no 'vatu prayāje śaṁ no astv anuyājo haveṣu |
10.182.02c kṣipad aśastim apa durmatiṁ hann athā karad yajamānāya śaṁ yoḥ ||

10.182.03a तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हन्तवा उ ।

10.182.03c क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥

10.182.03a tapurmūrdhā tapatu rakṣaso ye brahmadviṣaḥ śarave hantavā u |
10.182.03c kṣipad aśastim apa durmatiṁ hann athā karad yajamānāya śaṁ yoḥ ||

10.183.01a अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।

10.183.01c इह प्रजामिह रयिं रराणः प्र जायस्व प्रजया पुत्रकाम ॥

10.183.01a apa̍śyaṁ tva̱ mana̍sa̱ ceki̍tāna̱ṁ tapa̍so jā̍taṁ tapa̍so̱ vibhū̍tam |
10.183.01c i̱ha pra̱jām i̱ha ra̱yiṁ rarā̍ṇa̱ḥ pra jā̍yasva pra̱jayā̍ putrakāma ||

10.183.02a अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम् ।

10.183.02c उप मामुच्चा युवतिर्बभूयाः प्र जायस्व प्रजया पुत्रकामे ॥

10.183.02a apa̍śyaṁ tva̱ mana̍sa̱ dīdhyā̍nā̱ṁ svāyā̍ṁ ta̱nū ṛtvye̱ nādha̍mānām |
10.183.02c upa̱ mām u̱ccā yu̍vatir ba̍bhūyā̱ḥ pra jā̍yasva pra̱jayā̍ putrakāme ||

10.183.03a अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः ।

10.183.03c अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥

10.183.03a a̱haṁ garbha̍m adadhā̱m oṣa̍dhīṣv a̱haṁ viśve̍ṣu̱ bhuvane̍ṣv a̱ntaḥ |
10.183.03c a̱ham pra̱jā a̍janayam pṛ̱thi̱vyām a̱haṁ jani̍bhyo apa̱rīṣu̍ pu̱trān ||

10.184.01a विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।

10.184.01c आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥

10.184.01a viṣṇu̱r yoni̍ṁ kalpayatu̱ tvaṣṭā̍ rū̱pāṇi̍ piṁśatu |
10.184.01c ā siñcatu pra̱jāpa̍tir dhā̱tā garbha̍ṁ dadhātu te ||

10.184.02a गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।

10.184.02c गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥

10.184.02a garbha̍ṁ dhehi sinīvā̱li garbha̍ṁ dhehi sarasvati |
10.184.02c garbha̍ṁ te a̱śvinau̍ de̱vāv ā dha̍ttā̱m puṣka̍rasrajā ||

10.184.03a हिरण्ययी अरणी यं निर्मन्थतो अश्विना ।

10.184.03c तं ते गर्भं हवामहे दशमे मासि सूतवे ॥

10.184.03a hi̱ra̱ṇyayī̍ a̱ra̱ṇī̱ yaṁ ni̱rmantha̍to a̱śvinā̍ |
10.184.03c taṁ te̱ garbha̍ṁ havāmahe daśa̱me mā̱si sūta̍ve ||

10.185.01a महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।

10.185.01c दुराधर्षं वरुणस्य ॥

10.185.01a mahi trīṇām avo 'stu dyukṣam mitrasyāryamṇaḥ |
10.185.01c durādharṣaṁ varuṇasya ||

10.185.02a नहि तेषाममा चन नाध्वसु वारणेषु ।

10.185.02c ईशे रिपुरघशंसः ॥

10.185.02a nahi teṣām amā cana nādhvasu vāraṇeṣu |
10.185.02c īśe ripur aghaśaṁsaḥ ||

10.185.03a यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय ।

10.185.03c ज्योतिर्यच्छन्त्यजस्रम् ॥

10.185.03a yasmai putrāso aditeḥ pra jīvase martyāya |
10.185.03c jyotir yacchanty ajasram ||

10.186.01a वात आ वातु भेषजं शम्भु मयोभु नो हृदे ।

10.186.01c प्र ण आयूंषि तारिषत् ॥

10.186.01a vāta ā vātu bheṣajaṁ śambhu mayobhu no hṛde |
10.186.01c pra ṇa āyūṁṣi tāriṣat ||

10.186.02a उत वात पितासि न उत भ्रातोत नः सखा ।

10.186.02c स नो जीवातवे कृधि ॥

10.186.02a uta vāta pitāsi na uta bhrātota naḥ sakhā |
10.186.02c sa no jīvātave kṛdhi ||

10.186.03a यददो वात ते गृहे३ऽमृतस्य निधिर्हितः ।

10.186.03c ततो नो देहि जीवसे ॥

10.186.03a yad ado vāta te gṛhe3 'mṛtasya nidhir hitaḥ |
10.186.03c tato no dehi jīvase ||

10.187.01a प्राग्नये वाचमीरय वृषभाय क्षितीनाम् ।

10.187.01c स नः पर्षदति द्विषः ॥

10.187.01a prāgnaye vācam īraya vṛṣabhāya kṣitīnām |
10.187.01c sa naḥ parṣad ati dviṣaḥ ||

10.187.02a यः परस्याः परावतस्तिरो धन्वातिरोचते ।

10.187.02c स नः पर्षदति द्विषः ॥

10.187.02a yaḥ parasyāḥ parāvatas tiro dhanvātirocate |
10.187.02c sa naḥ parṣad ati dviṣaḥ ||

10.187.03a यो रक्षांसि निजूर्वति वृषा शुक्रेण शोचिषा ।

10.187.03c स नः पर्षदति द्विषः ॥

10.187.03a yo rakṣāṁsi nijūrvati vṛṣā śukreṇa śociṣā |
10.187.03c sa naḥ parṣad ati dviṣaḥ ||

10.187.04a यो विश्वाभि विपश्यति भुवना सं च पश्यति ।

10.187.04c स नः पर्षदति द्विषः ॥

10.187.04a yo viśvābhi vipaśyati bhuvanā saṁ ca paśyati |
10.187.04c sa naḥ parṣad ati dviṣaḥ ||

10.187.05a यो अस्य पारे रजसः शुक्रो अग्निरजायत ।

10.187.05c स नः पर्षदति द्विषः ॥

10.187.05a yo asya pāre rajasaḥ śukro agnir ajāyata |
10.187.05c sa naḥ parṣad ati dviṣaḥ ||

10.188.01a प्र नूनं जातवेदसमश्वं हिनोत वाजिनम् ।

10.188.01c इदं नो बर्हिरासदे ॥

10.188.01a pra nūnaṁ jātavedasam aśvaṁ hinota vājinam |
10.188.01c idaṁ no barhir āsade ||

10.188.02a अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः ।

10.188.02c म॒हीमि॑यर्मि सुष्टु॒तिम् ॥

10.188.02a  a̱sya pra jā̱tave̍daso̱ vipra̍vīrasya mī̱lhuṣa̍ḥ |
10.188.02c  ma̱hīm i̍yarmi suṣṭu̱tim ||

10.188.03a या रुचो॑ जा॒तवे॑दसो देव॒त्रा ह॑व्य॒वाह॑नीः ।

10.188.03c ताभि॑र्नो य॒ज्ञमि॑न्वतु ॥

10.188.03a  yā ruco̍ jā̱tave̍daso deva̱trā ha̍vya̱vāha̍nīḥ |
10.188.03c  tābhi̍r no ya̱jñam i̍nvatu ||

10.189.01a आयं गौः पृश्नि॑रक्रमी॒दस॑दन्मा॒तरं॑ पु॒रः ।

10.189.01c पि॒तरं॑ च प्र॒यन्स्वः॑ ॥

10.189.01a  āyaṁ gauḥ pṛśni̍r akramī̱d asa̍dan mā̱tara̍m pu̱raḥ |
10.189.01c  pi̱tara̍ṁ ca pra̱yan sva̍ḥ ||

10.189.02a अ॒न्तश्च॑रति रोच॒नास्य प्रा॒णाद॑पान॒ती ।

10.189.02c व्य॑ख्यन्महि॒षो दिव॑म् ॥

10.189.02a  a̱ntaś ca̍rati roca̱nāsya prā̱ṇād a̍pāna̱tī |
10.189.02c  vy a̍khyan mahi̱ṣo diva̍m ||

10.189.03a त्रिं॒शद्धाम॒ वि रा॑जति॒ वाक्प॑तं॒गाय॑ धीयते ।

10.189.03c प्रति॒ वस्तो॒रह॒ द्युभिः॑ ॥

10.189.03a  tri̱ṁśad dhāma̱ vi rā̍jati̱ vāk pa̍ta̱ṅgāya̍ dhīyate |
10.189.03c  prati̱ vasto̱r aha̱ dyubhi̍ḥ ||

10.190.01a ऋ॒तं च॑ स॒त्यं चा॒भी॑द्धा॒त्तप॒सोऽध्य॑जायत ।

10.190.01c ततो॒ रात्र्य॑जायत॒ तत॑ः समु॒द्रो अ॑र्ण॒वः ॥

10.190.01a  ṛ̱taṁ ca̍ sa̱tyaṁ cā̱bhī̍ddhā̱t tapa̱so 'dhy a̍jāyata |
10.190.01c  tato̱ rātry a̍jāyata̱ tata̍ḥ samu̱dro a̍rṇa̱vaḥ ||

10.190.02a स॒मु॒द्राद॑र्ण॒वादधि॑ संवत्स॒रो अ॑जायत ।

10.190.02c अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥

10.190.02a samudrād arṇavād adhi saṁvatsaro ajāyata |
10.190.02c ahorātrāṇi vidadhad viśvasya miṣato vaśī ||

10.190.03a सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।

10.190.03c दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥

10.190.03a sūryācandramasau dhātā yathāpūrvam akalpayat |
10.190.03c divaṁ ca pṛthivīṁ cāntarikṣam atho svaḥ ||

10.191.01a संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।

10.191.01c इळस्पदे समिध्यसे स नो वसून्या भर ॥

10.191.01a saṁ-sam id yuvase vṛṣann agne viśvāny arya ā |
10.191.01c ilas pade sam idhyase sa no vasūny ā bhara ||

10.191.02a सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।

10.191.02c देवा भागं यथा पूर्वे संजानाना उपासते ॥

10.191.02a saṁ gacchadhvaṁ saṁ vadadhvaṁ saṁ vo manāṁsi jānatām |
10.191.02c devā bhāgaṁ yathā pūrve sañjānānā upāsate ||

10.191.03a समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।

10.191.03c समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥

10.191.03a samāno mantraḥ samitiḥ samānī samānam manaḥ saha cittam eṣām |
10.191.03c samānam mantram abhi mantraye vaḥ samānena vo haviṣā juhomi ||

10.191.04a समानी व आकूतिः समाना हृदयानि वः ।

10.191.04c समानमस्तु वो मनो यथा वः सुसहासति ॥

10.191.04a samānī va ākūtiḥ samānā hṛdayāni vaḥ |
10.191.04c samānam astu vo mano yathā vaḥ susahāsati ||

Notes by Detlef Eichler (detlefeichler(at)gmx.net):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This combined version of Rigveda is from two ITRANS files which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The used fonts are Ancient Sanskrit 99 and URW Palladio IT. In the the word praüga̱ṁ (10.130.03c) the font Times New Roman is used for the character ü to show Hiatus between a and u. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (10.001.01a) the font Times New Roman is used.

4. Site access : http://www.detlef108.de/Rigveda.htm

5. Last update: 5 February 2020